पदार्थविवेकः

श्रीरघुनाथतीर्थयतिः

Padārthaviveka, a Sanskrit work on the classification and analysis of categories according to Dvaita system of Vedānta by Śrī Raghunātha Tīrtha.

First release

2008

Contact

For corrections, suggestions and feedback : sripadmanabha@gmail.com

No copyrights

Any part of this book or the entire book may be copied or translated or used in any way.

e-copy

www.dvaita.net.

Typesetting

This book is generated using LaTeX 2_ε. on ubuntu 7.10.
The source encoding is in devnag format.



Figure 1: **The photograph of mūlavṛndāvana of Śrī Raghunātha Tīrtha, the author, located at Tirumakūḍlu, near Mysore.**



Figure 2: **The photograph of alnkṛta mūlavṛndāvana of Śrī Raghunātha Tīrtha, the author, located at Tirumakūḍlu, near Mysore.**

विषयानुक्रमणिका

Acknowledgements xi

Description of the manuscript xiii

Author of Padārthaviveka xv

Conventions xvii

Some Interesting points xxi

Classification Trees xxiii

उपोद्घातः १

१ मङ्गळाचरणम् १

२ अनुबन्धचतुष्टयम् १

३ प्रमाणलक्षणम् २

१ विवक्षितलक्ष्यनिष्कर्षः २

२ दळकृत्यम् २

३ उद्देशादीनां कर्तव्यतासमर्थनम् ३

४ पदार्थलक्षणम् ३

१ दळकृत्यम् ४
२ अव्याप्तमिति पूर्वपक्षः ५
३ निराकरणम् ५
५ पदार्थविभागः ६

द्रव्यविवेकः ९
१ द्रव्यलक्षणम् ९
२ द्रव्यविभागः ९
१ उद्देशक्रमे निमित्तम् १०
३ महत्तत्वविवेकः १०
१ लक्षणम् १०
२ विभागः ११
४ अहंतत्त्वविवेकः ११
१ लक्षणम् ११
२ विभागः ११
५ इन्द्रियविवेकः ११
१ लक्षणं दुर्निरूप्यमिति पूर्वपक्षः ११
२ निराकरणम् १२
३ परोक्तलक्षणनिराकरणम् १३
४ विभागः १३
५ स्वरूपेन्द्रियनिराकरणपरः पूर्वपक्षः १३
६ निराकरणम् १४
७ बुद्ध्यादीनामुत्पत्तिः १६
६ इन्द्रियविवेके बुद्धिविवेकः १६
७ इन्द्रियविवेके मनोविवेकः १७
१ लक्षणम् १७

२ स्मृतिलक्षणम् १८
३ स्मृतिप्रामाण्यसमर्थनम् १८
४ लक्षणान्तरम् १९
५ वासनासमर्थनम् १९
६ स्वाप्नस्य मिथ्यात्वमिति पूर्वपक्षः २०
७ स्वाप्नसत्यत्वसमर्थनम् २१
८ मनसा सुखादेर्संयुक्तसमवेतत्वनिराकरणम् २१
९ विभागः २२
८ इन्द्रियविवेके श्रोत्रविवेकः २२
१ लक्षणम् २२
२ श्रोत्रस्याकाशीयत्वसमर्थनम् २२
९ इन्द्रियविवेके त्वगादिविवेकः २३
१० मात्राविवेकः २४
१ लक्षणम् २४
२ विभागः २४
३ तत्त्वानां क्रमेणोपादानत्वविवेचनम् २४
४ उपादानविभागः २५
११ भूतविवेकः २६
१ आकाशविवेकः २६
२ वायुविवेकः २७
३ तेजआदिभूतत्रयविवेकः २८
४ परोक्तानुमानदूषणम् २९
५ सुवर्णस्तैजस इति पूर्वपक्षः ३१
६ सुवर्णस्य पार्थिवत्वसमर्थनम् ३१
७ तार्किकोक्तसृष्टिप्रक्रिया ३२

८ तन्निराकरणम् ३३
९ परिमाणोत्कर्षापर्षानन्त्यसमर्थनम् ३४
१० समवायनिराकरणम् ३७
११ सदसत्कार्यत्वसमर्थनम् ४०
१२ अज्ञानविवेकः ४२
१ लक्षणम् ४२
२ अज्ञाने प्रमाणानि ४२
३ अज्ञानस्यावरणत्वसमर्थनम् ४३
४ अनादेरप्यज्ञानस्य निवृत्त्युपपत्तिः ४३
५ अज्ञानस्य प्रातिस्विकत्वनिरूपणम् ४४
६ अनादित्वपरिष्कारः ४४
१३ तमोविवेकः ४५
१ द्रव्यत्वसमर्थनम् ४५
२ पृथक्द्रव्यत्वसमर्थनम् ४६
३ विभागः ४७
४ विरोधपरिहारः ४७
१४ कालविवेकः ४७
१ लक्षणम् ४७
२ कालस्वरूपम् ४८
३ प्रवाहतोऽनादित्वपरिष्कारः ४८
४ कालस्याखण्डत्वनिराकरणम् ४९
५ विभागः ५०
१५ देशविवेकः ५०
१ लक्षणम् ५०
२ विभुत्वपरिष्कारः ५०

३ अंशानां स्वाभाविकत्वसमर्थनम् ५१
१६ वर्णविवेकः ५२
१७ आत्मविवेकः ५४
१ जीवात्मविवेकः ५४
२ परमात्मविवेकः ५७

गुणविवेकः ६३
१ लक्षणानि ६३
२ विभागः ६४
३ शब्दादिगुणपञ्चकविवेकः ६४
१ जातिव्यक्त्योर्भेदाभेदसमर्थनम् ६५
२ विभागः ६६
३ श्रोत्रादिषु शब्दादिगुणत्वसमर्थनम् ६६
४ स्पर्शादिविभागः ६८
४ बुद्धिविवेकः ६८
१ लक्षणम् ६८
२ विभागः ६८
३ ईशज्ञानम् ६९
४ लक्ष्मीज्ञानम् ६९
५ ऋजुज्ञानम् ६९
६ तात्त्विकयोगिज्ञानम् ७१
७ अतात्त्विकयोगिज्ञानम् ७१
८ सात्विकादिज्ञानम् ७१
९ वृत्तिज्ञानम् ७१
१० परोक्षज्ञानम् ७१
११ पुनर्विभागः ७१

१२ प्रमा ७२
१३ प्रमाणस्य लक्षणं परीक्षा च ७२
१४ प्रमाणविभागः ७५
१५ केवलप्रमाणम् ७५
१६ केवलप्रमाणविभागः ७६
१७ प्रत्यक्षजन्यज्ञाननिरूपणम् ७८
१८ अनुमानजन्यज्ञाननिरूपणम् ७९
१९ आगमजन्यज्ञाननिरूपणम् ८१
२० अनुप्रमाणम् ८२
२१ प्रत्यक्षम् ८२
२२ अनुमानम् ८२

A श्रीरघुनाथतीर्थश्रीपादकृतग्रन्थाः ८७
१ शेषतात्पर्यचन्द्रिका ८७
२ तत्त्वकणिका ८८
३ तत्त्वसारः ८९
४ पदार्थविवेकः ९०
५ कर्मनिर्णयव्याख्या ९०

B श्रीरघुनाथतीर्थस्त्रोत्राणि ९३
१ श्रीजगन्नाथतीर्थकृतभाष्यदीपिकास्थम् ९३
२ चरमश्लोकः ९३
३ श्रीविद्याकान्ततीर्थकृतं रघुनाथतीर्थाष्टकम् ९३
४ श्रीविद्यारत्नाकरतीर्थकृतं शेषचन्द्रिकाचार्यस्तोत्रम् ९४

Acknowledgements

- लिपिकार, the writer of the manuscript, for writing this rare scholarly work beautifully on the palm leaves. His noble pain-staking effort is an inspiration to all.

- Sri Sameera Atre, Pune, his younger brother Sri Pradyumna Atre, and their family for not only preserving this rare manuscript, but also for providing the original manuscript with the sole purpose of supporting the advancement in the studies of Dvaita Vedanta. This manuscript was found in Sri Pradyumna Atre's home in Bangalore on 6th July 2008, the day of āraādhanā of Śrī Raghunātha Tīrtha, the author !

- Sri Shrisha Rao, Bangalore, Sri H.P.Raghunandan, Pune and Dr.N.V Tejaswi, Bangalore for their help in developing this document in LaTeX 2_ε.

- The owners of www.dvaita.net for hosting the e-text in their website.

- Sri Harish Rao and Sri K.M. Seshagiri, for providing the photographs of mūlavṛndāvana of Śrī Raghunātha Tīrtha.

Description of the manuscript

Title	Padārthaviveka
Authour	Raghunāthatīrthayati
Material	Palmleaf
Script	Nandināgari
Size	33.5 cm X 5.5 cm
Folios	39 + 3
Lines per page	12
Letters per line	65
आदि	॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ ॥ श्रीमन्नृसिंहमार्यामहागुरवे नमः ॥ ॐ ॥ जानकीवदनाम्भोजभानवे गतये सताम् । नमः श्रीरामचन्द्राय हेतवे सर्वसम्पदाम् ॥
अन्त्य	Not available

The manuscript is very old, damaged, worm eaten amd incomplete. The first leaf (see fig. 3) bears the name of the title and the author :

पदार्थविवेक रघुनाथतीर्थयतिकृत

The next line reads : श्रीशव्यासहयाननो विजयते.

The manuscript is very well written, definitely by a well versed scholar if



Figure 3: **The scanned image of the original manuscript bearing the colophon. Note the name of the title and the author**

not by the author himself. The scribal errors are found rarely. However, due to the bad condition of the manuscript a few leaves are torn, all characters could not be deciphered. The text in the manuscript ends abruptly. We hope that the reasearch community will find a complete manuscript of this rare work soon. The manuscript has 3 empty leaves at the end.

To enable further improvement of the edited text, the complete manuscript has been scanned and is uploaded at www.dvaita.net.

Author of Padārthaviveka

- The colophon of the manuscript reads as :

  पदार्थविवेक रघुनाथतीर्थयतिकृत

- The benedictory verse of Padārthaviveka is also seen in his Bṛhatīsahasravyākhyāna named Tattvasāra

- Dr. B.N.K. Sharma[1] [1], Sri Gopalakrishnacarya Gaudagere [2], and Prof. D.Prahladacarya [3] have mentioned Padārthaviveka as a work authored by Śrī Raghunātha Tīrtha. The present work is named Padārthaviveka in the colophon, and in the middle of the work also.

  'इति श्रीमत्पदार्थीयविवेके न्यायगर्भिते'

  At the end of each context we can see delimiters like, इति भूतविवेकः, इति मात्राविवेकः, इत्यज्ञानविवेकः etc, which prove beyond doubt that the present work is Padārthaviveka.

- Some unique words of his like दशप्रमतिवर्त्मना, used in तत्त्वसार can be seen in this work also.

[1]"-His other works are (2) a padArthaviveka ** (of which nothing more is known than its name) dealing presumably with the categories of the system"

Author profile

Aśrama nāma	Śrī Raghunātha Tīrtha
Guru	Śrī Lakṣmināyaṇa Tīrtha
Disciples	Śrī Jagannātha Tīrtha
	Śrī Lakṣminidhitīrtha
Works	Śeṣatātparyacandrikā
	Tattvakaṇikā
	Tattvasāra
	Padārthaviveka
	Karmanirṇayavyākhyāna
	Gangāstotra
	Sanatsujātīyavyākhyā
	Īśāvāsyopaniśadbhāṣyaṭīkāṭippaṇī ?
Ruling period	approx. 1700 to 1755 AD (according to Dr.B.N.K Sharma.)

Conventions

1. The names of the chapters, sections, etc. used here are not found in the manuscript. Those found in the manuscripts at the end of some sections are given in the bold face in the same font size as that of the text.

2. Any of the punctuation marks are not used in the manuscpripts, except for ' ।' at the end of some lines. However, a few are newly incorporated to make the text easy-to-read :

   - The quotes from different texts, anumānaprayoga, the text in a direct speech, and words which refer to themselves but not to the meaning, are enclosed in single inverted quotes.
   - In case of nested loops of the above types double inverted quotes are used.
   - The questioning and objecting sentences are ended by question mark.
   - The words of similar category are separated by commas. Eg: mutiple hetu, or a list of subtypes.

- Keeping in mind not to exceed 8-10 lines per paragraph, a paragraph break is given at an appropriate context switch. If there is an obvious shift in the context, then the break is given even in smaller paragraphs.

3. The rule of padasandhi is not followed

   - at the beginning and end of a quote
   - at pratipadārtha
   - visarga followed by sa. eg: मनःसनिकर्ष
   - while separating the words by comma
   - in anumānaprayoga

4. The complicated dvandvasamāsas are separated by hyphens.

5. The verse which extends to second line is given in verse environment; others are within a paragraph.

6. Three dots are used to indicate a loss in the text, due to damaged manuscript.

7. The superscripted numbers guide the reader to a footnote at the footer of the same page. They are used :

   - In identifying the location of a quoted text.
   - To indicate the approximate number of letters lost due to damaged leaves of the manuscript.
   - To note a dictionary in case of words difficult to understand.

- To point to other texts which help in understanding the context better.

Some Interesting points


- बाह्येन्द्रियजं ज्ञानमपि द्विविधम् । चेतनस्वरूपं वृत्तिरूपं चेति। (पृ.६९)
- मुक्तावेकप्रकारत्ववचनं प्रायिकमित्यप्याहुः । (पृ.७०)
- अनादित्वं द्विविधम् । मुख्यामुख्यभेदात् । निरवधिकानादित्वं मुख्यम् । अवधिमत्त्वेऽपि बहुकालीनत्वममुख्यम् । (पृ.७१)
- ऋज्वादीनां षण्णां परोक्षापरोक्षभेदेन द्विविधमपि वृत्तिज्ञानं प्रमा भ्रमश्चेति द्विविधम् । (पृ.७२)

तदेवं दुर्मतविषतरूद्दाहदक्षप्रमाणज्वालामालाधरोक्तः पन्थाः सुपन्थाः ।


- श्रीरघुनाथतीर्थाः

Classification Trees


प्रमाणविभागः



ज्ञानविभागः १



ज्ञानविभागः २


ज्ञानम्
अपरोक्षम्
परोक्षम्
लिङ्गजम्
शब्दजम्
आन्तरिन्द्रियजम्
बाह्येन्द्रियजम्
मनोजम्
साक्षिजम्
वृत्तिरूपम्
चेतनस्वरूपम्
तत्तोल्लेखि
तदनुल्लेखि

उपोद्घातः

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

१ मङ्गळाचरणम्

जानकीवदनाम्भोजभानवे गतये सताम् ।
नमः श्रीरामचन्द्राय हेतवे सर्वसम्पदाम् ॥[१]

२ अनुबन्धचतुष्टयम्

'सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् ।
मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ॥'[२]
'एकं च तत्त्वतो ज्ञातुं विना सर्वज्ञतां नरः ।
न समर्थो महेन्द्रोऽपि तस्मात् सर्वत्र जिज्ञसेत् ॥'[३]

इत्यादिना भगवज्ज्ञानस्य तदनुबन्धिजगत्सृष्ट्यादिज्ञानस्य च मोक्षहेतुत्वस्य तयोश्च जिज्ञासासाध्यत्वस्य च प्रमितत्वात्, अन्यैरन्यथानिरूपितत्वाच्च, पदार्था निरूप्यन्ते । यद्यप्येते तत्र तत्र निरूपिता एव । तथाऽपि न मालारूपेणेत्यदोषः । पदार्थानां निरूपणं नाम प्रमाण-उद्देश-विभाग-लक्षण-परीक्षादिभिः परिशोधनात्मको विचारः ।

---

[१]अयमेव मङ्गलश्लोकः तत्त्वसारेऽपि पठ्यते ।
[२]महाभारततात्पर्यनिर्णये १-८३
[३]गीताभाष्योदाहृतस्कान्दवचनम् ४-९

३ प्रमाणलक्षणम्

तत्र तावत् प्रमाणलक्षणमुच्यते । यथावस्थितज्ञेयविषयीकारित्वं प्रमाणत्वम् । अत्र यथावस्थितज्ञेयविषयीकारित्वं लक्षणम् । प्रमाणपदवाच्यमिह लक्ष्यम् । 'यस्य लक्षणमुच्यते तल्लक्ष्यम्' इति न्यायात् ।

१ विवक्षितलक्ष्यनिष्कर्षः

ननु प्रमाणपदवाच्यानि प्रमातत्साधनतदधिकरणादीनि बहूनि सन्ति । तानि सर्वाण्यपि किं लक्ष्यम्? उत न? इति । उच्यते । 'प्रमितिः प्रमाणम्' इति भावव्युत्पत्त्या, 'प्रमीयतेऽनेन' इति करणव्युत्पत्त्या च प्रमाणपदवाच्यं प्रमा तत्साधनं चेति द्वयमेव लक्ष्यम् । नाधिकरणकर्तृसेतुमर्यादादीनि । नहि तान्त्रिकाः शास्त्रेषु तदधिकरणादीनि प्रमाणत्वेन व्यवहरन्ति । शास्त्रीयव्यवहारसिद्ध्यर्थं प्रमाणादीनां लक्षणकथनम् । तदेवं प्रमातत्साधनयोरेव प्रमाणत्वेन व्यवहाराल्लक्ष्यत्वम् ।

२ दळकृत्यम्

ननु विषयीकारित्वमात्रं प्रमाणलक्षणमस्तु, शिष्टं व्यर्थमिति चेन्न । 'ग्रामं गच्छति' 'स्वर्गमिच्छति' इत्यादिव्यवहाराद्गम्येष्टरूपविषयकगतीच्छयोरतिव्याप्तिः स्यात् । तदर्थं **ज्ञेयेति** । तत्र ग्रामस्वर्गयोर्गम्येष्टत्वान्न ज्ञेयता । यद्यपि ज्ञेयत्वं केवलान्वयिधर्मः । सर्वस्यापि ज्ञानविषयत्वयोग्यत्वात् । तथाऽपि ज्ञानविषयत्वफलोपधानाभावेन न तत्रातिव्याप्तिः । तावत्युक्ते शुक्तिरूप्यादिज्ञाने तत्साधनदुष्टेन्द्रियादौ चातिव्याप्तिः । तदर्थं यथावस्थितेति । ...[४] यथावस्थितमेव वस्तु विषयीकरोति यज्ज्ञानं इन्द्रियादि वा तदित्यर्थः । शुक्तिरूप्यज्ञानम् इन्द्रियं वा न तथा ।

अयथावस्थितरूप्यादि ...[५] देवदत्तः' इत्यादि प्रमायां शब्द-स्पर्श-रूप-रस-गन्धादिविषयिण्यां अनुमित्यादिरूपिण्यां च प्रमायां साक्षाद्यथावस्थितज्ञेयविषयीकारित्वम्, तत्साधनेषु साक्षि-बुद्धि-मनः-श्रोत्र-त्वक्-नयन-रसन-घ्राणेषु अनुमानादौ च परंपरया यथावस्थितज्ञेयविषयीकारित्वमस्तीति विशिष्टलक्षणस्य लक्ष्यद्वयसमन्वयः । तदेवमतिव्याप्त्यादिदूषणत्रयराहित्यलक्षणं लक्ष्येतरव्यावृत्तित्वे सति सकललक्ष्यवृत्तित्वरूपं लक्षणलक्षणं प्रमाणलक्षणेऽस्ति ।

ननु विषिष्टस्यापि लक्षणस्य प्रमातृप्रमेयाधिकरणादिषु अतिव्याप्तिः । तेषां च-

---

[४] १ अक्षराणि तृटितानि

[५] १५ अक्षराणि तृटितानि विषयज्ञानवानहम् सुखादा...?

क्षुरादीनामिव प्रमोपकारत्वेनावश्यकतया परंपरया ज्ञेयविषयीकारित्वसद्भावात् । उच्यते । स्यादेवं यदीद्रियाणामिव साधनत्वं स्यात् । नत्वेवं । प्रमात्रादिनाम् उपकारकत्वेन कारकत्वसद्भावेऽपि प्रकृष्टकारणत्वरूपसाधनत्वाभावात् ।

ननु किमिदं कारणत्वम्? उच्यते । अनन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम् । यथा घटस्य कुलालदण्डादि । यद्यप्याकाशादिरपि नित्यत्वात् सर्वगतत्वात् घटादेः पूर्वभावि । तथापि नासावनन्यथासिद्धः । अन्यत्र कृतपूर्ववृत्तिन एव कार्यसम्भवे तत्सहभूतत्वरूपान्यथासिद्धलक्षणाक्रान्तत्वात् । अत एव दैवादागतरासभादेर्व्यावृत्तिः ।

तच्च कारणं द्विविधम् । उपादानकारणं निमित्तकारणं चेति । यो यदात्माना विक्रियते स तस्योपादानम् । यथा मृत्पिण्डः कम्बुग्रीवादिसंस्थानविशेषवद्घटाकारेण विकुर्वन् घटादेरुपादानम् । तद्भिन्नं कारणं निमित्तकारणम् । यथा दण्डादि घटस्य ।

उभयविधस्य कारणस्य मध्ये यत् प्रकृष्टं कारणं तत् साधनमुच्यते । यज्जातीयानन्तरमेव नियमेन कार्योत्पत्तिः तत् साधनमिति यावत् । तथा च कुठारादीनां तज्जातीयानां कुठारान्तरादीनां च नियमेन छिदिक्रियाजनकत्ववत् प्रमातुः प्रमात्रन्तरस्य च प्रमाजनकत्वनियमाभावेन प्रमासाधनत्वाभावात् परंपरया इन्द्रियाणामिव न यथावस्थितज्ञेयविषयीकारित्वं नापि सविषयस्वभावानां ज्ञानेच्छाकृतीनामिव साक्षादेव यथावस्थितज्ञेयविषयीकारित्वमिति न विशिष्टलक्षणस्य प्रमात्रादावतिव्याप्तिः । शिष्टमग्रे वक्ष्यते ।

३ उद्देशादीनां कर्तव्यतासमर्थनम्

तदेवं 'मानाधीना मेयसिद्धिः' इति न्यायेन पदार्थस्वरूपसिद्ध्यर्थं प्रमाणमवश्यं वक्तव्यम् । एवमुद्देशविभागलक्षणपरीक्षाश्च कर्तव्याः । लिलक्षयिषितपदार्थोद्देशाभावे लक्षणकथनानुपपत्तेः । विभागाभावे तत्स्वरूपविशेषजिज्ञासानुपपत्तेः । लक्षणाभावे सजातीयविजातीयव्यावर्ततया लक्ष्यावधारणानुपपत्तेः । परीक्षाभावे संशयविपर्ययाद्यनिवृत्तेः ।

तदेवं प्रमाणादीनामावश्यकत्वसिद्धेः प्रमाणलक्षणमुक्तम् ।

४ पदार्थलक्षणम्

वक्ष्यते चेदानीं पदार्थस्य लक्षणम् । तत्र प्रमितिविषयत्वं पदार्थसामान्यलक्षणम् ।

१ दळकृत्यम्

नन्वत्र प्रपदो व्यर्थः । न च शशशृङ्गादौ मितिविषयत्वस्य सङ्गावादतिव्याप्तिः, तद्वारणायोपसर्गः, तदर्थश्च प्रकृष्टत्वम्, मितेः प्रकृष्टत्वं च याथार्थ्यमेवेति यथार्थ-ज्ञानविषयत्वस्य लाभेन शशशृङ्गादौ नातिव्याप्तिरिति वाच्यम् । दत्तेऽपि विशेषणे तद्दोषतादवस्थ्यात् ।

तथा हि । किं तत्र शशादिः प्रमाऽविषयः? उत शृङ्गादिः? अथवा उभयसम्ब-न्धः? नाद्यद्वितीयौ । शशादीनामसत्वापातात् । न तृतीयः । शशशृङ्गयोः सम्बन्ध आकाशादिना सन्नेवेति तस्यापि प्रमाविषयत्वात् । शृङ्गनिरूपितः सम्बधः शशधर्मि-कः न प्रमाविषय इति चेन्न । तस्यापीश्वरप्रमाविषयत्वात् । अन्यथा ईश्वरस्य सार्वज्ञं न स्यात् । किञ्च तादृशसम्बन्धस्य व्यवसायरूपप्रत्यासत्त्याऽनुव्यवसाये भावमाव-श्यकम् । अनुव्यवसायश्च प्रमैवेति सर्वसम्मतिः । तथा च 'शशशृङ्गज्ञानवानहम्' इत्यनुव्यवसायरूपप्रमाविषयत्वात् कथं नातिप्रसक्तिः? किञ्च 'नेदं शृङ्गं किन्तु क-र्णौ' इति निषेधप्रमाविषयत्वमस्ति । किञ्च 'सर्वं ज्ञानं धर्मिण्यभ्रान्तम्, प्रकारे तु विपर्ययः' इति न्यायेन धर्म्यंशे प्रमाविषयत्वस्य सत्वादतिव्याप्तिः । न च प्रकारे विपर्यत्वस्यापि सत्वात् नैवमिति वाच्यम् । तथापि धर्म्यंशे प्रमात्वस्यापरिहारात् ।

उच्यते । स्यादेतत् । यद्यापणस्थमेव रजतं दोषवशाच्छुक्त्यादित्वेन भासत इति सिद्धान्तः स्यात् । नैवम् । किन्तु, अत्यन्तासद्रजतादिकं दोषवशाच्छुक्त्याद्यात्मना प्रतिभासत इति हि सिद्धान्तः । एवं सति कथमतिप्रसक्तिः ! इदमंशस्य प्रमाविषय-त्वेऽपि तुच्छस्य शशशृङ्गतत्सम्बन्धादेः प्रतीयमानस्य प्रमाविषयत्वाभावात् । धर्म्यंशे प्रमामादाय प्रकारे प्रमाविषयत्ववर्णनं तु व्यधिकरणम् । न हीश्वरस्यात्यन्तासतोऽज्ञा-ने सार्वज्ञहानिः । यच्च ज्ञानलक्षणप्रत्यासत्त्याऽनुव्यवसायविषयत्वेन 'नेदं शृङ्गं किन्तु कर्णौ' इति निषेधप्रमाविषयत्वेन वाऽतिप्रसक्तिवर्णनम्, तत् साक्षात्प्रमाविषयत्वस्य विधिरूपप्रमाविषयत्वस्य वा विवक्षितत्वेन निरस्तम् । न ह्यनुव्यवसायादिः श-शशृङ्गं विषयीकरोति, न वा 'अस्ति' इति विधिरूप इति न दत्तेऽपि चोपसर्गे दोषतादवस्थ्यम् ।

विशेष्यपदोपादानेनाप्रमित्यात्मके घटादावतिव्याप्तिनिरासः । (?)

नन्वेवं तर्हि प्रमितौ प्रमित्यन्तरविषयत्वेनानवस्थापातेन लक्षणाभावादव्याप्तिरि-ति चेन्न । प्रमितावपि साक्षिविषयत्वस्य साक्षिणः स्वप्रकाशत्वस्य च वक्ष्यमाणत्वेन लक्षणसङ्गावादिति संक्षेपः ।

२ अव्याप्तमिति पूर्वपक्षः

नन्वथापि स्यात् । लक्ष्येतरावृत्तित्वे सति सकललक्ष्यवृत्तित्वं लक्षणलक्षणम् । लक्षणस्य हि त्रीणि दूषणानि । अतिव्याप्तिरव्याप्तिरसम्भवश्चेति । लक्ष्येतरवृत्तित्वे सति लक्ष्यवृत्तित्वमतिव्याप्तिः । लक्ष्यैकमात्रवृत्तित्वमव्याप्तिः । अलक्ष्यमात्रनिष्ठात्यन्ताभावप्रतियोगित्वमसम्भवः । तथा च, अतिव्याप्ताव्याप्तशृङ्गित्वशबलत्वादौ लक्षणलक्षणस्यातिव्याप्त्यव्याप्तिवारणाय सत्यन्तं विषेष्यदलघटकलक्ष्ये साकल्यं च निवेशेनीयम् । तथा च, इह प्रमितिविषयत्वे पदार्थसामान्यलक्षणेऽलक्षणलक्षणाभावः, लक्षणलक्षणभावश्च वक्तव्यः । अन्यथाऽलक्षणत्वप्रसङ्गात् । स चेह नास्ति । तथा हि । न तावदसम्भवलक्षणाभावः । 'भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि'[६] इति वचनेन पदार्थानामनुगतधर्मनिषेधपूर्वकं तत्तद्धर्मिमात्रवृत्तेर्धर्मवत्वाङ्गीकारेण द्रव्यनिष्टस्यैतद्घटनिष्टस्य वा प्रमितिविषयत्वस्य लक्ष्यभूते गुणकर्मादौ घटान्तरे वा एतद्घटत्वस्य घटान्तर इवासत्वनियमेन लक्ष्यनिष्टात्यन्ताभावप्रतियोगित्वसम्भवात् । एवं लक्ष्यनिष्टत्वे सति लक्ष्यनिष्टात्यन्ताभावप्रतियोगित्वरूपं लक्ष्यैकदेशवृत्तित्वात्मकमव्याप्तिलक्षणं सुघटमेवेति ।

३ निराकरणम्

अत्राहुः साम्प्रदायिकाः । लक्ष्यजातीयेतरावृत्तित्वे सति लक्ष्यजातीयमात्रे साक्षात् परंपरया वा वृत्तिर्लक्षणलक्षणम् । यो धर्मः स्वाश्रयसजातीयानन्तव्यक्तिषु स्वप्रतियोगिकसादृश्यधर्मिकधर्मान्तराश्रयत्वेन वा स्वनिष्टसादृश्यप्रतियोग्याश्रयत्वेन वा सम्बन्धेन वर्तते, न वर्तते चालक्ष्यजातीयानन्तव्यक्तिषूक्तसम्बन्धद्वयेन स धर्मो लक्षणमिति निष्कर्षः । स्वशब्दविवक्षितद्रव्यनिष्टप्रमितिविषयत्वप्रतियोगिकं यत्सादृश्यं गुणनिष्टप्रमितिविषयत्वरूपधर्मान्तरनिष्टसादृश्यम्, तद्धर्मिभूतानि यानि धर्मान्तराणि गुणादिनिष्टप्रमितिविषयत्वानि, तेषां ये आश्रयाः गुणादयः, तथाभूतः सम्बन्धः गुणादिनिष्टः ।

तथा च, धर्मित्वरूपसाक्षात्सम्बन्धेन द्रव्यनिष्टप्रमितिविषयत्वानाश्रयोऽपि गुणादिः परम्परासम्बन्धेन द्रव्यनिष्टप्रमितिविषयत्वाश्रयो भवति । एवं ...[७]यानि गुणादिनिष्टप्रमितिविषयत्वानि तन्निष्टानि यानि सादृश्यानि तत्प्रतियोगिभूतं द्रव्यनिष्टप्रमितिविषयत्वं तदाश्रयत्वं द्रव्यनिष्टः सम्बन्धः । तथा च धर्मित्वरूपसाक्षात्सम्बन्धेन

---

[६]अनुव्याख्याने २-२-१२४

[७]७ अक्षराणि तृटितानि

गुणादिनिष्टप्रमितिविषयत्वानाश्रयोऽपि द्रव्यं उक्तपरंपरासम्बन्धेन गुणादिनिष्टप्रमितिविषयाश्रयो भवति । एवमाभ्यां सबन्धाभ्यां प्रमितिविषयत्वरूपो धर्मः स्वाश्रये द्रव्ये लक्ष्यताघटकसत्स्वरूपत्वादिना सजातीयेषु गुणकर्मादिषु वर्तते, न वर्तते च निःस्वरूपत्वेन विजातीये तुच्छे । प्रमितिविषयत्वप्रतियोगिकसादृश्यधर्मिभूतधर्मान्तराभावेन तदाश्रयत्वरूपसम्बन्धाभावात् ।

यद्यपि प्रमितिविषयत्वसदृशप्रतियोगित्वानुयोगित्वज्ञेयत्वाभिधेयत्वादिधर्मान्तरं तुच्छेप्यस्ति । तथाऽपि सत्स्वरूपत्वादिप्रयुक्त्यन्तरङ्गसादृश्यस्य प्रतियोगित्वादावभावात् । न हि सत्तानिरपेक्षं प्रतियोगित्वादिकं तत्सापेक्षप्रमितिविषयत्वादिसदृशं भवति । अन्तरङ्गसादृश्यस्यासम्भवात् ।

एतेन यत्किञ्चित्सादृश्यस्य तुच्छेऽतिप्रसङ्गत्वेन सादृश्यघटितं लक्षणमनुपपन्नमिति परास्तम् ।

तथा च, उक्तरीत्या द्रव्यनिष्टप्रमितिविषयस्य सकललक्ष्येषु गुणादिषु वृत्तेः, अलक्ष्ये तुच्छे अवृत्तेः नोक्तदोष इति लक्षणमिदं अनवद्यम् ।

५ पदार्थविभागः

ते च पदार्थाः द्रव्य-गुण-कर्म-सामान्य-विशेष-विशिष्ट-अंशि-अभाव-भेदेनाष्टविधाः । अन्ये तु द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभाव-भेदेन सप्तविधाः पदार्था इत्याहुः । ते च प्रामाणिकपरित्यागादप्रामाणिकस्वीकाराच्च निरस्ताः । यथा चैतत् तथाऽग्रे दर्शयिष्यते ।

यद्यप्येवं विभागे भगवत्प्राधान्यं न सेत्स्यतीति 'स्वतन्त्रमस्वतन्त्रं च'[८] इत्यादिनाऽऽचार्यैः पदार्था अन्यथा विभक्ताः । तथाप्यस्य प्रकरणस्य पदार्थविवेचनमात्रार्थत्वादयमपि विभागो नायुक्तः । तर्ह्यत्र भगवत्प्राधान्यं न ज्ञायेतेति चेत् । न ह्यत्राचार्यवचनं तिरोहितमस्ति ।

ननु कर्मसामान्यविशेषाभावाः अप्रधानत्वधर्मत्वानुपादानत्वसाम्येन गुणेऽन्तर्भाव्याः । द्रव्यगुणौ द्वावेवेत्यादि प्रकारान्तरेण विभागसम्भवे कुतोऽयमष्टधेति नियमः? मैवम् । 'गुणक्रियाजातिपूर्वा धर्माः सर्वेऽपि वस्तुनः'[९] इत्यादिना कर्मादीनां विभिन्नत्वेन प्रमितत्वात् ।

---

[८] तत्त्वसङ्ग्राने-१

[९] तत्त्वविवेके-९

अत्रैके चोदयन्ति । पदार्थस्वरूपमेव न सत् । सत्यपि तस्मिन् तदेकविधमेव । न द्वितीयम् । न सुतरां तृतीयमिति । मैवं । 'घटः सन्', 'इमौ घटपटौ स्तः' इत्यादि प्रत्यक्षविरोधात् । 'नास्त्येव तत्वम्' 'एकमेव तत्वम्' इत्यादेः ज्ञानप्रमाण्याप्रामाण्ययोर्व्याघाताच्च ।

द्रव्यविवेकः

१ द्रव्यलक्षणम्

तत्र द्रव्यादीनां द्रव्यत्वाद्येव सामान्यलक्षणम् ।

२ द्रव्यविभागः

तत्र द्रव्याणि महत्-अहङ्कार-इन्द्रिय-मात्रा-भूत-अज्ञान-तमः-काल-देश-वर्ण-आत्मभेदेन एकादशविधानि । अत्र महदादिभूतान्तानि पञ्चद्रव्याणि प्रकृत्यंशोपचितत्वात् प्राकृतानि । अज्ञानाद्यात्मान्तानि षड्द्रव्याणि उपचयाभावादप्राकृतानि । उपचयस्तूपबृंहणम् । वृद्धिरिति यावत् ।

ननु

> 'पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ।
> एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥'[१]

इत्यादौ प्राकृतद्रव्याणि चतुर्विंशतिविधान्युच्यन्ते । अव्यक्तसञ्ज्ञं प्रधानं चास्ति । तत् कथं पञ्चविधानि? इति चेन्न । उक्तेष्वेवान्तर्भावात् । तथा हि । न प्रधानाख्यस्याव्यक्तस्य तावन्महदादिभ्यः पृथक्ता सम्भवति । महदादिसूक्ष्मभागानामेवाव्यक्तशब्दाभिधेयत्वात् । सन्ति ह्येषां सर्वेषां तत्वानां सूक्ष्मभागाः सत्वरजस्तमोभेदेन प्रत्येकं त्रिविधा राशयः । 'भूतेन्द्रियप्राणगुणसूक्ष्मरूपं च नित्यकम्'[२] इत्यादेः ।

---

[१]भागवते ३-२७-१२

[२]तत्त्वविवेके-८

तथा च महदादिभूतान्तानां सूक्ष्मभागा एव प्रधानाव्यक्तमूलप्रकृत्यादिसञ्ज्ञा इति महदादिशब्देनैव सङ्गृहीताः ।

एवमिन्द्रियशब्देन द्वादशानाम्, मात्राशब्देन शब्दादिपञ्चतन्मात्राणाम्, भूतशब्देनाकाशादिपञ्चानां सङ्ग्रहः ।

१ उद्देशक्रमे निमित्तम्

अत्र महदादिभूतान्तानामुद्देशक्रमे पूर्वपूर्वस्योत्तरोत्तरोपादानत्वमुपचयाल्पत्वं च निमित्तम् । तथा हि । गुणत्रयाभिधानैः सूक्ष्मभागैरीश्वरः महदादिसूक्ष्मभागान् किञ्चिदुपचितान् करोति । यथा देवदत्तः पङ्कादिभिः तत्सूक्ष्मान्भित्तिकांशान् किञ्चिस्थूलान् करोति । तथैवोपचिताः भावाः चतुर्विंशतिधा महदादिपरमाणव उच्यन्ते । उपचयाधिक्याभावेन सम्यक्सृष्ट्यभावादसंसृष्टाश्चोच्यन्ते । तथा च महदादयः परमाणवः द्व्यणुकादिक्रमेण महत्तत्वमुत्पादयन्ति । तत आहङ्कारिकाः महत्तत्वभागसहिताः अहङ्कारतत्वमित्यादि वक्ष्यमाणक्रमेणोपादानत्वादिकमूह्यम् । एवं संसृष्टासंसृष्टभेदभिन्नानां महदादिभूतान्तानां पञ्चानामुद्देशे सिद्धे, सृष्टिरहितानामज्ञानादीनां षण्णां द्रव्यानां उद्देशः । तत्रापि यथासम्भवमानन्तर्यनियामकमूह्यम् ।

३ महत्तत्वविवेकः

१ लक्षणम्

अथ महत्वं जातिविशेषः । महानित्यनु ...[३]द्रव्याणां घटादिवद्विविक्ततया न प्रत्यक्षम् । तथाऽपि कार्यमात्रस्य प्रायेण महदादिचतुर्विंशतितत्वजन्यस्यागमिकतयाऽस्मदादिशरीरेषु महद्द्रव्यमङ्गीकर्तव्यम् । अन्यथाऽस्मदादिशरीरे पृथिवीजलादेरपि घटादिवद्विवक्तयाऽभानेन तदभावापत्त्या भौतिकत्वं न सिद्धेत् ।

अहङ्कारोपादनत्वं वा महत्वम् । तच्च 'महत्तत्वाद्विकुर्वाणादहंतत्त्वमजायत'[४] इत्यादौ प्रसिद्धम् । अहङ्कारः आहङ्कारिकपरमाणुसूक्ष्मेभ्यो महत्तत्वभागैः परिणामिभिः सहैव परिणमति । तथाऽपि प्राध्यान्यं महत्तत्वस्यैवेति न तत्रातिव्याप्तिः । एवं भागान्तरेष्वपीति ।

---

[३] १ अक्षराणि तृटितानि

[४] ?

२ विभागः

तद्विविधं नित्यम्, अनित्यं च । नित्यं सूक्ष्मरूपम् । अनित्यं द्विविधम् । असंसृष्टं संसृष्टं चेति । साक्षात् प्रकृतिमूलकमसंसृष्टम् । यथा ब्रह्माण्डाद्बहिस्थितं परमाणुरूपम् । परंपरया प्रकृतिमूलकं संसृष्टम् । यथा ब्रह्माण्डं तदन्तरमुत्पन्नम् । एवमग्रेऽपि । **इति महत्तत्वविवेकः** ॥

४ अहंतत्त्वविवेकः

१ लक्षणम्

अहंत्वं जातिविशेषः, 'अहं करोमि' इत्यादिप्रतीतिमूलः । 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते'[५] इति वचनात् । इन्द्रियाद्युपादानत्वं वा अहङ्कारत्वम् । तच्चाहङ्कारत्वं 'तैजसानीन्द्रियाण्याहुः'[६] इत्याद्यागमसिद्धम् । तत्प्रकारश्चाग्रे वक्ष्यते ।

२ विभागः

तच्चाहङ्कारतत्त्वं द्विविधम् । नित्यं अनित्यं चेति । नित्यं सूक्ष्मरूपमित्यादि पूर्ववत् । **इत्यहंतत्वविवेकः** ।

५ इन्द्रियविवेकः

१ लक्षणं दुर्निरूप्यमिति पूर्वपक्षः

अथेन्द्रियं निरूप्यते । ननु किमिदमिन्द्रियत्वम्? ज्ञानसाधनत्वं इन्द्रियजन्यज्ञानसाधनत्वं वा? अज्ञातकरणजन्यज्ञानानुवृत्तः ज्ञातकरणजन्यज्ञानव्यावृत्तः धर्मविशेषो वा? साक्षात्कारिज्ञानसाधनत्वं वा? नाद्यः । अनुमानशब्दयोरतिव्याप्तेः । न द्वितीयः । इन्द्रियलक्षणे इन्द्रियप्रवेशेनात्माश्रयात् । न तृतीयः । अज्ञातकरणशब्दस्येन्द्रियपर्यात्वेनोक्तदोषतादवस्थ्यात् । न चतुर्थः । साक्षात्त्वस्य दुर्निरूप्यत्वात् । कथञ्चिदज्ञातकरणजन्यज्ञानानुवृत्तः ज्ञातकरणजन्यज्ञानव्यावृत्तो धर्मविशेषः साक्षात्त्वमिति निर्विचनमपि साक्षात्कारज्ञानस्येन्द्रियजन्यज्ञानपर्यात्वेनोक्तरीत्याऽऽत्माश्रयतादवस्थ्यात् ।

---

[५] गीता ३-२७

[६] ?

चतुर्णामपि लक्षणानां वागादिकर्मेन्द्रिये अव्याप्तेश्च । न च वागादिनां इन्द्रियत्वे प्रमाणाभावः । 'वाक् करौ चरणादि तु'[७] इत्यादेः, 'ज्ञानकर्मेन्द्रियाणि च'[८] इत्यादेश्च । तेषामुपचरितार्थत्वकल्पने वैदिकाभासत्वं कल्पयितुः स्यात् ।

किञ्चेदं साधनत्वम् अविलम्बेन कार्योत्पादकत्वम्? व्यापारवत्वम्? कर्तृप्रेर्यत्वम्? नाद्यः । कर्तृकर्मणोः प्रमातृप्रमेययोरतिव्याप्तेः । न च चक्षुरुन्मीलन-व्यासङ्गवर्जन-मनःसंयोग-विषयालोकसंयोगादिसहकार्यन्तराणां बहूनामपेक्षणीयानां सत्वेन, तेषां प्रकृतकार्यव्यवधायकत्वात्, विलम्बसम्भवेन, अविलम्बेन कार्योत्पादकत्वं नास्तीति वाच्यम् । चक्षुरादावप्युक्तसहकार्यपेक्षायाः साम्यात् ।

यद्यपि विषयसन्निकर्षः आलोकादिवच्चक्षुषोऽपेक्षणीयमस्ति । तथाऽपि 'न हि स्वाङ्गं स्वव्यवधायकम्' इति न्यायेन सन्निकर्षादेर्व्यापारत्वेन न व्यवधायकत्वम् । मनःसंयोगादेस्तु आत्मनो व्यापारत्वाभावेन स्वाङ्गत्वाभावात् व्यवधायकत्वमिति वैषम्यमिति चेन्न । विषयालोकसंयोगस्य चक्षुषोऽपेक्षणीयस्य व्यापारत्वानङ्गीकारात् । आन्तरालिकस्योभयत्रसाम्याच्च ।

न द्वितीयः । व्यापारत्वस्य दुर्निरूपत्वात् । कथञ्चिन्निरूपणीयत्वेऽपि तज्जन्यत्वे सति तज्जन्यजनकत्वं आन्तारालिकं वा तत्, नान्यत् । तदुभयं मनःसंयोगादावतिव्याप्तम् । न तृतीयः । दार्वादिकर्मण्यतिव्याप्तेः (?) ।

२ निराकरणम्

अत्रोच्यते । क्रियाविशेषं प्रति कारकविशेषत्वमिन्द्रियत्वम् । इदं च ज्ञानकर्मेन्द्रियसाधारणम् । ज्ञानवचनक्रियादौ च धात्वर्थरूपक्रियात्वसङ्गावात् ।

एवं तर्हि छिदाया अपि धात्वर्थरूपक्रियार्थसङ्गावेन तत्करणे कुठारादावतिव्याप्तिः स्यादिति चेन्न । अनिन्द्रियजन्यक्रियाव्यावृत्तेन्द्रियजन्यक्रियानुवृत्तधर्मविशेषवत्त्वस्य क्रियाविशेषपदेन विवक्षितत्वात् । एवं कुठारादिव्यावृत्तेन्द्रियमात्रगतधर्मविशेषवत्वस्यैव कारकविशेषपदेन विवक्षितत्वात् । एवमेव 'प्रमाकरणं प्रमाणम्' इत्यादौ क्रियाविशेषः कारकविशेषश्च विवक्षणीयः । अन्यथा तत्राप्युक्तरीत्या ईश्वरप्रमायाः योगिप्रमायाश्च प्रमाशब्देन ग्रहणे तत्र चक्षुषः करणत्वाभावात्, प्रमात्रादेश्च करणशब्देन ग्रहणे प्रमाणसामा न्यलक्षणमिदमनुपपन्नं स्यादिति ईश्वरप्रमादिव्यावृत्तः दोषजन्यभ्रमव्यावृत्तः धर्मविशेषः प्रमापदेन दुष्टेन्द्रियाप्रमाणादिव्यावृत्तधर्मविशेषः

---

[७] ?

[८] ?

करणपदेन विवक्षित इत्येव वक्तव्यम् । तस्मादुक्तमेवेन्द्रियसामान्यलक्षणमनवद्यम् ।

३ परोक्तलक्षणनिराकरणम्

शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं इत्यन्ये मन्यन्ते । ते वैदिकाभासाः इत्युपेक्षणीयाः । 'कर्मेन्द्रियाणि संयम्य'[९] 'बुद्धिर्मनः खानि दश'[१०] इत्यादिवैदिकवचनै ...[११]दादेरपीदीन्द्रियत्वावगमेन तत्राव्याप्तेः । किञ्च स्वसङ्केतमात्रेण लक्षणकथनायोगाच्च । किञ्च, वक्रदण्डेतरदण्डानाश्रयाद ...[१२] यथा पर्यवस्यति, तथा शब्दाश्रयत्वमादायेदं लक्ष्णं पर्यवस्यतीति चक्षुरादावव्याप्तिः शब्देतरपदवैय्यर्थ्यं च । तच्चाग्रे वक्ष्यते ।

मन्मते तु वचनादिक्रियासाधनत्वाद्वागादौ लक्षणसमन्वयः । चक्षुरादौ च दर्शनादिरेव क्रियेति तत्साधनत्वाल्लक्षणसमन्वयः । मानसावलोकनलक्षणध्यानस्य ज्ञानरूपस्य 'क्रियामानसवत्'[१३] इति सूत्रकृतैव क्रियारूपत्वमुक्तमिति न कश्चित् क्षुद्रोपद्रवः ।

४ विभागः

इन्द्रियं पुनर्द्विविधम् । ज्ञानेन्द्रियं कर्मेन्द्रियं चेति । तत्र ज्ञानसाधनमिन्द्रियं ज्ञानेन्द्रियम् । तद्विविधम् । स्वरूपेन्द्रियं बाह्येन्द्रियं चेति । तत्राद्यं स्वरूपेन्द्रियं साक्षीत्युच्यते । आत्मभिन्नमिन्द्रियं बाह्येन्द्रियम् । तत् सप्तविधम् । बुद्धिः-मनः-श्रोत्र-त्वक्-चक्षु-रसन-घ्राण-भेदात् । कर्मसाधनमिन्द्रियं कर्मेन्द्रियम् । तत् पञ्चविधम् । वाक्-पाणि-पाद-पायु-उपस्थभेदात् ।

५ स्वरूपेन्द्रियनिराकरणपरः पूर्वपक्षः

नन्वात्मस्वरूपस्य ज्ञानेन्द्रियत्वमयुक्तम् । तत्साध्यज्ञानस्वरूपस्यानिरूपणात् । तथा हि । किं तज्ज्ञानमात्मस्वरूपम्? उत ततोऽतिरिक्तम्? नाद्यः । आत्मनोऽनादित्वेन तत्स्वरूपज्ञानस्य साध्यत्वायोगात् । किञ्च, ज्ञानस्य सविषयकत्वनैयत्येन किमात्मैव तद्विषयः? उतान्यत् किञ्चित्? नाद्यः । स्ववृत्तिविरोधात् । द्वितीये,

---

[९]गीता ३-६
[१०]तत्त्वसङ्ख्याने-९
[११]५ अक्षराणि तृटितानि
[१२]१४ अक्षराणि तृटितानि व.दत्युक्तावक्रदण्डा... य(?)
[१३]ब्रह्मसूत्रम् ३-३-४६

आन्तरं सुखादि? उत बाह्यं रूपादि? नाद्यः । सुखदुःखादेर्मानसत्वात् । अन्यथा मनोऽङ्गीकारवैय्यर्थ्यापत्तेः । न द्वितीयः । रूपादेश्चाक्षुषत्वात् । अन्यथा चक्षुराद्यङ्गीकारवैय्यर्थ्यापत्तेः । न द्वितीयः । गौरवात् । उक्तरीत्या विषयाभावेन ज्ञानत्वानुपपत्तेश्च ।

अस्तु वाऽऽत्मविषयकम्, अन्यविषयकम्, स्वरूपम्, बाह्यं वा, यत्किञ्चिज्ज्ञानम् । तथाऽपि तत्कर्तुरात्मन इन्द्रियत्वानुपपत्तिः । क्रियायाः कर्तृजन्यत्वनैयत्येनान्यस्य तदयोगेनात्मन एव कर्तृत्वात् । नहि कर्तैव साधनमिति युज्यते । अनुभवस्यानुभाव्यसापेक्षत्वेनान्यस्याभावादात्मैवानुभाव्यो वाच्यः । तथा चैकस्यात्मनोऽनुभवितृत्वानुभाव्यमानत्वादीनां विरुद्धानामङ्गीकारापत्तिश्च । चक्षुरादीनामिन्द्रियत्वे रूपाद्यसङ्कीर्णविषयदर्शनवदात्मन इन्द्रियत्वे तददर्शनाच्च ।

अत्रैते प्रयोगाः । 'आत्मा न ज्ञानम्, कर्तृत्वात्, अक्रियात्वात्, क्रियाश्रयत्वाच्च', 'ज्ञानं नात्मा, अज्ञातृत्वात्, क्रियात्वात्, क्रियानाश्रयत्वाच्च', 'आत्मा नेन्द्रियम्, कर्तृत्वात्, कर्मत्वाच्च' 'इन्द्रियं नात्मा, ज्ञानसाधनत्वात्' इति । अत्र सर्वत्र विरुद्धक्रियात्वापत्तिः दृष्टविरोधश्चेति बाधकतर्कः ।

६ निराकरणम्

अत्रोच्यते । 'अहम्' इत्याकारकं ज्ञानमात्मस्वरूपम् । तद्विषयमात्मस्वरूपभूतसाक्षीन्द्रियसाध्यं च । न च स्ववृत्तिविरोधः । प्रमेयत्वे प्रमेयत्ववदुपपत्तेः । न च नित्यत्वेन जन्यत्वानुपपत्तिः । प्रागनभिव्यक्तस्य सतोऽपि वस्तुनः कादाचित्काभिव्यक्तियोगेन जन्यत्वव्यवहारस्य कूपखननाभिव्यक्तजलादौ कूपखननजन्यत्वव्यवहारस्येवोपपत्तेः । 'आत्मानमात्मना वेत्सि'[१४] 'मामहं जानामि' इत्यबाधितप्रत्ययेन करणत्वकर्मत्वकर्तृत्वादीनां मिथो भेदस्यौत्सर्गिकत्वेऽपि बाधोपपत्तेः । अन्यथा, उत्सर्गापवादौ क्वापि न स्याताम् ।

सुखादिविषयकं 'अहं सुखी, दुःखी, इच्छाप्रयत्नज्ञानादिमान्' इत्याकारकं वा साक्षिसाध्यमस्तु । न च मनसैव तज्ज्ञानोपपतिः । जाग्रत्स्वप्नयोः कथञ्चित् तत्साध्यत्वशङ्कावकाशेऽपि सर्वेन्द्रियोपरमावस्थायां सुषुप्तौ तदनवकाशात् । न ह्युपरतमनसि तत्कार्यं शङ्कार्हम् ।

न च सुषुप्तौ सुखादिज्ञानमेव नास्तीति वाच्यम् । 'एतावन्तं कालं सुखमहमस्वाप्सम्' इत्याद्यनन्तरकालीनायाः स्मृतेः सुषुप्त्युत्थानक्षणाव्यवहितक्षण एवोत्पन्नाया

[१४] ?

अनुपपत्तेः । न हि पूर्वानुभवं विना स्मृतिरुत्पद्यते । तस्याः संस्कारजन्यत्वनियमात् । तस्य चानुभवजन्यत्वनियमात् । अनुभवश्चान्यदाऽसम्भवात् सुषुप्तिकालीन एव । किं बहुना? सुषुप्तौ करप्रसारणादिसमये कुड्याद्यवष्टम्भे तदन्यदेशे करं प्रसारयति । न हि तदन्यदेशस्याज्ञाने आकाशात्मकप्रदेशे करं प्रसारयेत् । अतः सुषुप्तौ अव्याकृताकाशरूपप्रदेशविशेषोऽनुभूयते । एवं कालः सुषुप्त्यवस्थाऽज्ञानं च सुषुप्तादावनुभूयते । 'एतावन्तं कालं सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इत्युत्तरकालीनानुस्मरणात् । ज्ञानतद्धर्मप्रामाण्यादीनां चान्यवेद्यत्वेऽसत्वापातात् साक्षिवेद्यत्वम् ।

ननु सुखस्य मनःपरिणामरूपत्वेन तदुपरतिसमये सुषुप्तौ कथमुत्पत्तिः? न ह्युपादानं विनोपादेयमुत्पत्तुमर्हति । न ह्यनुत्पन्नं सुखं साक्षिग्राह्यम् । साक्षिणोऽप्रामाण्यप्रसङ्गात् । तेन सुषुप्तौ न सुखं नापि तज्ज्ञानमिति चेत् । सत्यम् । मनःपरिणामसुखस्याभावेऽपि स्वरूपसुखमस्त्येव । तत् साक्षिग्राह्यम् । नन्वेवं जाग्रदादावपि सर्वस्मिन् काले साक्षिणा सुखप्रत्ययापत्तिः । ज्ञातृज्ञेयज्ञापकानां चैतन्यात्मकत्वेन सर्वदा सत्वादिति चेत् । घटव्यञ्जकालोकाभावेनान्धकारे घटाद्युपलब्ध्यभाववज्जाग्रदवस्थायां स्वरूपसुखाभिव्यञ्जकप्रापत्ति (प्रत्यासत्ति?) संयोगस्याभावेन तदा स्वरूपसुखोपलब्ध्यभाव उपपद्यते ।

अस्तु तर्हि स्वरूपसुखमेव साक्षिवेद्यम् । न वृत्तिरूपं सुखम् । तन्मनोवेद्यमस्त्विति चेत् । सुषुप्तौ सुखादिप्रतीत्यन्यथानुपपत्त्या चैतन्यस्येन्द्रियत्वे सिद्धे साक्षित्वेन स्वरूपसुखत्वेन ग्राह्यग्राहकभावे कल्पनीये 'यद्विशेषयोः कार्यकारणभावः विना बाधकं तत्सामान्ययोरपि' इति न्यायेन साक्षित्वेन, आन्तरपदार्थत्वेन ग्राह्यग्राहकभावः कल्प्यते । न च सुखादिज्ञानस्य मनोन्वयव्यतिरेकानुविधानविरोधः । सुखाद्युत्पत्त्याऽन्यथा सिद्धत्वात् । मनो हि सुखाद्युपादानकारणम् । न ह्युपादानं विनोपादेयमुत्पत्तुमर्हति । तदन्वयव्यतिरेकानुविधानं सुखाद्युत्पत्तेरेव मनःकार्यतां प्रापयति । न तु तज्ज्ञप्तेरपि । गौरवात् ।

तथा च इन्द्रियानपेक्षप्रतीतिकत्वं साक्षिग्राह्यतावच्छेदकम् । यथा महत्वसमानाधिकरणोद्भूतरूपवत्वं चक्षुर्ग्राह्यतावच्छेदकम् । गोलकं चास्य 'हृदि ह्येष आत्मा'[१५] इति श्रुतेर्दृश्यम् । यथा चक्षुषः अक्षिगोळकं प्राज्ञमूर्तिसंयोगादिः सहकारी, यथा चक्षुषा चाक्षुषे जननीये आलोकसंयोगादिः, एवमिन्द्रियत्वसाम्येऽपि साक्षिणोऽनिन्द्रियत्वाभ्युपगमः कर्तृत्वकर्मत्वादीनां भेदभ्रमनिबन्धनः ।

---

[१५] षट्प्रश्नोपनिषदि ३-६

न च मनोङ्गीकारवैय्यर्थ्यम् । सुखादीनामुपादानसिद्ध्यर्थत्वात् । न च तस्येन्द्रियत्वानुपपत्तिः, उक्तरीत्या सुखादिज्ञानसाधनत्वाभावेन ज्ञानेन्द्रियत्वायोगात् इति वाच्यम् । स्मृतिरूपज्ञानं प्रति तस्य हेतुत्वोपपत्तेः । एतच्चाग्रे स्पष्टयिष्यते ।

अत एव 'आत्मा न ज्ञानं' इत्यादिप्रयोगाः विपक्षे बाधकाभावेन निरस्ताः । 'आत्मानमात्मना वेत्सि' इत्यबाधितप्रत्ययबलेन कर्तृत्वकर्मत्वादेरैकाधिकरण्यप्रतीतेः, एकस्य कर्तृत्वकर्मत्वाद्यापादनतर्कस्याभासत्वात् । तस्मात् साक्षिण इन्द्रियत्वम् । तस्य च नित्यत्वान्नोत्पत्तिर्न विनाशश्च ।

७ बुद्ध्यादीनामुत्पत्तिः

बुद्ध्यादीन्द्रियाणि तु, अहङ्कारजन्यत्वादुत्पादविनाशवन्ति । तथा हि । अहङ्कारस्त्रिविधः । वैकारिकतैजसतामसभेदात् । बुद्धिमनःपरमाणुभ्यां सह वैकारिकभागौ बुद्धिमनसी श्रोत्रादिपरमाणुभिः सह तैजसभागाः श्रोत्रादीन्द्रियाणि उत्पादयन्ति । 'स्पर्शान्तभावतः कर्मखानां'(?)[१६] इत्यादिना वागादीन्द्रियाणां त्वगिन्द्रियान्तर्भावोक्तेः । वागादिपरमाणुभिः सह तैजसभागा वागादिपञ्चेन्द्रियाण्युत्पादयन्ति ।

६ इन्द्रियविवेके बुद्धिविवेकः

तत्रादौ बुद्धिर्निरूप्यते । निश्चयरूपज्ञानसाधनं बुद्धिः । नच चक्षुरादेः 'अयं घटः' इत्याद्यनुभवरूपनिश्चयं प्रति मनसश्च 'स देवदत्तः' इत्यादिस्मृतिरूपनिश्चयं प्रति हेतुत्वात् तत्रातिव्याप्तिः । निश्चयत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वस्य विवक्षितत्वात् । चक्षुरादौ तदभावात् । नहि तत्र निश्चयत्वे चक्षुरादित्वेन कार्यकारणाभावः शक्यनिरूपणः । अनुमित्यादिरूपनिश्चयं प्रति चक्षुरादेः कारणत्वाभावात् । बुद्धौ तु निश्चयत्वावच्छिन्ननिश्चयसामान्यं प्रति कारणताऽस्त्येव । बुद्धित्वेन निश्चयत्वेन कार्यकारणभावेऽतिप्रसङ्गाभावात् । तथा च, चक्षुस्त्वेन चाक्षुषनिश्चयत्वेन श्रोत्रत्वेन श्रावणनिश्चयत्वेनैवेत्यादि तत्तत्कार्यकारणभावनियम इति न निश्चयत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं चक्षुरादावपीति नातिप्रसङ्गः ।

नच बुद्धिसूक्ष्मभागरूपायाः प्रकृतेर्निश्चयसाधनत्वाभावादव्याप्तिः । निश्चयरूपफलोपधानाभावेऽपि तत्स्वरूपयोग्यतायाः सहजशक्तेः सद्भावेन तत्रापि तत्साधनत्वोपपत्तेः । अनुमतं त्वेतदन्येषामपि । अन्यथा कोमलदण्डस्याकारणत्वापत्त्या दण्डत्वस्य कारणतातिरिक्तवृतितयाऽवच्छेदकत्वं न स्यात् । सहजशक्तिसद्भावे कार्यानुत्पादः

[१६] ?

कथम्? इति चेत् । सूक्ष्मभागस्य तदोपचयाभावादिति ब्रूमः । उपचित एव हि भागो दृढो भवति । नहि कोमलदण्डः दार्ढ्याभावात् कार्यमजनयन् तज्जनकशक्तिविधुरो भवति । शक्तेरागन्तुकत्वप्रसङ्गात् । एवमधस्तादुपरिष्टाच्च शङ्कापरिहारोऽवसेयः ।

नच बुद्धेरिन्द्रियत्वे चक्षुरादेरिव प्रत्यासत्त्या गोलकेन च भवितव्यमिति वाच्यम् । बुद्धेर्विमर्शः प्रत्यासत्तिः । 'आत्मनाड्यं तथा बुद्धिः तत्र संस्थो बृहस्पतिः'[१७] इति वचनेनात्मनाड्येव गोलकमिति । **इति बुद्धिविवेकः** ।

७ इन्द्रियविवेके मनोविवेकः

१ लक्षणम्

स्मरणसाधनं मनः । स्मरणं च 'अमुमर्थं स्मरामि' इत्यनुभवसिद्धम् । तत्साधनत्वं च मनसोऽन्वयव्यतिरेकानुविधानानुमेयम् । तत्र स्मरणपदेन कुठारादिव्यावृत्तिः । साधनपदेनासम्भवव्यावृत्तिः । असाधारणकारणत्वरूपसाधनत्वघटकासाधारणत्वग्रहणेन कालादृष्टादिसाधारणकारणव्यावृत्तिः ।

नन्वथापीदं लक्षणमसम्भवि । मनसोऽन्तरिन्द्रियत्वेन, आन्तरपदार्थग्रहणसामर्थ्येऽपि गङ्गादिबहिःपदार्थग्रहणसामर्थ्याभावादिति चेत् । सत्यम् । मनोऽन्तरिन्द्रियत्वादान्तरपदार्थग्रहणे शक्तिमदपि पूर्वानुभवजनितसंस्कारूपसहकारिसामर्थ्येन बाह्यार्थग्रहणशक्त्याविर्भावात् । यथा वर्तमानार्थग्रहणे स्वाभाविकशक्तिमदपि चक्षुः संस्काररूपसहकारिसामर्थ्येन सोऽयं देवदत्त इत्यतीतार्थग्राहकशक्त्याविर्भाववत् । अन्यथा 'घटज्ञानवानहम्' इत्यनुव्यवसाये व्यवसितस्य बाह्यार्थस्य घटादेः मनसा ग्रहणं न स्यात् । तत्र प्रत्यासत्तिसामर्थ्याद्बाह्यार्थग्रहणमुपपन्नं चेत्, इहापि संस्काररूपसहकारिसामर्थ्येन तदुपपन्नमस्तु ।

नन्वनुभवसंस्कारस्मृतीनां समानाधिकरणानां समानविषयाणामेव कार्यकारणभावः । अन्यथा देवदत्तनिष्टेन घटानुभवेन यज्ञदत्ते संस्कारोत्पत्तिः, तन्निष्टेन संस्कारेण डित्थे स्मृत्युत्पत्तिश्च स्यात् । तथा, देवदत्ते घटानुभवेन तत्रैव पटविषयकसंस्कारः, कुड्यविषयकः स्मृतिः स्यात् । तथा च गङ्गादिरूपबाह्यार्थविषयकानुभवेन गङ्गादिविषयकसंस्कारोत्पत्तिः, तद्विषयकस्मृत्युत्पत्तिश्च । 'इयं गङ्गा' इति पूर्वानुभवेनेदन्ताविशिष्टगङ्गास्वरूपस्योल्लेखितत्वेन तद्विषय एव संस्कारः, स्मृतिश्च स्यात् । नतु तत्ताविषयिणी । तस्या अनुभवाविषयत्वात् तज्जन्यसंस्काराविषयत्वाच्चेति चोद्यमु-

[१७] ?

क्तरीत्या सहकारिसामर्थ्याच्छक्त्यन्तराविर्भावस्य वेत्रबीजादौ दर्शनेन चेहापि संस्कार-रूपप्रत्यासत्तिसामर्थ्येन शक्त्यन्तराविर्भावेन पूर्वाननुभूततत्ताग्रहणं युक्तमिति दत्तोत्तरम् । समानविषयाणामेव कार्यकारणभाव इति नियमश्चौत्सर्गिकः ।

२ स्मृतिलक्षणम्

ननु किमिदं स्मृतित्वम्, यत्साधनं मनः? किं ज्ञानजन्यज्ञानत्वम्? अनित्यज्ञा-नजन्यज्ञानत्वम्? अनित्यविशिष्टज्ञानजन्यज्ञानत्वम्? समानविषयकानित्यविशिष्ट-ज्ञानजन्यज्ञानत्वम्? समानविषयकस्वसमानाधिकरणत्वेनानित्यज्ञानविशेषणेनैतदेव वा?

नाद्यः । अनुभवस्येश्वरज्ञानजन्यत्वेनातिव्याप्तिः । न द्वितीयः । 'दण्डी' इति विशिष्टानुभवस्यानित्यदण्डज्ञानरूपविशेषणज्ञानजन्यत्वेनातिव्याप्तिः । न तृतीयः । अनुमितिरूपलिङ्गिविशिष्टानुभवे लिङ्गविशिष्टप्रत्यक्षजन्यत्वेनातिव्याप्तिः । न चतुर्थः । 'घटमानय' इति वाक्यश्रवणाच्छ्रोतरि शाब्दबोधो जायते । स च वाक्यप्रयोगज-न्यः । वाक्यप्रयोगस्तु 'अर्थं बुद्ध्वा वाक्यरचना' इति न्यायेन वक्तृनिष्टज्ञानेन जन्यत इति तावत्प्रत्यक्षसिद्धम् । तथा च श्रोतृगतघटकर्मकानयनक्रियाकसंसर्गधीसमान-विषयकवक्तृनिष्टविशिष्टज्ञानेन शब्दप्रयोगद्वारा जन्ये श्रोतृगतशब्दविशिष्टानुभवेऽति-व्याप्तिः । स्मरणस्य तत्तावगाहित्वेनानुभवाधिकविषयत्वेन स्वसमानविषयकानुभव-जन्यत्वासम्भवश्च । अत एव न पञ्चमः । देवदत्तसमवेते पूर्वानुभवसमानविषयके 'सोऽयं देवदत्तः' इत्यादिरूपे प्रत्यभिज्ञानेऽतिव्याप्तेश्च ।

अत्रोच्यते । संस्कारमात्ररूपावान्तरव्यापारजन्यत्वं स्मृतित्वम् । 'दण्डी' इत्या-दिविशिष्टानुभवे विशेषणज्ञानादेर्व्यापारत्वेऽपि संस्कारस्य तदभावात् । प्रत्यभिज्ञायां तत्तांशे संस्कारस्य व्यापारवेऽपि इदमंशे तदतिरिक्तस्य विषयेन्द्रियसंयोगादेः व्या-पारत्वान्नातिप्रसङ्गः ।

३ स्मृतिप्रामाण्यसमर्थनम्

अत्र केचित् स्मृतेः प्रामाण्ये विप्रतिपद्यन्ते । ते प्रष्टव्याः । किं कृप्तप्रमाणाभावात् स्मृतेः प्रामाण्यानभ्युपगमः? अनुमानाद्यजन्यत्वे सति असन्निकृष्टार्थग्राहित्वाद्वा? असदर्थोल्लेखित्वाद्वा? वृद्धव्यवहाराभावाद्वा? प्रवृत्तिविसंवादाद्वा?

नाद्यः । सुखादिप्रमायां करणत्वेन कृप्तस्य मनसः स्मृतिकारणत्वकल्पनात् । न च मनसो बहिरस्वातन्त्र्यान्नैवमिति वाच्यम् । अत एव हि संस्कारः प्रत्यासत्तिः क-

ल्प्यते । अत एव न द्वितीयः । संस्कारस्य प्रत्यासत्तित्वेनासन्निकृष्टार्थग्राहित्वासिद्धेः । न तृतीयः । असिद्धेः । स्मृतिर्हि तत्र तत्तांशमुल्लिखति । न च तत्तांशस्तत्र तदा नासीदिति । अत एव न चतुर्थः । अस्मदीयवृद्धैः स्मृतेः प्रमाणत्वेन व्यवहारात् । नापि पञ्चमः । न हि स्मृवा कमप्यर्थं ततः प्रवृत्तो न लभत इति शक्यते वक्तुम् । तदेवं स्मृतिः प्रमाणं तत्साधनं च मन इति सिद्धम् ।

तत्तु बाह्येन्द्रियाधिष्टानेनैव बाह्यज्ञानमात्रे कारणम् । न तु स्वातन्त्र्येण । स्मृतिं प्रति तु स्वातन्त्र्येणैव कारणमिति विवेकः ।

४ लक्षणान्तरम्

यद्वा वासनोपादानत्वं मनसो लक्षणम् । वासना नाम अनुभवनिमित्तकः संस्कार-विशेषः । स च मन उपादानीकृत्य जायत इति लक्षणसमन्वयः । एतेन मनसि विप्रतिपद्यमानाः वादिनो निरस्ताः ।

५ वासनासमर्थनम्

अस्ति तावत् स्मृतिः । तथा हि । अद्यजातशिशोः तावत् स्तन्यपानादौ प्रवृत्तिरनु-भवसिद्धा । सा च प्रवृत्तित्वादिष्टसाधनताज्ञानसाध्या । तच्चेदानीमनुभवकारणाभावेन नानुभवरूपम् । किन्तु स्मृतिरूपं तद्वाच्यम् ।

किञ्च, अस्ति तावद्देहापत्यकलत्रादौ शोभनत्वारोपरूपः सम्बन्धः(बन्धः?) । न(स?) च अनुभवरूप इदानीं बन्धकः । श्रुतिशास्त्रस्य श्रवणादिजनिताशोभनत्वा-द्यनुभवे विशेषदर्शने जाग्रति शोभनत्वानुभवरूपभ्रमायोगात् । न च 'पीतः शङ्खः' इत्यादिवद्विशेषदर्शनाप्रतिबद्धगो भ्रमो भविष्यतीति वाच्यम् । तस्यैव पुंसः शास्त्रे पटुतरमभ्यस्यमाने शोभनत्वभ्रमनिवृत्तिदर्शनात् । ...[१८]लादागततत्तदनुभवजनित-शोभनत्वस्मृतिरूप एव बन्धो वाच्यः । स्मृतिश्च बहुकालानुवृत्ततया प्रबलेति नेदानीं सकृज्जातानुभवेन प्रतिबध्यत इति त्यक्तलज्जैरनुमन्तव्यम् । अत एव गीतायामपि 'पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः'[१९] इत्युक्तम् । अत एव प्रबलतरेण पुर्वजन्मन्येतज्जन्मनि वा बहुवारं शास्त्रोपोद्बलितसंस्कारेण वा तज्जन्यस्मृत्या वा तत्सहितानुभवेन वा बहुश्रुतस्य विषयेषु शोभनत्वारोपनिवृत्तिः । शोभनत्वाशो-भनत्वस्मृत्योरेकजातीयत्वेऽपि सद्वासनादुपासनोपोद्बलितत्वतदभावाभ्यां विहगान्त-

[१८] ४ अक्षराणि तृटितानि
[१९] गीता ६-४४

रसहकृतत्वतदभावाभ्यां श्येनयोरिव परस्परबाध्यबाधकभावः सिद्धः । तथा चैवं प्रमाणद्वयेन स्मृतौ सिद्धायां तदुपादानत्वेन वासनासिद्धिः ।

किञ्च, स्वाप्नाः पदार्थाः सत्या एव । तेषामुपादानगवेषणेऽन्यस्याभावाद्वासना सिध्यति ।

६ स्वाप्नस्य मिथ्यात्वमिति पूर्वपक्षः

अत्र केचिदान्तरवेदविद्वेषिणो ब्रुवन्ते । स्वाप्नस्य गजादेः केवलाविद्याविलसितत्वेन शुक्तिरूप्यादेरिव वस्तुत्वमेव दूरोत्सारितम् । तथा हि । स्वाप्नाः न सत्याः । निमित्तोपादानदेशकालादृष्टादिसम्पत्त्यभावात् । कार्यस्य वस्तुनो हि निमित्तं कर्ता कालादृष्टादि च । न तावदत्र कर्तृसम्पत्तिरस्ति । कर्ता जीवः? ईश्वरो वा? नाद्यः । तस्य स्वप्नावस्थायामज्ञानावृतत्वेनोपादानगोचरापरोक्षज्ञानाद्यसम्भवात् । न द्वितीयः । तत्स्वरूपस्यैव भावात् युगपत् सर्वपदार्थसृष्टिः स्यात् । अत एव कालादृष्टादिकं न निमित्तकारणम् । नाप्युपादानकारणसम्पत्तिः । स्वाप्नगजादेरुपादानस्य मृदादेरिव गजाद्युत्पत्तेः पूर्वं पश्चाच्चादर्शनात् । वासना नाम किञ्चिदलौकिकमुपादानं भवष्यतीति चेन्न । वासनास्वरूपस्याभावात् । भावे वा सर्वदा स्वाप्नगजादिसृष्टिप्रसङ्गः ।

नापि तेषामुत्पत्तिदेशः घटादीनां भूतलमिव निर्वक्तुं श्क्यः । न तावद्देहाद्बहिर्देशः । देहान्तरावस्थितेनोपरतकरणेन जीवेन तद्दर्शनासम्भवात् । पार्श्वस्थेनान्येन जीवेनोपलम्भप्रसङ्गाच्च । नाप्यन्तः सूक्ष्मं कण्ठस्थानम् । स्तूलतमस्य गजादेरल्पे कण्ठदेश उत्पत्त्यसम्भवात् । हृदयविदारणादिप्रसङ्गाच्च । नापि तेषामुत्पत्तिकालो निर्वक्तुं शक्यः । न तावद्वसन्तकालस्तेषाम् । हेमन्ते सुप्तस्य वसन्तादिदर्शनाभावप्रसङ्गात् । न च हेमन्ते वसन्तस्योत्पत्तिः । एवं ग्रीष्मादिकालोऽपि निराकरणीयः । नापि तेषां द्रष्टा निर्वक्तुं श्क्यः । न तावदीश्वरो द्रष्टा । गजादिदर्शनेन भयकम्पादिदर्शनविरोधात् । नापि जीवः । उपरतकरणत्वात् । अत एव न तज्ज्ञानसम्पत्तिः । न तावच्चक्षुरादिबाह्येन्द्रियेण गजादिप्रतीतिः । उपरतत्वात् । नापि मनसः । गजादिबाह्यार्थग्रहणे सामर्थ्याभावात् ।

तदेवं दुर्घटत्वात् स्वप्नगजादेर्न सत्यत्वं किन्तु मायिकत्वमेव । न च मायिकत्वेऽप्युक्तरीत्या दुर्घटत्वमाशङ्कनीयम् । दुर्घटत्वस्य मायिकत्वानुकूलत्वात् । तदुक्तं -

'दुर्घटत्वं च मिथ्यात्वे भूषणं न तु दूषणम् ।

कथञ्चिद्घटमानत्वेऽविद्यात्वं व्याहतं भवेत् ॥'[२०]

७ स्वाप्नसत्यत्वसमर्थनम्

अत्रोच्यते । स्वप्नगजादेरीश्वरः कालादृष्टादिकं च निमित्तम् । न च तदसिद्धिः । 'स हि सर्वस्य कर्ता' इत्यादिश्रुतेः । न च युगपत् सर्वस्वाप्नसृष्टिप्रसङ्गः । कालादृष्टादिसहकार्यन्तराभावात् । कालादेश्च स्वत एव विशेषवत्वात् । स चेश्वरः विचित्रशक्तित्वात् स्वत एव विशेषतः कालादीन् निमित्तीकृत्य क्रमेण विद्युदादीनि स्वाप्नगजादीन् क्षिप्रमुत्पादयति, क्षिप्रं विनाशयति चेति न सर्वदोपलब्धिः । उपादानं च तेषां वासनैव । न च तदभावः शङ्कनीयः । स्मृत्यादिलिङ्गेन तत्सद्भावस्य प्रागेव साधितत्वात् ।

अत एव पूर्वं पश्चाच्च तदवयवानामुपलम्भप्रसङ्गो निरस्तः । घटाद्यवयवनां मृदादीनामिव स्थूलत्वाभावात् । न हि वासनामयगजाद्यवयवाः स्थूलाः । यस्मिन् कालेऽयं जीवः स्वाप्नान् पश्यति, स एव तेषामुत्पत्तिकालः । न च स्वाप्नसृष्टवसन्तकालस्य हेमन्तकाल उत्पत्त्यसम्भवः शङ्कनीयः । प्राकृतत्वाप्राकृतत्वाभ्यामविरोधात् । न हि प्राकृते हेमन्तकाले वासनामयस्य वसन्तकालस्योत्पतौ बाधकमस्ति । द्रष्टा चैषां जीव एव । बाह्यकरणानामुपरतत्वेऽपि, अन्तःकरणस्य मनसस्तदभावान्न किञ्चिदुर्घटम् । अत एव ज्ञानसम्पत्तिरपि सुघटा । मनसः प्राकृतबाह्यार्थग्रहणसामर्थ्याभावेऽपि, अन्तःसृष्टवासनामयगजादिग्रहणे सामर्थ्यसम्भवात् ।

तस्मात् सत्या एव स्वाप्नाः । तेषां चोपादानं वासनैवेति वासना सिद्ध्यति । तस्याश्चोपादानं मन एव प्रसिद्धमिति वासनोपादानत्वलक्षणस्य लक्ष्ये मनसि समन्वयः ।

८ मनसा सुखादेर्संयुक्तसमवेतत्वनिराकरणम्

अन्ये तु सुखाद्युपलब्धिसाधनमिन्द्रियं मनः तत्वं मनोयुक्तात्मनि सुखादेः समवेतत्वेन संयुक्तसमवायसम्बधेन मनसा 'अहं सुखी, दुःखी' इत्यादिप्रत्ययोत्पत्तेर्घटनीयमित्याहुः । तन्न । सुखदुःखादेर्मनःपरिणतत्वेनात्मसमवेतत्वाभावात् । समवायस्य वक्ष्यमाणरीत्या निराकरणाच्च । 'स देवदत्तः' इत्यादिस्मृतिजनने मनसः संस्कारस्य प्रत्यासत्तित्वेन क्लृप्ततया संयुक्तसमवायस्य तदयोगाच्च । इहापि संस्कारस्य प्रत्यासत्तित्वे 'अहं सुखी' इत्याद्यनुभस्य स्मृतित्वं च स्यात् । संस्कारजन्यज्ञानस्य

[२०] ?

स्मृतित्वनियमात् । अनुभवत्वानुपपत्तिश्च ।

केन तर्हि 'अहं सुखी, दुःखी' इत्यादिप्रत्ययः? इति चेत् । साक्षिणेति ब्रूमः । तत्स्वरूपगोलकप्रत्यासत्तिग्राह्यतावच्छेदकादेः साक्षिविवेके प्रपञ्चेन निरूपितत्वात् न कश्चित् क्षुद्रोपद्रवः ।

९ विभागः

तदपि मनः नित्यानित्यभेदेन द्विविधम् । शेषं पूर्ववत् । **इति मनोविवेकः** ।

८ इन्द्रियविवेके श्रोत्रविवेकः

१ लक्षणम्

शब्दोपलब्धिसाधनं श्रोत्रम् । शब्दो द्विविधः । वर्णात्मकः ध्वन्यात्मकश्चेति । तत्राद्योऽनादिर्नित्यः । द्वितीयः सादिरनित्यः । सोऽपि द्विविधः । द्रव्यात्मकः, गुणात्मकश्चेति । तत्र द्रव्यात्मकः शब्दतन्मात्रासञ्ज्ञितः, आकाशस्योपादानम् । तस्य द्रव्यत्वं भौतिकप्रक्रियायां कारणप्रकरणे बहुभिः प्रमाणैः साधयिष्यते । द्वितीयो गुणात्मकः । 'विमतः शब्दो गुणः अनुपादानत्वात्' इति तस्य गुणत्वसिद्धिः । आकाशद्वैविध्यं श्रोत्रस्याकाशात्मकत्वं चाग्रे वक्ष्यते । तथा च वर्णात्मकः शब्दोऽव्याकृताकाशाश्रितः । शब्दतन्मात्रात्मकः शब्दः गुणात्मकशब्दश्च भूताकाशाश्रितः ।

एवं विविधेषु शब्देषु मध्ये वर्णात्मकः गुणात्मकश्च श्रोत्रेण गृह्यते । तद्ग्रहणप्रकारश्चाग्रे वक्ष्यते । मात्रात्मकशब्दस्तु वाय्वादिवदतीन्द्रियः । तद्ग्राह्यतावच्छेदकस्योद्भूतशब्दत्वादेरभावात् । कथं तर्हि तज्ज्ञानम्? इति चेत् । उक्तागमैरिति ब्रूमः ।

तथा च श्रोत्रेन्द्रियं व्यङ्ग्यव्यञ्जकभावमापन्नमुभयविधशब्दं गृह्णाति । महत्वसमानाधिकरणोद्भूतशब्दत्वं तद्ग्राह्यतावच्छेदकम् । प्रत्यक्षताप्रयोजकधर्मविशेषो महत्वम् । प्रत्यक्षग्रहणयोग्यत्वं जातिविशेषो वा उद्भूतत्वम् । तदुभयं च फलबलात् कल्प्यम् । आकाशीयपरमाणुगतशब्दव्युदासाय 'महत्वे सति' इति विशेषणम् । श्रोत्रेन्द्रियगतशब्दस्य मात्रागतशब्दस्य च व्युदासाय उद्भूतविशेषणम्

२ श्रोत्रस्याकाशीयत्वसमर्थनम्

श्रोत्रमाकाशीयम् । अधिकाकाशभागित्वात् ।

ननु तैजसाहङ्कारजन्यमिन्द्रियं तन्मात्राभिः तामसाहङ्कारैश्च सहितं भूतकारणम्

। तेन श्रोत्रेन्द्रियभागस्य 'कार्येषु कारणं व्याप्तम्' इति न्यायेन स्वकार्येऽनुस्यूति सम्भवेन तस्य श्रोत्रात्मकत्वसम्भवेऽपि आकाशस्य श्रोत्रकारणत्वाभावेन तत्र तद्भाग-प्रसक्त्यभावे, तद्भागाधिक्यस्य सुतरामभावेन कथं तेन श्रोत्रस्याकाशीयत्वानुमानम्? इति चेत् । सत्यम् । सूक्ष्माणामिन्द्रियादीनामयं सृष्टिक्रमः । तथापि सूक्ष्मरूपेण भूत-कारणानामप्युपचयाधिक्यसिद्धये भूतकार्यत्वमप्यस्ति । 'तेषां भूतैरुपचयः सृष्टिकाले विधीयते'[२१] इति वचनात् । भौतिकैर्दध्यादिभिरिन्द्रियपुष्ट्यनुभवाच्च । तथा च कार्ये कारणभागसद्भावात् तदाधिक्यं च श्रोत्रे सम्भवतीति किमनुपपन्नम्? एवमग्रेऽपि ।

९ इन्द्रियविवेके त्वगादिविवेकः

स्पर्शोपलब्धिसाधनं त्वक् । रूपोपलब्धिसाधनं चक्षुः । रसोपलब्धिसाधनं रस-नम् । गन्धोपलब्धिसाधनं घ्राणम् । महत्वसमानाधिकरणोद्भूतस्पर्शसामान्यगुणत-दाश्रयरूपवद्द्रव्यान्यतरत्वं महत्वसमानाधिकरणोद्भूतरूपसामान्यगुणतदाश्रयद्रव्यान्य-तरत्वं महत्वसमानाधिकरणोद्भूतरसत्वं महत्वसमानाधिकरणोद्भूतगन्धत्वं चेत्येतानि क्रमात् त्वगादिग्राह्यतावच्छेदकानि । तेषु च महत्वविशेषणेन वाय्वादिपरमाणुगत-स्पर्शादिव्यावृत्तिः । उद्भूतविशेषणेन त्वगादीन्द्रियव्यावृत्तिः ।

नन्वथापि पाषाणे गन्धोपलब्धिः कुतो न स्यात्? न च तत्र गन्ध एव नास्तीति वाच्यम् । पाषाणभस्मनि गन्धाभावप्रसङ्गात् । तस्य ह्युपादानं पाषाणावयव एव । 'यो यद्ध्वंसजन्यः स तदुपादानोपादनकः, यथा दध्यादिः' इति नियमात् । तद्यदि तत्र पाषाणावयवे गन्धो न स्यात् । तर्हि तद्भस्मन्यपि गन्धो न स्यात् । एवं तस्मिन् गन्धे सिद्धे कार्यगुणानां स्वकार्ये गुण्यारम्भकत्वनियमेन पाषाणेऽपि गन्धसिद्धिः । उच्यते । उद्भूतपदेनैव तद्व्यावृत्तिः ।

त्वगादीनां वाव्व्याद्यात्मकत्वं तत्तद्भागादिक्येनोक्तरीत्याऽनुमेयम् ।

वचनक्रियासाधनत्वं वागिन्द्रियत्वम् । आदानादिक्रियासाधनं पाणिरित्यादि । प्रमाणं चात्र 'वाक् च'[२२] इत्याद्यागमः ।

तदेवं इन्द्रियाणि साक्षिणा सह त्रयोदश । 'द्वादशविधा वा इमे प्राणाः'[२३] इत्यादि त्वस्वरूपेन्द्रियविषयम् ।

---

२१ ?
२२ ?
२३ ?

१० मात्राविवेकः

१ लक्षणम्

इन्द्रियोपादेयं मात्रा । तथा हि । शब्दादिभिः पञ्चतन्मात्रापरमाणुभिः पञ्चविधैः सह श्रोत्रादीन्द्रियभागाः क्रमेण शब्दतन्मात्रादिपञ्चद्रव्याणि जनयन्ति । अथवा साक्षाङ्गूतोपादानं मात्रा ।

२ विभागः

तत् पञ्चविधम् । शब्द-स्पर्श-रूप-रस-गन्धभेधात् । अमीः शब्दादय उक्तरीत्या द्रव्यात्मकाः । शब्दतन्मात्रादिशब्दाभिदेयाश्च । न च कल्पनागौरवम् । उक्तप्रमाणप्रमितानां शब्दतन्मात्रादिसञ्ज्ञामात्रत्वात् । तस्येन्द्रियस्य भूतस्य वा मात्रा लेशः तन्मात्रा । शब्दश्चासौ तन्मात्रा च शब्दतन्मात्रेति निर्वचनसम्भवात् । एवं भूतमपि वक्ष्यमाणरीत्याऽऽकाशादिभेदेन पञ्चविधम् ।

३ तत्त्वानां क्रमेणोपादानत्वविवेचनम्

तथा च शब्दादितन्मात्रानामाकाशीयादिपरमाणुभिः सहाकाशाद्युपादानत्वमुद्देशक्रमप्रस्तावे प्राक् सूचितम्, इदानीं विविच्यते ।

अहङ्कारतत्वं वैकारिक-तैजस-तामसभेदेन त्रिविधम् । वैकारिकतैजसाभ्यां बुध्यादेः श्रोत्रादेश्चेन्द्रियस्योत्पत्तिरुक्ता । तत्र तामसाहङ्कारश्रोत्रेन्द्रियभागाभ्यां सहकृतः शब्दतन्मात्राशब्दितः शब्दभागः आकाशीयपरमाणुभिः सह भूताकाशात्मना, तामसाहङ्कारत्वगिन्द्रियभागाभ्यां सहकृतः रूपतन्मात्राशब्दितः रूपभागः तैजसपरमाणुभिश्च सह तेजआत्मना, तामसाहङ्काररसनेन्द्रियभागाभ्यां सहकृतः रसतन्मात्राशब्दितः रसभागः जलीयपरमाणुभिश्च सह जलात्मना, तामसाहङ्कारघ्राणेन्द्रियभागाभ्यां सहकृतः गन्धतन्मात्राशब्दितः गन्धभागः पार्थिवपरमाणुभिश्च सह पृथिव्यात्मना परिणमते ।

नन्वेवमहङ्कारतत्वादेस्तामसभागादिद्वारा भूतोपादानत्वं प्राप्तमिति तत्रातिव्याप्तिरिति चेन्न । साक्षाङ्गूतोपादानत्वं शब्दादेरेव प्राधान्येन । इतेरेषां तु सहभावमात्रं न प्राधान्यमिति । श्रुतिस्मृतीतिहासपुराणद्यैरुक्तयुक्तिभिश्च तथैवावगमात् ।

एवमाकाशोपादनत्वं शब्दतन्मात्रायाः विशेषलक्षणम् । वायूपादानत्वं स्पर्शतन्मात्राया इत्याद्यूह्यम् ।

४ उपादानविभागः

अथ मात्राणां भूतोपादानत्वं नाम तदात्मना परिणामः । स च द्विविधः । समस्तपरिणामः, एकदेशपरिणामश्चेति । समस्तपरिणामोऽपि द्विविधः । स्वरूपच्युत्या तदप्रचुत्या चेति । तत्राद्यो यथा क्षीरस्य दध्यात्मना परिणामः । तत्र ह्युपादानभूतक्षीरस्वरूपस्यातञ्चनादिना[२४] द्विप्रच्युत्या क्षीरावयवानामेव समस्तानां दध्यात्मना परिणामः । क्षीरार्थिप्रवृत्तिव्यवहाराद्यभावेन क्षीरस्वरूपनाशावगमात् । अन्यथा क्षीरस्य स्वावयववृत्तित्वे दध्नोऽप्युत्पन्नस्य तद्वृत्तित्वावश्यम्भावेन युगपन्मूर्तद्वयसमावेशो विरुद्ध आपद्येत । 'यो यद्ध्वंसजन्यः स तदुपादानोपादेयः' इति व्याप्तेः । क्षीरावयवोपादनकत्वस्य दध्नो निश्चयसम्भवात् क्षीरतदवयवोरत्यन्तभेदस्याभावेन क्षीरपरिणामवादश्च सङ्गतः ।

द्वितीयो यथा सुवर्णस्य कुण्डलात्मना परिणामः । तत्र हि यावानुपादानभागः तावानपि सुवर्णस्वरूपानाशेनैव कुण्डलात्मना परिणमते । न हि पुनः क्षीरस्येवात्र स्वरूपनाशः । हिरण्यार्थिप्रवृत्तिव्यवहारदर्शनात् । अयं चापरो विशेषः । स्वर्णकारेण तस्यैव सुवर्णीकर्तुं शक्यत्वात् कुण्डलात्मना परिणामो निवर्त्यपरिणामः । दध्यात्मना परिणामस्तु अनिवर्त्यपरिणामः । नह्युपायसहस्रेणापि दधि क्षीरीकर्तुं शक्यते ।

एकदेशपरिणामो यथा देवदत्तस्य यज्ञदत्तात्मना परिणामः । यत्र पितृपुत्रभावः तत्र हि न चेतनयोः कार्यकारणभावः । 'अजो नित्यः शाश्वतः'[२५] इति वचनविरोधात् । किन्तु पितृशरीरपुत्रशरीरयोरेव । तत्रापि पितृशरीरं समस्तं प्रच्युतस्वरूपमप्रच्युतस्वरूपं वा न क्षीरहिरण्यादिवत् पुत्रशरीरात्मना परिणमते । पितृशरीराद्विविक्ततया पुत्रशरीरोपलम्भात् । अपि तर्हि पितृशरीराधिष्टितचेतनभुक्तान्नादिरसपरिणतशरीरावयवचरमधातुविशेष एव पुत्रशरीरात्मना परिणमते ।

अत्र यद्यपि अन्नपानादिना शरीरोपचये अपूर्वस्योत्पत्तिः । विशेषणभेदाद्विशिष्टभेदस्यावश्यकत्वात् । यतश्च क्षणभङ्गुरत्वमागमोऽपि श्रावयति । तत एव यद्विशेषोऽपगमः तद्विशिष्टनाशोऽपि युक्तः । तथा च देवदत्ताद्यज्ञदत्तो जायत इति पञ्चम्यनुपपत्तिः । तथाऽपि क्रियाविशेषादवयवसंयोगनाशेन विशिष्टस्य विनाशे तदवयवसमूहमात्रावशेषे सति तत्रैकोऽवयवः चरमधात्वाख्यः तस्माद्विश्लिष्य पुत्रश-

---

[२४] 'आतञ्चनं प्रतीवापजवनाप्यायनेषुच' इति मेदिनी । 'हेप्पु' इति भाषायाम् ।
[२५] गीता २-२०

रीरात्मना परिणमते । शेषास्त्ववयवाः पुत्रशरीरप्रकृतय उच्यन्ते । पुत्रशरीरोपादानावयवसंसृष्टभागत्वात् । ते च संहत्य शरीरमपूर्वमारभन्ते । अत एव पञ्चमी । 'जनिकर्तुः प्रकृतिः'[२६] इति सूत्रात् । अत एव चैतत्सूत्रे वृत्तिकारैरुदाहृतम् - 'शृङ्गाच्छरो जायते' 'गोमयाद्वृश्चिको जायते' 'अविलोमभ्यो दूर्वाः जायन्ते' इत्यादि जायमानोपादनसंसृष्टत्वात् शृङ्गादेः जनिकर्तुः प्रकृतित्वोपपत्तिरिति ।

एतेन जायमानोपादानं जनिकर्तुः प्रकृतिशब्दार्थः इति वन्दन्तो निरस्ताः । न हि तत्र शृङ्गादीनामेव समस्तानां शराद्युपादानत्वम् । उपादेयाद्विविक्ततया दर्शनविरोधात् । 'हिरण्यात् कुण्डलं जायते' 'क्षीराद्धदि जायते' इतिवत् पञ्चम्यापत्तेश्च । न चैवं ध्रुवत्वप्राप्तौ गतार्थता । तद्विवरणार्थं पुनरारम्भात् । यथा चैतत् तथा कर(?) एव स्फुटमपगम्यनिवर्त्यपरिणाम एव । न हि पुत्रादिरन्यात्मनोपायसहस्रेण कुण्डलादिरिव परिणामयितुं शक्यते । तथा च मात्राणां भूतोपादानत्वं किमिवावगन्तव्यम्? इति चेत् । शृङ्गगोमयादीनां शराद्युपादानत्वमिव, पितृशरीरादेः पुत्रशरीरादुपादानत्वमिव चावगन्तव्यम् । अत एव कार्यविनाशे तदुपादानस्य स्वासृष्टभागसमूहसंश्लेषलक्षणकारणलयश्चोक्तः । एवमधस्तादुपरिष्टाच्चावगन्तव्यम् । **इति मात्राविवेकः** ।

११ भूतविवेकः

भूतत्वं जातिविशेषः । तदधिकरणं पञ्चविधम् । आकाश-वायु-तेजो-जल-पृथिवीभेदात् ।

१ आकाशविवेकः

शब्दगुणकत्वमाकाशस्य लक्षणम् । शब्दाख्यगुणवत्त्वमिति यावत् । आकाशो द्विविधः । अव्याकृताकाशो भूताकाशश्चेति । तत्राद्योऽनादिर्नित्यः । 'अनादिर्वाऽयमकाशः'[२७] 'आकाशवत् सर्वगतश्च नित्यः'[२८] इत्यादेः प्रलयेऽपि तत्सद्भावावगमाच्च । परममहांश्चेति वक्ष्यते । द्वितीयस्तु तद्विपरीतः । 'आत्मन आकाशः सम्भूतः'[२९],

---

[२६]अष्टाध्यायी १-४-३०

[२७] ?

[२८] ?

[२९]तैत्तिरीयोपनिषदि २-३

'अकाशो नीलिमोदेति'[३०] इत्यादेः, प्रलये तस्य लयावगमाच्च । शरीरोपोदानात्वेन विकारित्वाच्च । तथा च द्वितीय एवात्र लक्ष्यम् । शब्दश्चोक्तरीत्या द्विविधः । ततश्चाद्येऽतिव्याप्तिवारणाय गुणपदम् । भेरीदण्डसंयोगादिजन्यगुणात्मकशब्दस्य भेर्याद्यवच्छिन्नाकाशोपादानकत्वेन तद्वृत्तित्वाद्भूताकाशे लक्षणसमन्वयः । प्रपञ्चस्तूत्तरत्र भविष्यति ।

स द्विविधः पूर्ववत् । स पुनस्त्रिविधः । शरीरेन्द्रियविषयभेदात् । भोगायतनं शरीरम् । ज्ञानभोगादिसाधनमिन्द्रियम् । उपभोग्यो विषयः । तच्छरीरमन्तरिक्षलोकवासिनाम् । इन्द्रियं शब्दग्राहकं श्रोत्रम् । तस्याकाशात्मकत्वमुक्तं श्रोत्रविवेके । विषयः शरीरान्तःपरिणामहेतुः । **इत्याकाशविवेकः** ॥

२ वायुविवेकः

अरूपत्वे सति स्पर्शगुणवत्वं वायोर्लक्षणम् । अत्र यद्यपि वायोरुपादानं स्पर्शमात्राद्रव्यमेव, न गुण इति सिद्धान्ते लक्षणासम्भवः । तथापि शब्दवत् स्पर्शोऽपि द्विविधोऽस्ति । द्रव्यं गुणश्चेति । ततश्च पूर्ववदेव लक्षणसमन्वयः । स्पर्शवत्वमात्रे कृते स्पर्शतन्मात्राश्रये तत्परमाण्वादावतिव्याप्तिः । तद्वारणाय गुणपदम् । तेजआदिद्रव्येऽतिव्याप्तिवारणाय सत्यन्तम् । 'वायौ रूपं नास्ति' इति प्रतीते रूपशून्यो वायुः । अत एव न प्रत्यक्षः । किन्तु स्पर्शानुमेयः । तथा हि । 'योऽयं वायौ वाति अनुष्णाशीतस्पर्शः त्वगिन्द्रियेणोपलभ्यते सः क्वचिदाश्रितः, गुणत्वात्' । न च आकाशस्तदाश्रयः । स्पर्शवत्परमाणुजन्यत्वाभावात् । नापि तेजोजले । विपरीतस्पर्शवत्वात् । यद्यपि पृथिव्या अनुष्णाशीतस्पर्शोऽस्ति । तथापि रूपासमानाधिकरणस्पर्शस्य तद्गुणत्वानुपपत्तिः । तस्मात् तदाश्रयो वायुरित्यनुमीयते ।

ननु 'विमतः स्पर्शः न त्वगिन्द्रियप्रत्यक्षः, अतीन्द्रियगुणत्वात् परमाणुरूपवत्' । न चाप्रयोजको हेतुः । 'वायुः त्वगिन्द्रियसन्निकर्षशून्यः, अतीन्द्रियत्वात्' इति वायोः सन्निकर्षाभावे सिद्धे, 'तद्गुण इन्द्रियसन्निकर्षशून्यः असन्निकृष्टधर्मत्वात्' इति स्पर्शे सन्निकर्षाभावे सिद्धे, इन्द्रियसन्निकर्षरूपप्रत्यक्षकारणाभावेनाकारणकार्योत्पत्तिप्रसङ्गादिति चेत् । उच्यते । आकाशादेरतीन्द्रियत्वेऽपि इन्द्रियसन्निकर्षसद्भावेनाद्यमनुमानं व्यभिचारि । न चेन्द्रियसन्निकर्ष एव तत्र नास्तीति वाच्यम् । सन्निकर्षाभावेनैवाकाशादेरप्रत्यक्षत्वापत्तौ प्रत्यक्षताप्रयोजकमहत्त्वसमानाधिकरणोद्भू-

[३०]न्यायविवरणोदाहृता पैङ्गिश्रुतिः २-३-१

तरूपवत्वादिप्रत्यक्षत्वप्रयोजकधर्मनिरुक्तौ रूपादिपदवैय्यर्थ्यापत्तेः । गृहान्तर्वर्तिदीपप्रभायां गवाक्षादिना बहिर्निर्गतायां चक्षुःसन्निकर्षदर्शनेन तत्र द्वितीयानुमानमपि व्यभिचरितम् । ततश्च विपक्षे बाधकाभावेनाप्रत्यक्षत्वसाधको हेतुरप्रयोजकः । आकाशगुणे शब्दे व्यभिचरितश्च । तस्मात् साधूक्तं वायुः स्पर्शानुमेय इति ।

उक्तं च वायोः स्पर्शानुमेयत्वम् - 'अचेतनः स्पर्शगम्यो योऽयमेनं जनार्दनः',[३१] 'स्पर्शगम्यः स्पर्शानुमेयः अरूपिद्रव्यत्वेन बाह्यप्रत्यक्षागोचरत्वस्य स्थितत्वात्' इति काठकभाष्यटीकाभ्याम् ।

स चायं वायुर्द्विविधः पूर्ववत् । पुनस्त्रिविधः । शरीरेन्द्रियविषयभेदात् । शरीरं प्रेतादीनाम् । इन्द्रियं सर्वशरीरव्यापी त्वक् । विषयः चेष्टादिहेतुः, शरीरान्तर्बहिश्च वर्तते । तत्र शरीरस्थो वायुः दशविधः । प्राण-अपान-व्यान-उदान-समान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जयभेदात् । तेषां च शास्त्रे लक्षणानि द्रष्टव्यानि । **इति वायुविवेकः** ।

३ तेजआदिभूतत्रयविवेकः

रसरहितं रूपवत् तेजः, गन्धरहितं रसवज्जलम्, गन्धवती पृथिवी इति तेजआदिद्रव्यत्रयलक्षणम् । अत्राद्ये लक्षणे रसरहितेत्यादिना जलरूपयोर्व्यावृत्तिः । द्वितीयलक्षणे गन्धरहितेत्यनेन पृथिवीव्यावृत्तिः । रसवदित्यनेन तेजोवाय्वाकाशानां व्यावृत्तिः ।

यद्वा, रक्तशुक्लनीलरूपवत्वं त्रयाणां क्रमेण लक्षणम् । नन्वत्राद्यलक्षणस्य पार्थिवरक्तपद्मादौ जलात्मके रुधिरादौ वा, द्वितीयलक्षणस्य तेजसि सौरालोकादौ पार्थिवे पटादौ च, तृतीयलक्षणस्य श्वेतमृत्तिकादौ चातिव्याप्तिः स्यात् । सत्यमेवमेषां धर्माणां परस्परसाङ्कर्यम्, तथाऽपि स्वाभाविकत्वविशेषणेनोक्तदोषद्वयपरिहारः । नच नियामकाभावः । 'रक्तोऽग्निरुदकं शुक्लं कृष्णा च पृथिवी स्वतः'[३२] इत्याद्यागमेनैव नियमनात् ।

मधुररसवत्त्वं शीतस्पर्शवत्त्वं सांसिद्धिकद्रवत्ववत्त्वं वा जलस्य लक्षणम् । अत्र पूर्ववन्मधुजम्बीरादौ अतिव्याप्त्यव्याप्ती आशङ्क्य स्वाभाविकत्वविशेषणेनोक्तदोषद्वयं परिहरणीयम् ।

तेजआदिद्रव्यत्रयं द्विविधम् । नित्यमनित्यं चेत्यादि पूर्ववत् । पुनस्त्रिविधम् ।

---

[३१]काठकोपनिषद्भाष्ये २-२-१०

[३२] ?

शरीरेन्द्रियविषभेदात् । तत्र शरीरं आदित्यवरुणपृथिवीलोकनिवासिनाम् । इन्द्रियं तु चक्षुरसनघ्राणानि । विषयस्तु भौमदिव्यौदर्यसरित्समुद्रहिमकरकसुवर्णमाणिक्य-फलपुष्पादिरूपः । उक्तानां शरीरेन्द्रियविषयाणां तेजआद्यात्मकत्वे तत्तद्भागाधिक्यं निमित्तं प्रागेवोक्तम् ।

४ परोक्तानुमानदूषणम्

अन्ये तु 'विमतं श्रोत्रमाकाशात्मकम्, रूपादिषु पञ्चसु मध्ये शब्दस्यैवाभिव्यञ्जक-त्वात्, भेर्यवच्छिन्नाकाशवत्' 'रसमाप्यम्, रसस्यैवाभिव्यञ्जकत्वात्, सक्तुरसाभि-व्यञ्जकलालाजलवत्' 'घ्राणं पार्थिवम्, गन्धस्यैवाभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभि-व्यञ्जकघृतवत्' इति वदन्ति । तन्न । प्रथमानुमाने वर्णाभिव्यञ्जकध्वन्यात्मकशब्दे आकाशात्मकत्वाभावेन व्यभिचारात् । घटाद्यनात्मकस्याप्यालोकादेः घटाद्युत्पाद-कत्वरूपव्यञ्जकत्ववत् आकाशानात्मकस्य ध्वन्यादेराकाशसमवेतशब्दाभिव्यञ्जकत्वो-पपत्तेरुक्तहेतूनामप्रयोजकत्वाच्च । श्रोत्रादिना शब्दादिरूपार्थसन्निकर्षसमवायादिरूपे व्यभिचाराच्च । 'श्रोत्रादीन्याकाशाद्यात्मकानि, शब्दादिमत्त्वात्' इत्यादिप्रयोगेषु 'तेषां परानुसंसर्गाद्यथासङ्ख्यं गुणान् विदुः' इति न्यायेन शब्दादेर्वाय्वादावपि सत्वेन व्यभिचारात् । स्पर्शवत्त्वादिहेतूनां तेजआदौ व्यभिचाराच्च ।

अत्र कश्चिदाह । प्राचीनप्रयोगेषु द्रव्यत्वे सतीति हेतुविशेषणान्न दोष इति । तन्न । 'चक्षुस्तैजसम्, रूपस्यैवाभिव्यञ्जकत्वात्, दीपालोकवत्' इति प्रयोगे दृष्टान्ते साध्यवैकल्यात् । तथा हि । दीपालोको दीपस्य गुण एव, न द्रव्यम् ।

नन्वालोको गुणो भवन् प्रदीपस्य भवेत् । नान्यस्य । प्रदीपस्तु भित्तिकाबिल-वृत्तिः । प्रभा तु तद्गृहं व्याप्य वर्तते । तत् कथं प्रदीपप्रभयोर्गुणगुणिभावः? नहि गुणिनं विहाय गुणो वर्तते ।

मैवम् । द्रव्यत्वेऽप्यस्य दोषस्य साम्यात् । तथा हि । द्रव्यं चेत्, किम-कार्यम्? कार्यम्? नाद्यः । प्रदीपारोपणान्वयव्यतिरेकानुविधानाभावप्रसङ्गात् । द्वितीयेऽपि किं सोपादानम्? किं वा निरुपादनम्? आद्ये प्रदीपोपादानकम्? उत अन्योपादानकम्? नाद्यः । नहि विरुद्धस्वभावयोरुपादानोपादेयभावो दृष्टः । त-न्न्यूनवृत्तेस्तदुपादानत्वायोगाच्च । न ह्युपादानं मृदं विहायोपादेयो घटः भूतलादौ प्रसार्य विद्यमानः क्वचिद्दृष्टपूर्वः । न द्वितीयः । 'प्रदीपस्य प्रभा' इत्यादि तदीयत्व-व्यवहाराभावप्रसङ्गात् । नहि तत्रोपादानोपादेयात्मकजन्यजनकभावसम्बन्धातिरिक्तः तदीयत्वव्यवहारघटकः सम्बन्धोऽस्ति । अवयवावयविभावलक्षणसम्बन्धः तदीय-

त्वव्यवाहरघटकोऽस्तीति चेन्न । उपादानोपादेयभावातिरिक्तस्य तस्याभावात् ।

किञ्च, दीपो अवयवः? उत अवयवी? नाद्यः । उक्तदोषेणानङ्गीकारात् । न द्वितीयः । दीपनाशे प्रभानाशाभावप्रसङ्गात् । न ह्यवयवोऽवयविनमपेक्षते स्वसत्तादौ । तथा सति जीर्णकन्थायाः इतस्ततो विकीर्णानां तन्तूनां कन्थानाशेन नाशप्रसङ्गात् । न च दीपनाशेऽप्यालोको न नश्यतीति वाच्यम् । दीपनाशे भवन्नालोकः किमिति नोपलभ्यते? इत्यस्य चोद्यस्य परिहाराभावात् । अन्धकारेणावृतत्वादिति चेन्न । आलोकस्यान्धकारनाशकत्वेन तस्य तदावरकत्वायोगात् । किञ्च, परेद्युः प्रदीपारोपेण पुनरवयवान्तराणि विकीर्णानि । एवं प्रपरेद्युरपि ततः प्रपरेद्युरित्येवं बहवो दीपनाशेनाविनश्यन्तोऽवयवाः मिलिताः पूर्ववदेव सर्वं प्रकाशयेयुः । नचैवमनुभवोऽस्ति । एवं निरुपादानत्वपक्षोऽपि दूषणीयः । भावकार्यस्य तदयोगात् । तथा चैवं दोषसाम्ये द्रव्यत्वाग्रहः किन्निबन्धनः?

अथ दीपप्रभा द्रव्यं न गुणः । गुणाश्रयत्वात् । तदपि रूपत्वात् घटादिवत् । अन्यथा गुणिनं विहाय गुणस्य व्यात्यनुपपत्तिरित्यनुमानेन द्रव्यत्वपक्षाग्रहो युक्त इति चेन्न ।

एवं रूपं रसात् पृथक् शुक्लं नीलं वा? इत्यादि प्रतीत्या एकत्वादिसङ्ख्या पृथक्त्वशुक्लत्वादीनां सङ्गावेन रूपे व्यभिचारेणोक्तसाध्यं प्रति गुणाश्रयत्वहेतोरप्रयोजकत्वात् । नचानेकत्वतादात्म्यनीलत्वादीनामभाव एव तथा व्यवह्रीयत इति वाच्यम् । नियामकाभावात् । अन्यथा 'एको घटः', 'पतात् पृथक् शुक्लः' इत्यादावप्यनेकत्वाद्यभाव एव व्यवह्रीयते इति गुणादिस्वरूपमेव न स्यात् । मल्लिकादिपुष्पगुणस्य गन्धादेः पुष्पाद्बहिर्निर्गतस्य दूरप्रदेशे व्याप्तिदर्शनादाभासस्तर्कः । यदि च, पुष्पावयवैः सूक्ष्मैः सहैव व्याप्तिरित्युच्यते, तर्हीहापि दीपावयवैः सहैव दीपप्रभा व्याप्नोतीति समम् । तस्मादन्योक्तानुमानं दृष्टान्ते साधनवैकल्यात् रत्नादिप्रभायां व्यभिचाराच्चोपेक्षणीयम् । तस्मादाकाशादिपृथिव्यन्तानां पञ्चानां भूतानां शब्दगुणकत्वादीनि लक्षणानि । तेषां लक्ष्येषु समन्वयप्रकारश्चोक्तरीत्याऽनुसन्धेयः ।

ननु प्रथमक्षणावच्छिन्नेषूत्पन्नविनष्टेषु चाकाशादिकार्येषु निर्गुणत्वसिद्धान्ते शब्दगुणकत्वलक्षणमव्याप्तम् । मैवम् । गुणगुणिनोरभेदाङ्गीकारेण सहैवोत्पत्त्या समानकालीनत्वेन प्रथमं द्रव्यं निर्गुणमेवोत्पद्यते । पश्चात् तत्समवेता गुणा उत्पद्यन्ते इति निर्गुणसत्वसिद्धान्तस्य दुःसिन्द्धान्तत्वात् । गुणगुणिनोः समानकालीनत्वे समानसामग्रीकत्वात् कार्यभेदो न स्यादिति चेन्न । रूपरसयोरिव तत्तत्प्रागभावभेदेन सामग्रीभेदात् कार्यभेदोपपत्तेः । गुणगुण्यादिव्यवहारस्तु भेदस्याङ्गीकाराद्विशेषबलाच्च

युक्तः ।

५ सुवर्णस्तैजस इति पूर्वपक्षः

अथ यदुक्तं सुवर्णमाणिक्यमृत्पाषाणादिः पार्थिवविषय इति, तदयुक्तम् । सुवर्णस्य तैजसत्वात् । तथा हि । सुवर्णं तैजसमेव, न पार्थिवम् । 'अग्नेः प्रजातं प्रथमं हिरण्यम्'[३३] इति श्रुतेः । 'सुवर्णं तैजसम्, अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्, व्यतिरेकेण जलवत्' इत्यनुमानाच्च ।

अथ 'सुवर्णं न पार्थिवं न तैजसं वा, पीतत्वात् जलान्यत्वे सति गुरुत्वात्, नैमित्तिकद्रवत्वाधिकरणत्वाच्च, हरिद्रापाषाणघृतादिवत्' इति सत्प्रतिपक्षः । मैवम् । स्वरूपासिद्धेः । सुवर्णं हि नाम घटः पटाद्विविक्त इव न द्रव्यन्तराद्विविक्तम् । किं तर्हि? पीतत्वगुरुत्वाद्याश्रयावयवभागसंसृष्टभागान्तरमेव । तत्र पीतत्वादिप्रतीतिः आश्रयौपाधिकी । सुवर्णे पीतत्वादिकं नास्त्येव । किन्तु शुक्लभास्वरत्वादिकमेव । परन्तु गुडमाधुर्यस्येवाभिभूतस्य शुक्लभास्वरत्वादेश्चक्षुषाऽग्रहणमात्रम्, प्रत्युत तद्वदेव तद्वैपरीत्येन ग्रहणम् ।

ननु पार्थिवरूपेण तेजोरूपाभिभवे घटादिरूपेणैतत्प्रकाशकतैजसालोकादिगतशुक्लभास्वररूपाभिभवापातः, अविशेषात् । न चेष्टापत्तिः । रूपग्रहणे उद्भूतानभिभूतरूपवदालोकसंयोगस्य हेतुत्वेनालोकरूपाभिभवे सहकारित्वं न स्यात् । न च पार्थिवभागवृत्तिपीतिम्ना तद्गतसुवर्णरूपाभिभवो युक्तः । तदाश्रयाविभक्तभागवृत्तित्वात् सुवर्णरूपादेः । घटादिरूपेणालोकरूपाभिभवो युक्तः । तदाश्रयघटविभक्तभागवृत्तित्वाभावादालोकरूपस्य । न हि सुवर्णमिव पार्थिवघटादेरविभक्तो भाग आलोक इति वाच्यम् । तथाऽपि मण्यादिमध्यवृत्तितेजोरूपस्य मणिरूपेणाभिभवापातात् । मणिरूपाश्रयमण्याद्यविभक्ततेजोभागवृत्तित्वात् । तथा च सुवर्णमुपष्टम्भकपीतद्रव्यसंयुक्तमपि मण्यादिमध्यवृत्तितेजोवदनभिभूतोद्भूतरूपवदिति तद्गतशुक्लभास्वररूपस्य चक्षुषा ग्रहणापत्तिः, स्वप्रकाशकत्वापत्तिश्चेति चेन्न । फलबलेन पार्थिवरूपस्य क्वचिदेव तेजोरूपाभिभावकत्वं न सर्वत्रेति कल्पनादिति ।

६ सुवर्णस्य पार्थिवत्वसमर्थनम्

अत्रोच्यते । अनुकूलतर्काभावेनाद्यमनुमानं तावदप्रयोजकम् । अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानद्रवत्ववत्त्वं करकादौ काठिण्यमिवादृष्टविशेषादेवोपपन्नमिति न

---

[३३] ?

हेतोः साध्येन विनाऽनुपपत्तिः । पार्थिववत्त्वसाधकपीतत्वादिनोक्तहेतुरूपेण सत्प्रतिपक्षितं चानुकूलर्कसाहित्येन प्रबलेन पीतत्वाद्यनुमानेन बाधितं च । न चासिद्धिः शङ्कनीया । पीतत्वगुरुत्वाद्याश्रयावयवभागवृत्तितैजसं भागान्तरं सुवर्णमित्यादिप्रक्रियाविशेषस्य स्वगोष्टिमात्रप्रसृमरत्वेन पीतत्वाद्याश्रयवृत्तिभागान्तरस्यासत्कल्प्यत्वात् । न चैतद्भागे मण्यादिमध्यवृत्तितेजस इव प्रत्यक्षमस्ति । येन फलबलादन्यत्र मण्यदिमध्यवृत्तितेजोभागादावदृष्टस्यापि पार्थिवरूपेणाभिभूतरूपवत्त्वं कल्प्येत । तस्मान्मण्यादिमध्यवृत्तितेजोवदुपष्टम्भकपीतद्रव्यवृत्तिभागान्तरं सुवर्णमपि स्वपरप्रकाशकं प्रत्यक्षं च स्यादिति दुर्वारा प्रतिबन्दीत्यलम् ।

किञ्च, दिव्यं पार्थिवं वसुजम्बूनधीरोदसोमृत्तिकाजम्बूफलरसेनानुविद्यमाना (?) वाय्वर्कसंयोगविपाकेन जाम्बूनदं नाम सुवर्णं भवति । 'भूमिः काञ्चिन्यादर्शतलोपमा'[३४] इत्याद्यागमविरोधः । अत एव 'अग्नेः प्रजातं प्रथमं हिरण्यम्'[३५] इति श्रुतिः सुवर्णस्याग्निर्निमित्तकारणमित्याह, न तु तदात्मकतामिति न तच्छ्रुतिविरोधः । तदेवं पार्थिवविषयेषु सुवर्णस्य परिगणनं युक्तमिति ।

७ तार्किकोक्तसृष्टिप्रक्रिया

तार्किकास्तु प्रलये विभक्ताः पार्थिवाप्यतैजसवायव्याश्चत्वार एव परमाणवः सन्ति । न त्वाकाशीयाः । निरवयवत्वादाकाशस्य । एवं शब्दादीनां पञ्चानां विशेषगुणत्वेन निरयवत्वात् श्रोत्रादीनामाकाशादिष्वन्तर्भावात् महदहङ्कारयोः स्वरूपेणैवाभावात् परमाणवो न सन्ति । ते च 'यतः परमाणुर्नास्ति स परमाणुः' इति निर्वचान्निरंशाः । नित्याश्च । तेषु च सिसृक्षालक्षणया ईश्वरेच्छया जीवगतादृष्टोद्बोधनेन परमाणुषु क्रिया जायते । तस्याः परमाणुः समवायिकारणम् । 'यत् समवेतं कार्यमुत्पद्यते तत् समावायिकारणम्' इति लक्षणात् । 'या क्रिया यदिन्द्रियव्यधिकरणगुणजन्या सा तत्संयोगासमवायिकारणिका' इति व्याप्तेः अदृष्टवदात्मनां परमाणुभिः संयोगोऽसमवायिकारणम् । समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणमुच्यते । ततः पार्थिवपरमाणुः पार्थिवेनैव परमाण्वन्तरेण संयुज्यते, नत्वाप्यादिना । एवमाप्योऽपि परमाणुः न पार्थिवादिना परमाण्वन्तरेण, किन्तु सजातीयेनैव । तथा च पार्थिवपरमाणुद्वयं मिथः संयुक्तं स्वसमवेतं पार्थिवद्व्यणुकं नाम कार्यं कारणादत्यन्तभिन्नं प्रागत्यन्तासदेवोत्पादयति । उत्पत्तिश्चासतः सत्तासम्बन्धः

---

[३४] ?

[३५] ?

।

ततो द्वणुकानां त्रयाणां सजातीयानामेव संयोगो जायते । तत्र त्र्यणुकाख्यं कार्यमुत्पद्यते । अत्र यद्यपि त्रिभिर्द्व्यणुकैः जातत्वात् त्रिद्व्यणुकमिति सञ्ज्ञा युक्ता । तथाऽपि द्व्यणुके अनित्याणुत्वस्य सद्भावेन त्रिभिरणुकैरेवास्य त्रणुकस्योत्पत्तिसम्भवः । सजातीयैः संयुक्तैः चतुर्भिः त्र्यणुकैश्चतुरणुकाख्यं कार्यं जायते । यद्यपि त्र्यणुकेष्वनित्याणुत्वाभावान्नान्वर्थसञ्ज्ञा । तथाऽपि त्र्यणुकेष्वणुत्वसञ्ज्ञोपचाराद्भवति । एकदेशिनस्तु चतुर्भिर्द्व्यणुकैरेव चतुरणुकोत्पादनमभ्युपयन्ति ।

८ तन्निराकरणम्

अत्रोच्यते ।

'पञ्चभिर्पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ।
एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥'[३६]
'भूतेन्द्रियप्राणगुणसूक्ष्मरूपं च नित्यकम्'[३७]
'नित्यान्येतानि सौक्ष्म्याणि हीन्द्रियाणि च सर्वशः'[३८]

इत्यादिप्रमाणैर्महदादिपृथिव्यन्तानां तत्वानामारम्भकाश्चतुर्विंशतिविधाः परमाणवः दुरपह्नवा इति चत्वार एव परमाणव इति पक्षस्तावदनुपपन्नः । आकशस्य निरवयवत्वं प्रागेव दूषितम् ।

किञ्च, 'शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां'[३९] इति शुद्धिप्रार्थनलिङ्गात् द्रव्यरूपा मात्राशब्दिताः पञ्चपरमाणवः तज्जन्याः द्रव्यरूपाः पञ्चकार्यविशेषाश्चाङ्गीकार्याः । न हि गुणानां शुद्धिप्रार्थनं युज्यते । अमूर्तत्वात् । किञ्च प्रायश्चित्तकाण्डे अशुद्धिप्रसक्तौ शब्दादिद्रव्याणामेव तक्षणादिप्रायश्चित्तं विधीयते । न हि तक्षणादिकं गुणे सम्भवतीति, इहापि शुद्धिप्रार्थनमिदं प्रायश्चित्तं विधीयमानं शब्दादीनां द्रव्यत्वमाक्षिपति । किञ्च, एषां पञ्चानामद्रव्यत्वे चतुर्विंशतिसङ्ख्या न स्यात् । तस्माद्गुणातिरिक्ताः पञ्चद्रव्यरूपाः न सन्तीत्येतदुराग्रहमात्रम् ।

---

[३६]भागवते ३-२७-१२
[३७]तत्त्वविवेके-८
[३८]तत्त्वविवेके-८
[३९] ?

यच्चोक्तम् 'सृष्टिकाले पार्थिवाः परमाणवः सजातीयेनैव संयुक्ताः पार्थिवं कार्यमुत्पादयन्ति, न तु विजातीयै आप्यपरमाणुभिः' इत्यादि, तदयुक्तम् । चतुर्विंशतितत्वानां सम्भूय तत्तत्कार्यजनकत्वस्यागमसिद्धत्वात् । किञ्च, पार्थिवे कार्यद्रव्ये स्पर्शादयः गन्धान्ताश्चत्वारोपि गुणाः प्रतीयन्ते, न गन्धमात्रम् । तद्यदि आप्यादिपरमाणुभिरसंयुक्तैः केवलैः पार्थिवपरमाणुभिः पार्थिवद्रव्यारम्भः स्यात्, कथं तर्हि रसादिगुणत्रयप्रतीतिः स्यात्? कार्यगतगुणानां कारणगुणपूर्वकत्वनियमात् । पार्थिवपरमाणुमात्रारब्धे गन्धमात्रोत्पादेऽपि गुणान्तरोत्पादाभावात् ।

यच्चोक्तम् 'पार्थिवपरमाणौ चत्वारो गुणाः सन्ति न गन्धमात्रम् । दृष्टानुसारिणी हि कल्पना । एवमाप्यादिपरमाणुष्वपि गुणान्तरमस्ति' इत्यादि, तदसारम् । शब्दादयो हि विशेषगुणा इत्यभुयसम्मतिः । विशेषगुणत्वञ्च नियतैकद्रव्यव्यवच्छेदकमेव । नान्यत् । तच्च पार्थिवे परमाणौ गन्धमात्रम्, आप्ये रसमात्रम्, तैजसे रूपमात्रम्, वायवीये स्पर्शमात्रम् इति व्यवस्थाङ्गीकृतावेव निर्वहणीयम्, नान्यथा । स्पर्शादेः द्रव्यान्तरव्यवच्छेदकत्वात् । गुणान्तरप्रतीतिस्तु विजातीयपरमाणुसंयोगजन्यत्वोपाधिना निर्वहणीया । तथा चोक्तम् -

'भूतानां नभआदीनां यद्यङ्गाव्यं परात्परम् ।
तेषां परानुसंसर्गाद्यथासङ्ख्यं गुणान् विदुः ॥'

इति । अत्र हि 'परानुसंसर्गात्' इत्यनेन स्पष्टं गुणान्तराणामौपाधिकत्वं प्रतीयते ।

अत्र कश्चिदाह । नवानां लक्षणानां मध्ये लक्षणद्वयसामानाधिकरण्यरहितगुणत्वव्याप्यजातिमत्वं गुणत्वव्याप्यजातिमत्तया नियतैकद्रव्यव्यवच्छेदकत्वं वा विशेषगुणत्वम् । तेन संयोगादिसामान्यगुणव्यावृत्तिः । तस्य द्रव्यद्वयवृत्तित्वात् इत्यादि ।

तदयुक्तम् । स्पर्शादावव्याप्तेः । लक्षणद्वयवतोर्वायुतेजसोर्वृत्तेः । न च तत्रापि अनुष्णाशीतस्पर्शो वायोरेव, उष्णस्पर्शः तेजस एवेत्यादि व्यवस्थाश्रयणान्न दोषः । स्पर्शविशेषे लक्षणद्वयासामानाधिकरण्यसङ्गावेऽपि स्पर्शसामान्ये तदभावात् । स्पर्श एव हि विशेषगुणत्वेन व्यवह्रियते । न तु तद्विशेषः ।

९ परिमाणोत्कर्षापर्षानन्त्यसमर्थनम्

'यतः परमाणुर्नास्ति स परमाणुः' इति निर्वचनं चायुक्तम् । तदंशस्य ततोऽप्यणोरङ्गीकार्यत्वात् । अन्यथा त्रिभिः परमाणुभिः संयोगानुपपत्तिः । अंशसङ्गावे तु

भागभेदेन द्वाभ्यां एकस्य संयोगो युक्तः ।

एतेन सर्षपमहीधरारम्भकाणामवयवानामुक्तन्यायेनानन्तानां समसङ्ख्यत्वात् तदारब्धयोः परिमाणभेदो न स्यादिति निरस्तम् । आनन्त्येऽपि तारतम्यसद्भावात् । अनन्ता हि पार्थिवपरमाणवः अनन्ताश्च तार्किकाङ्गीकृता अन्त्यविशेषाः । न च ते समसङ्ख्याः । तथा सत्याप्यपरमाणुविशेषाभावापातात् । अतो विशेषानन्त्यमधिकं पार्थिवपरमाण्वानन्त्यादिति वक्तव्यम् । एवं कल्प-वत्सर-अयन-ऋतु-मास-पक्ष-दिन-याम-घटिका-क्षणादिनामानन्त्यमपि तारतम्योपेतम्, उत्तरोत्तरमानन्त्याधिक्यानुभवात् ।

तथा च एक एव परमाणुः स्वावयवापेक्षया महान् । तदवयवोऽपि स्वावयवापेक्षया महान् । सोऽपि तथा । सोऽपि तथा । एवं परमाणुः स्वावयवापेक्षया महानपि द्व्यणुकापेक्षयाऽणुरेव । एवं द्व्यणुकमपि परमाण्वपेक्षया महदपि स्वकार्यत्र्यणुकापेक्षयाऽण्वेवेति न महत्वाणुत्वयोः क्वचिद्विश्रान्तिरस्ति । आपेक्षिकमहत्वाणुत्वयोः सर्वत्र सर्वानुभवसिद्धत्वात् ।

न चैवमुक्तरीत्या प्रत्यक्षताप्रयोजकस्य महत्वस्य सर्वत्र सत्वेन सर्वस्यापि सर्वप्रत्यक्षगोचरतापत्तिरिति वाच्यम् । फलबलेन महत्वविशेषस्यैव तत्प्रयोजकताकल्पनात् ।

नन्वेवं सति परममहच्छब्दपरमाणुशब्दयोर्लोके आकाशपरमाण्वोरेव प्रयुज्यमानयोरन्वर्थसञ्ज्ञयोर्निर्वचनानुपपत्तिः । 'यतः परममहन्नास्ति स परममहान्', 'यतः परमाणुर्नास्ति स परमाणुः' इत्येवं तन्निर्वचनम् ।

अत्रोच्यते । अन्यानन्तर्गतत्वं परममहत्वम् । तच्चान्यन्तर्गतत्वे सति तद्बहिष्टत्वाभावाभावः । अत्र लक्ष्यं परममहच्छब्दवाच्यम् आकाशं कालः प्रकृतिः ब्रह्मेति चतुष्टयम् । अकाशादीनां चतुर्णां ब्रह्माण्डस्यान्तः तद्बहिश्च सत्वात् तेषु लक्षणसमन्वयः । न ह्याकाशादिः क्वचिद्देशेऽस्तीति शक्यते वक्तुम् । अलक्ष्येषु आकाशकालप्रकृतीश्वरांशेषु घटादिषु तद्ब्रह्माण्डान्तरपि सत्वात् तद्बहिरसत्वात् लक्षणं नास्ति । न ह्याकाशाद्येकदेशो बहिः सन्निति वक्तुं शक्यम् । तदंशानां तत्र तत्रैवावस्थाननियमात् । तदुक्तम् -

'सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ।
कैवल्यं परममहानविशेषो निरन्तरः ॥'

इति । अन्यानन्तर्गतत्वपरेण स्वरूपावस्थितपदेन ब्रह्माण्डान्तर्गतानां आकाशाद्यंशानां

घटादीनां च व्यावृत्तिः । अन्यप्रतीतिनिरपेक्षप्रतीतिकत्वपरेण केवलपदेन जगदा-वरकवासुदेवादिरूपविशेषस्य व्यावृत्तिः । अप्रादुर्भूतत्वपरेण विशेषपदेन परमपुरु-षादिरूपस्य व्यावृत्तिः । अनंशत्वपरेण निरन्तरपदेन परमब्रह्मावयवहस्तचरणा-दिव्यावृत्तिः इति पदानां उपयोगसत्वेऽपि, अन्यानन्तर्गतपरं स्वरूपावस्थितपदमेव लक्षणोपस्थापकम् । इतराणि पदानि तत्स्वरूपकथनार्थानि ।

एवं दिव्यपुरुषग्राह्यांशरहितत्वं दिव्यपुरुषाग्राह्यांशवत्वं महापुरुषैकग्राह्यांशवत्वं वा परमाणुत्वम् । यो यागादिना स्वर्गं प्राप्य भोगाननुभूय तत्सूक्ष्मपदार्थदर्शनादि-सामर्थ्यवान् स्वर्गस्थो मानुषो जीवः स उच्यते दिव्यपुरुष इति । यस्तूक्तजीवदिव्यपु-रुषादपि अतिसूक्ष्मवस्तुदर्शनसामर्थ्यातिशयितशक्तिमान् देवर्ष्यादिजीवः स महापुरुष उच्यते । अस्ति चेदं लक्षणत्रयं द्व्यणुकावयवे परमाणौ । तदंशस्य दिव्यपुरुषग्राह्य-त्वाभावात् महापुरुषैकग्राह्यत्वाच्च । अत्राद्ये लक्षणे उक्तरीत्या परमाणौ महापुरुषग्रा-ह्यांशसङ्गावेनांशराहित्यस्यासम्भववारणाय दिव्यपुरुषग्राह्येति विशेषणम् । महापु-रुषैकग्राह्यांशवत्वेऽपि दिव्यपुरुषग्राह्यत्वरूपविशेषणाभावाद्विशिष्टाभावः । कदाचिच्च-तुरणुकाद्यंशस्य त्र्यणुकादेः दिव्यपुरुषेणाग्रहणसम्भवाच्चतुरणुकादावतिव्याप्तिवारणाय वक्रोक्तिः । त्र्यणकादेर्दिव्यपुरुषाग्राह्यत्वशङ्कैव नास्तीति द्वितीयलक्षणे वक्रोक्त्यभावः । तृतीयलक्षणे चतुरणुकादौ महापुरुषग्राह्यांषवत्वस्य सङ्गावेनातिव्याप्तिवारणाय एकेति विशेषणम् । महापुरुषेतरदिव्यपुरुषादिग्राह्यांशवत्वात् महापुरुषैकग्राह्यांशवत्वाभावः सुगम एव । तदुक्तम् -

‘चरमस्तु विशेषाणामनेकासंयुतस्तु यः ।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥
मनुष्या देवलोकेऽपि विशेषेणैव दर्शने ।
अंशाशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः ॥
चरमो विशेष इति तु मुनयो ब्रूयुरञ्जसा ।
परमाणुः स विज्ञेयः कणादाद्या निरंशकम् ॥
अनन्तांशयुतत्वेऽपि यं ब्रूयुः भ्रान्तिदर्शनात् ।
ततोऽपि परमाणुत्वं तदंशानां तु यद्यपि ।
अनन्तत्वाद्विवेकार्थमस्यैव परमाणुता ॥’

इति । अनेकैरंशैरा समन्तात् संयुतः अनेकासंयुत इत्यर्थः ।

ननु सर्वेषामंशवत्त्वे सावयवत्वप्राप्त्या कार्यत्वाकार्यत्वनित्यत्वानित्यत्वव्यवस्था न

स्यादिति चेत् । द्विविधो ह्यंशः । एकदेशरूपः, उपादानरूपश्चेति । तथा च यत् सोपादानं तत् कार्यमिति व्याप्तिसत्वेऽपि यदेकदेशवत् तत् कार्यमिति व्याप्तिर्नास्ति । अनन्तांशवत्त्वेनैकदेशवत्सु आकाशादिषु व्यभिचारात् । इह परमाण्वादिष्वङ्गीक्रियमाणं सांशत्वं न सोपादानत्वरूपमिति सङ्क्षेपः ।

१० समवायनिराकरणम्

यच्च 'यत्समवेतं कार्यम्' इत्यादि समवायिकारणलक्षणम्, तदपि वक्ष्यमाणरीत्या समवायस्याप्रामाणिकत्वादयुक्तम् । एतेनासमवायिकारणलक्षणमपि निरस्तम् । द्वित्वसमवायिनिमित्तकारणयोरतिव्याप्तेश्च । तन्तुपटयोरुत्पन्नद्वित्वं प्रति तन्तुः पटश्च समवायिकारणं तन्तौ पटस्य समवेतत्वात् समवायिकारणतया तन्तोरिवावधृतसामर्थ्यस्यापि सद्भावात् द्वित्वसमवायिकारणे पटे लक्षणसद्भावः सुलभः । शरीरात्मोभयवृत्तिद्वित्वं प्रति शरीरात्मनोरुभयोरपि समवायिकारणत्वेनात्मसमवेताया अपेक्षाबुद्धेर्निमित्तकारणत्वेन सामर्थ्यावधारणाच्च द्वित्वं प्रति निमित्तकारणीभूतायामपेक्षाबुद्धौ लक्षणसम्भवः सुलभः ।

नच समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणं विवक्षितम् । शरीरात्मनोरुत्पन्नद्वित्वं प्रति अपेक्षाबुद्धेर्द्वित्वसमवायिकारणात्मसमवेतत्वेनैव कारणता न गृह्यते । आत्मान्तरस्यापेक्षाबुद्धा शरीरात्मनोर्द्वित्वोत्पत्त्यनुपत्तेः । एवं तन्तुपटयोरुत्पन्नद्वित्वं प्रति पटस्य न तन्तुप्रत्यासन्नत्वेन सामर्थ्यावधारणं केवलयोस्तन्तुपटयोरनुपपत्तेरिति वाच्यम् । धूमज्ञानेऽतिव्याप्तेः । वह्निज्ञानं प्रति समवायिकारण आत्मनि धूमज्ञानस्यास्ति प्रत्यासन्नता । समवायिकारणप्रत्यासन्नतयैव सामर्थ्यावधारणमपि, नान्यथा । अन्यगतव्याप्यबुद्धाऽन्यस्य व्यापकबुद्धिप्रसङ्गात् । स्रक्चन्दनादिदर्शने सर्पादिदर्शने धर्माधर्मयोश्चातिव्याप्तिः । तत्रापि सुखदुःखकारण आत्मनि तेषां प्रत्यासन्नत्वात् । अन्यगतविषयदर्शनादिनाऽन्यगतसुखदुःखयोरनुत्पत्तेः समवायिकारणप्रत्यासन्नतयैव सामर्थ्यावधारणात् ।

नचात्मनि यः प्रदेशः व्यापकबुद्धादीन् प्रति समवायिकारणं तस्मिन्नेव प्रदेशे व्याप्यबुद्धादेरसमवायी, न तेषां समवायिकारणप्रत्यासन्नतयैव सामर्थ्यावधारणमिति वाच्यम् । यस्मिन्नेव प्रदेशे द्वितीयादिशब्दा उत्पन्नाः, न तस्मिन्नेव प्रदेशे आद्यादिशब्दा समवेता इति तेषां द्वितीयादिशब्दान् प्रति समवायिकारणप्रत्यासन्नत्वाभावेनाद्यादिशब्देष्वव्याप्तेः ।

यच्चावयवावयव्यादीनामत्यन्तभेदमङ्गीकृत्य तत्सम्बन्धत्वेन समवायाङ्गीकरणम्,

तदप्ययुक्तम् । तन्तुपटादेस्तद्गतरूपादेश्चाभेदेन तत्र सम्बन्धानपेक्षणात् ।

एतेन " 'इह तन्तुषु पटः' इति प्रत्ययः सम्बन्धपूर्विकः, 'इह' इति प्रत्ययत्वात्, 'इह कुण्डे बदराणि' इति प्रत्ययवत्", "जात्यादिगोचरविशिष्टव्यवहारः सम्बन्धनियतः, भावमात्रविषयकाबाधितविशिष्टव्यवहारत्वात् 'सघटं भूतलम्' इति व्यवहारवत्", " 'इह तन्तुषु पटः' इति प्रत्यय एतज्जनकसंयोगत्वरहितसम्बन्धजन्यः, 'इह' इति प्रत्ययत्वात्, 'इह भूतले घटाभावः' इति प्रत्ययवत्", "संयोगत्वमेतत्सम्बन्धव्यावृत्तम्, जातित्वात् गोत्ववत्" इत्यादीनि तार्किकोत्प्रेक्षितान्यनुमानानि निरस्तानि ।

किञ्च, अत्र सर्वत्रानुकूलतर्काभावेनाप्रयोजकता । अर्थान्तरता वा । " 'इह प्रमेयत्वे प्रमेयत्वम्' इति प्रत्ययः सम्बन्धपूर्वकः, 'इह' इति प्रत्ययत्वात्", "प्रमेयत्वे प्रमेयत्वविशिष्टव्यवहारः जातौ प्रमेयत्वविशिष्टव्यवहारो वा सम्बन्धजन्यः, विशिष्टव्यवहारत्वात्", " 'इह शशशृङ्गमस्ति' इति प्रत्ययः एतज्जनकसंयोगत्वरहितसम्बन्धजन्यः, 'इह' इति प्रत्ययत्वात्, 'इह भूतले घटाभावः' इति प्रत्ययवत्", "रूपत्वं गुणव्यावृत्तम्, जातित्वात्, गोत्ववत्" इति आभाससाम्यम् । प्रमेयत्वे प्रमेयत्वमित्यादीहप्रत्यये व्यभिचारः । अपूर्वस्य समवायाख्यपदार्थान्तरस्य कल्पनात् कल्पनागौरवं च ।

ननु द्रव्यादयः पदार्थाः सामान्यतस्त्वयाऽप्यङ्गीकृताः । तत्र गुणादीनां गुण्याद्यभेदमङ्गीकृत्य पर्यायशब्दवाच्यत्वादिभेदकार्यनिर्वाहायापूर्वो विशेषोऽङ्गीकार्यः । मया गुणादेर्गुण्यादिभेदमङ्गीकृत्य विशिष्टव्यवहारनिर्वाहायापूर्वः समवायोऽङ्गीक्रियते । तत्र कोऽवसरः कल्पनागौरवस्य? इति चेत् । समवाये तावदवयवनिष्टमस्तित्वमभिधेयत्वं चेत्यादिधर्मजातमङ्गीकार्यम् । 'समवायोऽवयवनिष्टोऽस्त्यभिधेयश्च' इत्यादिप्रतीतेः । अवयवनिष्टत्वादिधर्मजातस्य धर्मिणा समवायेन सह सम्बन्धान्तराङ्गीकारेणानवस्थाद्यापत्त्या स्वयमेव सम्बन्धः स्वनिर्वाहकश्चेत्याद्यङ्गीकार्यम् । उक्तप्रमाणानामप्रयोजकत्वादिना दूषितत्वात्, प्रमाणं विनैव समवायोऽभ्युपगन्तव्यश्च ।

किञ्च, अवयवनिष्टत्वादिधर्मजातमनवस्थाभयेन न भिन्नं किन्त्वभिन्नमेकम् । तत्र चाधाराधेयभावनिर्वाहाय वस्तुस्वभावाख्यो विशेषोऽङ्गीकार्यः । तस्याप्युक्तरीत्या विशेषविशेषिभावनिर्वाहाय स्वनिर्वाहकत्वमङ्गीकार्यम् । 'घटस्य स्वरूपम्' इत्यादिव्यवहारानुपपत्तेरिव विशेषस्वरूपे प्रमाणमङ्गीकार्यम् । अङ्गीकृतश्च नित्यद्रव्येषु परस्परव्यावृत्तिसिद्धये स्वस्यैव व्यावर्तकत्वरूपो विशेषः । अन्यथा पार्थिवपरमा-

णुगतविशेषस्याप्यपरमाणुगतविशेषाद्भेदो न स्यात् । तथा च कथं मयाऽभिहितो विशेषोऽपूर्वः स्यात् । त्वयाऽप्युक्तरीत्याऽङ्गीकृतत्वात् कथं चापूर्वः समवायो न स्यात्? अनन्यथासिद्धप्रयोजनाभावेनाङ्गीकर्तुमशक्यत्वात् । 'इह तन्तुषु पटः' इत्यादेर्व्यवहारमात्रत्वेन प्रत्ययत्वाभावात् । तस्य चौपचारिकत्वात् । तथा चोभयसम्प्रतिपन्नविशेषादेव सर्वसामञ्जस्योपपत्तावप्रामाणिकं समवायमङ्गीकृत्य तस्य च स्वनिर्वाहकत्वनित्यत्वैकत्वाद्यङ्गीकारे कथं कल्पनागौरवं न स्यात्?

किञ्च, समवायस्यैकत्वे सर्वानुमानोच्छेदप्रसङ्गः । तथा हि । 'पर्वतोऽग्निमान्' इत्यादौ पर्वतवह्निसंयोगानां प्रत्येकं प्रत्यक्षसिद्धत्वेन सिसाधयिषाविषयत्वं नास्ति । यस्तु पर्वतवह्निसंयोगसम्बन्धात्मकः समवायः, सोऽपि पटादौ रूपादिसमवायस्य प्रत्यक्षेण निश्चितत्वात् निश्चित एव । तस्य चैकत्वाभ्युपगमेन भेदाभावात् ।

एवं समवायनित्यत्वमनुपपन्नम् । परमाणुषु परमाणुद्वयसंयोगसमवायस्य सत्वेन सर्वदा कार्योत्पत्तिप्रसङ्गात् ।

किञ्च, प्रागसतः सत्तासमवायो जनिरिति तार्किकाणां जनिलक्षणम् । तत्र समवायलक्षणा जनिः प्राक्कुलालव्यापारादस्तीति घटोत्पत्त्यर्था कुलालकृतिर्व्यर्था स्यात् । अथ परमाणुगतस्य रूपादिसमवायस्य सत्तासमवायस्य च नित्यत्वेऽपि ताभ्यां परमाणुद्वयसंयोगसमवायः कुलालव्यापारात् प्रागसतो घटस्य सत्तासमवायश्च भिन्न इति चेन्न । समवायैक्यव्याघातात् । समवायस्यैकत्वं हि न सङ्ख्याविशेषः । निर्गुणत्वात् । किन्तु, अभेद एव । न च भेदाभेदौ क्वापि परेणाङ्गीकृतौ । तत्समवायाभेदस्याप्यङ्गीकृतौ तद्विरुद्धो भेदो नाङ्गीकर्तुमुचितः ।

ननु विरुद्धाभिमतयोरविरोधोऽपि कालभेदात्, देशभेदात्, व्यक्तिभेदात्, प्रकारभेदाच्च दृष्टः । इदानीं घटवति कालान्तरे घटाभावस्य, एकस्मिन्नेव काले घटवद्देशान्तरे घटाभावस्य, एकस्मिन्नेव देशे काले घटवति भूतले घटान्तराभावस्य, नीलघटसद्भावेऽपि पीतघटाभावस्य चानुभवात् । तत्र तावत् समवाये यद्यप्यभेदाभेदयोर्नाद्यविधात्रयं सम्भवति । नित्यत्वैकत्वयोर्व्याघातात् । तथाऽपि चतुर्था विधा सम्भवति । स्वाभाविकत्वौपाधिकत्वाभ्यां विरोधशान्तिसम्भवात् । न हि स्वाभाविकाभेद औपाधिकभेदेन विरुद्ध्यते । स्वभावतोऽभिन्ने गगने घटमठाद्यौपाधिकभेददर्शनात् । समवाये चौपाधिकभेदोऽभ्युपगतः । अभेदस्तु स्वाभाविक एवेति मते कथं व्याघातः? इति चेत् ।

अत्र ब्रूमः । समवायभेद औपाधिक इत्यत्र शैषिके ठकि कृते निष्पन्नस्यौपाधिकशब्दस्योपाधिजन्य इति उपाधिगम्य इति वाऽर्थः स्यात् । तत्र समवाये

स्वरूपेणाभेदेऽपि, तत्तदवयवावयविगुणगुण्याद्युपाधिना भेदो जायते ज्ञायते वेत्युक्तं स्यात् । तत्र नाद्यः । उपाधीनां भिन्नत्वेन समवायभेदप्रसङ्गात् । नह्यौपाधिकभेदो नामोपाधीनामेव भेदः । न समवायस्येति सम्भवति । ततश्च भेदहेतवः उपाधयोऽनन्ता इति कथं न समवायानान्त्यम्? किञ्च, उपाधिजन्यो भेद इत्युक्ते स्वाभाविकत्वाप्राप्तावपि सत्यत्वप्राप्तेरनिवारणात्, 'भेदो नासत्' 'भेदः सन्' इत्यनयोर्विरोधपरिहारश्च कथं स्यात्? न हि पार्थिवपरमाणौ रूपादयः अग्निसंयोगजाः न त्वाप्यपरमाणुरूपादय इह स्वाभाविका इत्येतावता पार्थिवपरमाणौ रूपादेरसत्वं सम्भवति । न पार्थिवपरमाणुः रूपादिरहितो भवति ।

एतेन 'घटे नीलरूपमस्ति, पीतरूपं नास्ति' इत्यनयोरिव समवाये औपाधिको भेदोऽस्ति, स्वाभाविको भेदो नास्तीत्यनयोरविरोधः किं न स्यात्? इति परास्तम् । रूपगतस्य पीतत्वस्य रूपेऽसत्वप्राप्तावपि रूपस्यासत्वाभाववदिहापि स्वाभाविकत्वरूपप्रतियोगितावच्छेदकमात्रस्यौपाधिकभेदे असत्वप्राप्तावपि समवायभेदस्यासत्वाप्राप्त्या सत्वस्यैव प्राप्तौ विरोधापरिहारात् ।

नन्वथापि उपाधिनिवृत्तौ तत्कृतो भेदः निवर्तते । जपाकुसुमसन्निधाननिवृत्तौ लौहित्यनिवृत्तेर्दर्शनात् । तथा च 'शुभ्रः स्फटिकः' इति यथा व्यवह्रियते, एवं भेदनिवृत्तावेकः समवाय इति व्यवह्रियते इति चेन्न । उपाधीनां सर्वदाऽनपायेन भेदस्यापि निवृत्त्यनुपपत्तेः । न हि समवायः सम्बन्धिभिर्विनाऽवतिष्टते । सम्बन्धत्वव्याघातात् ।

एतेन द्वितीयोऽपि निरस्तः । चक्षुर्गम्यस्य घटादेरिव सत्वप्राप्तेः । न चाधिगम्यस्य शुक्तिरूप्यादेः सत्वाभाववदिहापि किं न स्यात्? इति वाच्यम् । तत्राधिगम्यस्य विभ्रमत्वात् । इहाप्यधिगमः कुतो न विभ्रमः? इति चेन्न । सर्वदोपाधिना जायमानस्य विभ्रमविषयत्वानुपपत्तेः ।

११ सदसत्कार्यत्वसमर्थनम्

एतेन प्रागसतः कार्यस्योत्पत्तिरिति पक्षो निरस्तः । कुलालव्यापारात् प्राक् कार्यस्यासत्वे कुलालस्य तद्विषयव्यापारानुपपत्तेः । न ह्यसद्विषयो व्यापारः सम्भवति । प्रयोजनाभावाच्च । घटादेः सत्वसम्पादनमेव कुलालव्यापारस्य प्रयोजनमिति चेन्न । असतः सत्वकरणानुपपत्तेः । तस्य सत्तासमवायानतिरेकेणोक्तरीत्या व्यापारवैय्यर्थ्यापाताच्च । स्वरूपलाभः कुलालादिव्यापारसाध्य इति चेन्न । असतः स्वरूपलाभानुपपत्तेः । अन्यथा शशविषणादिस्वरूपलाभार्थं कश्चिद्व्यापारोऽपि स्यात्

। स्वरूपलाभस्य सत्तासमवायानतिरिक्तस्य जनित्वायोगाच्च ।

किञ्च, कार्येण सम्बद्धं कारणं कार्यस्य जनकम्? असम्बद्धं वा? आद्ये असतः सम्बधानुपपत्तेः सत्वमङ्गीकार्यम् । न द्वितीयः । असम्बद्धत्वाविशेषेण सर्वस्मात् सर्वसम्भवापत्तेः ।

नन्वसम्बद्धत्वेऽपि कारणं तदेव करोति यत्र शक्तम् । तथा च घटासम्बद्धमपि दण्डादि शक्तत्वात् घटमेव करोति न पटं तत्राशक्तत्वादिति चेत् । सा शक्तिः शक्यविषया स्यात्? सर्वत्र वा? द्वितीये पूर्वोक्ता अव्यवस्था । आद्ये त्वसति शक्ये घटादौ तद्विषया शक्तिः दण्डादौ स्यात् ।

किञ्च, तन्तुपटयोस्तावदभेदोऽङ्गीकार्यः । परस्परव्यतिरेकेणानुपलम्भात् । तथा च प्राग्विद्यमानतन्त्वभिन्नस्य पटस्य न प्रागसत्वं युक्तम् ।

तत्रैते प्रयोगाः । 'विमतं प्रागसन्न भवति, कृतिविषयत्वात्', 'न ह्यसतः कर्णमस्ति, कारणसम्बद्धत्वात्', 'न ह्यसतः केनचित् सम्बन्धोऽस्ति, कारणगतशक्तिविषयत्वात्, कारणाभिन्नत्वात्' इत्यादि ।

नन्वसत्वेऽपि प्रयोगाः सन्ति । 'विमतं प्राक् सन्न भवति, कृतिविषयत्वात्', 'न हि प्राक् सिद्धं कृतेर्विषयः, असिद्धविषयस्वाभाव्यात्, प्रागनुपलभ्यमानत्वात्, अर्थक्रियासामर्थ्याभावात्' इत्यादि इति चेत् । कस्येदमनिष्टम्? तर्हि विरोधः कथं परिहरणीयः? इति चेत् । कार्यस्यावस्थाद्वयम् । कार्यावस्था कारणावस्था चेति । तथा च संस्थानविशेषात्मकत्वं कार्यावस्था । तामापन्नस्य प्रागसत्वमेव । परिणामयोग्यत्वात्मकं कारणावस्था । तामापन्नस्य प्राक् सत्वमेवेति पक्षद्वस्याभ्युपगमात् ।

किञ्च, उक्तयुक्तिभिः किं कार्यस्य पूर्वं सत्वासत्वमात्रं साध्यम्? उत कार्यात्मनाऽपि? आद्ये सिद्धसाधनम् । सदसत्कार्यवादे तयोरप्यङ्गीकृतत्वात् । न द्वितीयः । कुलालव्यापारादिवैयर्थ्यप्रसङ्गेन कार्यात्मना सत्वसाधनस्य बाधितत्वात् । कार्यात्मनाऽसत्वसाधनस्य चान्याय्यत्वाच्च ।

अनेन 'कार्यसम्बद्धमेव कारणं कार्यं जनयति, न त्वन्यत् । ततः कार्यात्मनाऽपि सत्वमङ्गीकार्यम्' इत्यादिकोलाहलः प्रत्युक्तः । कार्यात्मना सत्वाभावेऽपि कारणात्मना सत्वमात्रेण कारणस्य सत्सम्बन्धोपपत्तेः ।

एतेनासतः कारणत्वं न सम्भवतीत्येतदपि निरस्तम् । कार्यात्मना सत्वाङ्गीकारेऽपि कारणानुपपत्तेः साम्यात् । न हि सत आत्मादेः केनचित् कारणं दृष्टम् । नन्वसतः कथं कर्मत्वम्? सतः कथं कार्यत्वम्? इत्यपि समानम् । असत उत्पत्तौ

नरविषाणमुत्पद्येतेति चेत् । नरविषाणात्मकस्योपादनस्याभावेन नोत्पद्यते । अन्यथा सत उत्पत्यङ्गीकारेऽपि आत्मनः कुतो नोत्पत्तिः? इत्यस्य परिहाराभावप्रसङ्गः ।

तस्मात् समवायतदेकत्वनित्यत्वादेः प्रागसतः सत्तासमवायो जनिरित्यादेश्च प्रमेयस्य साधकाभावात् बाधकसद्भावाश्चोक्त एव पन्था इति संक्षेपः । **इति भूतविवेकः** ॥

१२ अज्ञानविवेकः

१ लक्षणम्

ज्ञाननिवर्त्यत्वे सति भावरूपत्वमज्ञानस्य लक्षणम् । जीवबन्धकत्वेनाभिमते दुर्गाभिमन्यमाने अविद्यामायाऽज्ञानादिशब्दवाच्ये तमोगुणे 'दृष्ट्वैव तं मुच्यते नापरेण'[४०] 'भूयश्चान्ते विश्वमायानिवृत्तिः'[४१] इति श्रुत्या ब्रह्मज्ञाननिवर्त्यत्वसम्भवात् । 'लोहितशुक्लकृष्णाम्'[४२] इत्यादिश्रुत्या रूपक्रियादिप्रतीतेर्भावत्वसद्भावाच्च लक्षणसमन्वयः । ब्रह्मज्ञानप्रागभावेऽतिव्याप्तिवारणाय भावपदम् ।

२ अज्ञाने प्रमाणानि

नन्वज्ञानसद्भावे न मानम् पश्यामः । उदाहृतश्रुतेरन्यपरत्वात् । 'अहमज्ञः मामन्यं च न जानामि' इत्यादेः प्रत्यक्षस्य ज्ञानाभावविषयकत्वोपपत्तेरिति । उच्यते । 'तद्गुणसारत्वात् तद्व्यपदेशः'[४३], 'पुंस्त्वादिवत्वस्य सतोऽभिव्यक्तियोगात्'[४४] इत्यादिना सूत्रकृता जीवस्य ज्ञानानन्दाद्यात्मकत्वं प्रतिपादितम् । तच्चेदानीं नानुभूयत इति चानुभवसिद्धम् ।

एवं स्थिते प्रयोगः 'तत् केनचिदावृतं भवितुमर्हति, प्रमितत्वे सत्यनुपलभ्यमानत्वात् । यथा प्रमितो घटः अन्धकारेण' 'ज्ञाता वा जीवः स्वरूपावरणभूतयत्किञ्चिद्धर्मयुक्तः, ज्ञातृत्वे सत्यपि स्वरूपाज्ञातृत्वात् । यो ज्ञातृत्वे सति तदज्ञाता स

---

[४०] ?

[४१] श्वेताश्वतरोपनिषदि १-१०

[४२] तैत्तिरीयारण्यके १०-१०-१, महानारायणोपनिषदि ९-२, श्वेताश्वतरोपनिषदि ४-२

[४३] ब्रह्मसूत्रम् २-३-२९

[४४] ब्रह्मसूत्रम् २-३-३१

तदावरणयत्किञ्चिद्धर्मवान् । यथा अन्धकारस्थो देवदत्तः घटज्ञानप्रतिबन्धकान्धकारादिना' इत्यादि ।

न च व्यासङ्गादिनाऽर्थान्तरता । व्यासङ्गाभावदशायामप्यनुपलम्भात् । न ह्यनादौ संसारे क्षणमपि निर्व्यासङ्गो नेति शक्यते वक्तुम् । अतस्तदतिरिक्तं मायाऽविद्याप्रकृतिरित्यादिशब्दाभिधेयम् अन्यदेव किमपि द्रव्यमङ्गीकर्तव्यम् ।

'अनादिमायया सुप्तः'[४५] इत्याद्यागमाश्चात्र सहाया भवन्ति ।

३ अज्ञानस्यावरणत्वसमर्थनम्

नन्वनाद्यज्ञानमपि स्वप्रकाशचैतन्यं कथमावृणोति? न हि दीपप्रकाशमन्धकार आवृणोति । किञ्च, अज्ञानं जडत्वान्न स्वतः कार्यक्षमं इति तस्य कथमावरणत्वम् घटते? अत्रोच्यते । यथा सकर्तृकत्वसाधकानुमानेन सिद्ध्यन्नीश्वरः हेतोः पक्षधर्मताबलाङ्भूधराद्यशेषजगन्निर्माणानुकूलशक्तिज्ञानादिमानेव सिद्धति, नत्वत्र प्रमाणान्तरापेक्षा । तथेहापि प्रतिबन्धकसाधकानुमाने सिद्ध्यदज्ञानं हेतोः पक्षधर्मताबलात् स्वप्रकाशचैतन्याच्छादकशक्तिमदेव सिद्धति । न तत्प्रमाणान्तरापेक्षा । यथा वा स्वयमचेतनमयः अयस्कान्तशिलासन्निधानाद् भ्रमति, तथाऽचेतनमप्यज्ञानं 'बन्धको भवपाशेन'[४६] इति वचनात् स्वान्तर्गतभगवत्सन्निधानेन जीवं संसारयति ।

अन्धकारस्त्वनुमाननैरपेक्ष्येण प्रत्यक्षसिद्धः । अज्ञानं तूक्तानुमानादेव । 'अहमज्ञः, मामहं न जानामि' इत्यादिसाक्षिप्रत्यक्षस्य परेणानङ्गीकारादिति वैषम्यम् ।

४ अनादेरप्यज्ञानस्य निवृत्त्युपपत्तिः

नन्वेवमज्ञानमनादिभावरूपं चेत्, विनाशि न स्यात् । 'विमतमज्ञानं न निवर्तते, अनादिभावत्वात्, गगनवत्' इति प्रयोगसम्भवात् । अत्रोच्यते । अनादेरपि निवृत्तौ बाधकाभावेनाप्रयोजकमनुमानम् । निवर्तकाभावरूपोपाधियुक्तं च । 'भूयश्चान्ते विश्वमायानिवृत्तिः'[४७] इति श्रुत्यैव निवर्तकसद्भावप्रतिपादनेन साधनव्यापकत्वनिश्चयात् । अत एव 'अज्ञानं निवर्तते, निवर्तकवत्वात्' इत्यनुमानदुष्टं च ।

एतेन 'अज्ञानं निवर्तकशून्यम्, अनादित्वात्' इति निरस्तम् । 'भिद्यते हृद-

---

[४५]माण्डूकोपनिषदि २-८

[४६]विष्णुतत्त्वनिर्णयोदाहृतप्रमाणवचनम्

[४७]श्वेताश्वतरोपनिषदि १-१०

यग्रन्थिः छिद्यन्ते सर्वसंशयाः',[४८] 'भूयश्चान्ते विश्वमायानिवृत्तिः'[४९] इत्यादिश्रुत्या बाधात् ।

यथा द्वणुकादौ पटादाविवोपादाननाशप्रयुक्तनाशायोगेऽपि तत्संयोगनाशप्रयुक्तनाशो द्वितीयप्रकारोऽभ्युपगतः । तथाऽनादेर्नाशो तृतीयप्रकारोप्यनुसर्तव्यः । ननु कोऽसौ तृतीयप्रकारः ? इति चेत् । प्रागभावादाविव स्वरूपध्वंसरूपो विनाशः इति गृहाण । सादेर्भावरूपस्योपादानमात्रत्वापत्तिरूपः स्वोपादानगतोत्तरावस्थाविनाशः । अनादेस्तु स्वरूपध्वंस एवेति व्यवस्थोपपत्तेः ।

५ अज्ञानस्य प्रातिस्विकत्वनिरूपणम्

नन्वथाप्यावरकमज्ञानं किमेकम्? उतानेकम्? आद्येऽपि किं सर्वजीवेष्वनुगतम्? उतैकजीवपर्याप्तम्? नाद्यः । 'भिन्नाश्च भिन्नधर्माश्च'[५०] इत्यादिनाऽनुगतधर्मानङ्गीकारात् । द्वितीये तत् किं समानाधिकरणेनैव ज्ञानेन निवर्तते? उत व्यधिकरणज्ञानेनापि? आद्येऽज्ञानाश्रयत्वेनाभिमतजीवस्य यावद्ब्रह्मज्ञानं तावदुत्पन्नज्ञानानामपि संसारित्वं स्यात् । तज्जीवस्य ब्रह्मज्ञानोत्पत्त्यनन्तरमज्ञाननाशेनोत्तरकाले संसारकथोच्छेदप्रसङ्गाच्च । अत एव न द्वितीयः । कृतहानाकृताभ्यागमप्रसङ्गात् । न द्वितीयः । गौरवापातादिति चेन्न ।

> 'अजे द्वे प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते ।
> स्वगुणाच्छादिका त्वेका परमाच्छादिका परा ॥'[५१]

इत्यादिना प्रतिजीवमज्ञानद्वयस्य प्रमितत्वेन गौरवस्यादोषत्वात् ।

६ अनादित्वपरिष्कारः

ननु किमिदमनादित्वम्? किं प्रागभावाप्रतियोगित्वम्? किं वा कारणशून्यत्वम्? आद्येऽपि किं स्वप्रागभावाप्रतियोगित्वम्? किं वाऽन्यप्रागभावाप्रतियोगित्वम्? आहोस्वित् प्रागभावमात्राप्रतियोगित्वम् वा? आद्येऽपि किं स्वप्रागभावः प्रमितः? उत न? आद्ये अज्ञानप्रागभावस्य प्रमितत्वात् प्रतियोगित्वं तत्र प्रसिद्धमिति कथं तदभावः । न द्वितीयः । स्वप्रागभावाप्रसिद्धौ तत्प्रतियोगित्वाभावस्य दुर्ज्ञानत्वात्

---

[४८] आथर्वणोपनिषदि ४-१०
[४९] श्वेताश्वतरोपनिषदि १-१०
[५०] अनुव्याख्याने २-२-१२४
[५१] ?

। न द्वितीयः । घटस्यापि पटप्रागभावाप्रतियोगित्वेनानादित्वापातात् । तृतीये किं मात्रशब्दः कात्स्न्र्यवाची? उत व्यावृत्तिवाची? अथ आभासानाभाससाम्यवाची? नाद्यः । घटस्य स्वप्रागभावप्रतियोगित्वे घटादिसकलप्रागभावाप्रतियोगित्वेनानादित्वापत्तेः । न द्वितीयः । प्रागभावध्वंसोभयप्रतियोगिनि घटेऽतिव्याप्तिप्रसङ्गात् । न तृतीयः । आकाशादिप्रतियोगिकप्रागभावस्यालीकत्वेन प्रागभावसामान्यस्य बाष्पारोपितधूमसामान्यस्येवासत्वात् । द्वितीयेऽपि स्वकारणशून्यत्वम्? अन्यकारणशून्यत्वं वा? इत्यादि विकल्प्य तन्निरासप्रकारश्चोह्यः ।

अत्रोच्यते । प्रागभावाप्रतियोगित्वमनादित्वमत्र विवक्षितम् । नच तत्पक्षोक्तविकल्पासहत्वदोषप्रसक्तिः । स्वप्रागभावस्याप्रसिद्धस्यैव विवक्षितत्वात् । तत् किं प्रतियोगिनोऽसत्वेऽभावोऽपि न स्यादित्यर्थो विवक्षितः? किं वा स्वप्रतियोगिन असत्वे तज्ज्ञानोपायाभावे प्रतियोगिज्ञानपूर्वकमभावज्ञानं न स्यात्? इति । नाद्यः । प्रागभावध्वंसयोः प्रतियोगिसत्वेन व्यावृत्तेऽप्यत्यन्ताभावस्य तेन व्याप्त्यभावात् । अत्यन्ताभावो हि प्रत्युत स्वप्रतियोगिनोऽसत्वमेवापेक्षते । प्रामाणिकप्रतियोगिकात्यन्ताभावानङ्गीकारात् । न द्वितीयः । घटादौ स्वप्रागभावप्रतियोगित्वदर्शनेनाज्ञानादिस्वप्रागभावप्रतियोगिवस्तुत्वाद्घटवत्'(?) इत्यनुमानाभासः । स्वप्रागभावप्रतियोगित्वारोपेणाज्ञाने तदभावप्रतीतिसम्भवात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रमात्वस्य गौरवेणाभावज्ञानकारणतावच्छेदककोटौ प्रवेशाभावात् । एवं स्वकारणरहितत्वं स्वोत्पत्तिरहितत्वमित्यादीनि अनादित्वनिर्वचनान्यूह्यानि । एवमेव नित्यत्वमपि ध्वंसाप्रतियोगित्वं स्वविनाशराहित्यं चेत्यादूहनीयम् । यथोक्तम्

-

'घटादौ प्रमिता तावत् प्रागभावेन युक्तता ।
आरोप्य बुद्धिपूर्वं सा गगनादौ निषिध्यते ॥'[५२]

इति । **इत्यज्ञानविवेकः** ॥

१३ तमोविवेकः

१ द्रव्यत्वसमर्थनम्

अथ तमो निरूप्यते । तस्य द्रव्यत्वे खल्वन्ये विप्रतिपद्यन्ते । तमो न द्रव्यम्, अपि तु आलोकाभाव एव । अन्यथा गौरवप्रसङ्गात् । किञ्च, इदं तद्द्रव्यं नित्यमजन्यम्?

---

[५२] ?

उतानित्यं जन्यम्? नाद्यः । प्रदीपारोपणादिनाऽन्धकारस्य ध्वंसदर्शनात् । तन्नाशेनोत्पत्तिदर्शनाच्च । द्वितीये तदुपादानं वक्तव्यम् । तत् किं निःस्पर्शद्रव्यम्? किं वा स्पर्शवद्द्रव्यम्? नाद्यः । निःस्पर्शद्रव्यस्य द्रव्यान्तरारम्भकत्वादर्शनात् । न द्वितीयः । तमसो निःस्पर्शद्रव्यत्वेन स्पर्शवद्द्रव्योपादेयत्वायोगात् । न हि पृथिवीजातीयं घटादिविजातीयजलाद्युपादेयं दृष्टम् । तस्माद्यावदुद्भूतरूपवत्तेजःसंसर्गाभावस्तमः न द्रव्यान्तरमिति पूर्वपक्षसंक्षेपः ।

अत्रोच्यते । तमो निःस्पर्शद्रव्यम् । तदारम्भकतमःसूक्ष्मभावोऽपि निःस्पर्श एव । निःस्पर्शद्रव्यस्य द्रव्यान्तरोपादनत्वादर्शनं त्वप्रयोजकमेव । न हि रूपादिगुणवतो द्रव्यस्य स्पर्शप्रत्यक्षं वायोरन्यत्र दृष्टमित्येतावता प्रमाणविरुद्धस्तद्गतस्पर्शस्य प्रत्यक्षत्वाभावः स्वीकृतः ।

किञ्च, 'नीलं तमश्चलति' इत्यबाधितप्रत्ययबलात् तमसि रूपादिसिद्धा द्रव्यत्वसिद्धिः । रामायणे हनुमच्छायायां 'वायुपुत्रानुयायिनी'[५३] इति, 'दशयोजनविस्तीर्णा'[५४] इति, 'छायायां सङ्गृहीतायाम्'[५५] इति च, भागवते 'तमः सुघोरं गगनच्छदं महद्विरारयन् भूरितरेण प्रोचिषा',[५६] 'पङ्कीभूतं हि तिमिरम्',[५७] 'अथ पर्वतभूतं तत्'[५८] इत्यादिना च क्रियापरिमाणसङ्ग्रहणचक्रविदार्यत्वकाठिण्यादिना च द्रव्यत्वसिद्धिः । न ह्यभावः क्वचिद्रूपक्रियादिमान् दृष्टः श्रुतो वा ।

यद्यपि निःस्पर्शद्रव्येऽपि क्रियादिः काठिण्यादिर्न दृष्टः । तथाऽप्यदृष्टविशेषादिना श्पर्शवद्द्रव्यसंयोगादिना वा तदुपपन्नम् । अन्यथा करकादेर्जलजातीयत्वाद्यसिद्धिप्रसङ्गः । अभावत्वेऽतु द्रव्यान्तरसंयोगासम्भवेन तदनुपपत्तिरेव । लक्षणं तु प्रकाशविरोधित्वे सति भावत्वं वा । निस्पर्शत्वे सति क्रियावत्वं रूपित्वं वा ज्ञातव्यम् ।

२ पृथक्द्रव्यत्वसमर्थनम्

एवं तमसो द्रव्यत्वे सिद्धे तमो न महत् नाप्यहङ्कारः । अहङ्कारोपादानत्वाभावात्, इन्द्रियोपादनत्वाभावाच्च । नापीन्द्रियाणि । ज्ञानादिसाधनत्वाभावाच्च । नापि मात्राः

---

[५३] 'वायुपुत्रानुगामिनी' वाल्मीकिरामायाणे सुन्दरकाण्डे १-७६,
[५४] वाल्मीकिरामायाणे सुन्दरकाण्डे १-७५
[५५] 'छायायां गृह्यमाणायाम्' वाल्मीकिरामायाणे सुन्दरकाण्डे १-१८३
[५६] भागवते १०-१००-५८
[५७] ?
[५८] ?

। आकाशाद्यनुपादानत्वात् । नापि भूतानि । शब्दादिमात्राजन्यत्वाभावात् । नाप्यज्ञानम् । ज्ञाननिवर्त्यत्वाभावात् । नापि कालादिः रूपादिमत्वादिति परिशेषात् द्रव्यान्तरम् ।

३ विभागः

तद्विविधम् । नित्यमनित्यं च । नित्यं सूक्ष्मरूपम् । अनित्यं कार्यरूपम् । तच्च केवलं प्रकृतिसूक्ष्मैरेवारभ्यते । न तु प्राकृतांशैरुपचीयते । निबिडनिबिडतरत्वादिकं तु द्रव्यान्तरसंयोगोपाधिकम् । अत एव न तत्र संसृष्टासंसृष्टत्वविभागः ।

४ विरोधपरिहारः

'महानहं ।
बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च ॥'[५९]
'अबग्निरनलोऽहंकृन्महत्तत्वगुणत्रयैः'[६०]

इति वचनं न द्रव्येयत्तापरिगणनपरम् । किन्तु, अण्डोपादानत्वस्य दशोत्तरत्वस्य वा परिगणनपरम् । अतस्तत्र तमसोऽपरिगणनं न दोषाय । अन्यथा कालदेशवर्णात्मादीनां तत्रापरिगणनात् तदसिद्धिप्रसङ्ग इति । **इति तमोविवेकः** ।

१४ कालविवेकः

१ लक्षणम्

अतीतादिव्यवहारहेतुः कालः । न चेश्वरादावदृष्टादावपि कार्यमात्रहेतुत्वादतिव्याप्तिः । अतीतादिव्यहारं प्रत्यसाधारणहेतुत्वस्य विवक्षितत्वात् । असाधारणं च न प्रकृष्टत्वम्, येन 'भवन्ति भावा भूतानां मत्त एव पृथग्विधाः'[६१] इत्यादिना ईश्वरस्य प्रकृष्टकारणत्वात् तद्दोषतादवस्थ्यम् । किन्तु विशेषधर्मेण कार्यविशेषं प्रति हेतुत्वम् । ईश्वरः कार्यमात्रं प्रति ईश्वरत्वादिसाधारणधर्मेणैव हेतुः । न पुनः किञ्चित् कार्यविशेषं प्रति तद्गतविशेषधर्मेण । कालस्य कार्यमात्रं प्रति कालत्वरूपसामान्येन रूपेण हेतुत्वेऽपि अतीतादिव्यवहाररूपकार्यविशेषं प्रति अतीतकालत्ववर्तमानकालत्वादिविशेषरूपेणैव हेतुत्वमिति काले लक्षणसमन्वयः ।

---

[५९]तत्त्वसङ्ख्याने-१
[६०]?
[६१]गीता १०-५

२ कालस्वरूपम्

'अतीतादिव्यवहारः किञ्चिदवलम्बनः व्यवहारत्वात्, घटदिव्यवहारवत्' इत्यनुमानात् कालस्वरूपसिद्धिः । न च घटादिनाऽर्थान्तरता । वर्तमानघटेऽपि अतीतादिव्यवहारप्रसङ्गात् । यस्तु तस्य घटादेरतीत्वादिघटकः विशेष्यातिरिक्तः स एव कालः । स च क्षणलवाद्यंशोपेतः । क्षणलवादयश्च प्रत्येकमुक्तरीत्या परमाणव इवानन्तांशोपेताः । अंशाश्च विनाशशालिनः प्रत्येकं व्यापकाश्च । विभव इति यावत् । विभुत्वं चाग्रे निरूप्यते । क्षणलवादिसमुदायात्मकः कालस्तु अनादिनित्यः । 'इदानीं कालो नास्ति' इत्यादिप्रतीतेर्व्याघातात् । कथं तर्हि क्षणलवादीनां साद्यनित्यत्वं तदात्मकस्य कालस्यानादित्वं वा घटते कथम्? न हि साद्यनित्यत्ववद्वृक्षसमुदायात्मकस्य वनस्य ह्यनादिनित्यत्वं दृष्टमिति चेत् । द्विविधं ह्यनादिनित्यत्वम् । स्वरूपतः प्रवाहतश्चेति । साद्यनित्यक्षणलवाद्यात्मकस्य कालस्य स्वरूपतो नित्यत्वासम्भवेऽपि प्रवाहतोऽनादित्वं नित्यत्वं युज्यते ।

३ प्रवाहतोऽनादित्वपरिष्कारः

ननु किमिदं प्रवाहतोऽनादित्वम्? प्रवाहोऽनादिरित्यर्थ इति चेन्न । प्रवाहः किं प्रवाहिभ्यो भिद्यते? उत न? आद्ये प्रवाहिभिन्नः प्रवाहः प्रवाहिभिरुत्पद्यते? उत ज्ञाप्यते? आद्ये प्रवाहिजन्यः प्रवाहः कथमनादिः स्यात्? द्वितीये किं प्रवाहिनां प्रत्येकं ज्ञापकत्वम्? उत मिलितानाम्? नाद्यः । एकैकप्रवाहिदर्शनेऽपि प्रवाहबुद्धिप्रसङ्गात् । न द्वितीयः । तेषामाशुतरविनाशिनां क्रमभाविनां मेलनासम्भवात् । नापि द्वितीयः । सादिप्रवाह्यभिन्नस्य प्रवाहस्यानादित्वायोगात् ।

उच्यते । द्वितीय पक्ष एवाश्रीयते । न हि प्रवाहिभ्योऽतिरिक्तः प्रवाहः घटादिभ्यः पट इव दृश्यते । सजातीयानां प्रवाहिणामेव पूर्वापरकालवृत्तित्वेनोपाधिना प्रवाहशब्दार्थत्वात् । दृष्टचरं चैतत् । एकदेशस्थत्वेनोपाधिनाऽनेकवृक्षाणामेव वनशब्दार्थत्वदर्शनात् । यथोक्तम् -

> 'प्रवाह इति गीयन्ते सजातीयाः प्रवाहिणः ।
> कालेनोपाधिना ग्रस्ताः नानावृक्षा वनं यथा ॥'[६२]

इति । तेषां चानादित्वं एकप्रवाहमध्यपतितानेकप्रवाहिप्रतियोगिकप्रागभावावच्छिन्नकालावृत्तित्वानधिकरणप्रध्वंसप्रतियोगिप्रवाहित्वम् । एकप्रवाहमध्यपतिताः ये अ-

---

६२ ?

नेके प्रवाहिणः तत्प्रतियोगिकाः ये प्रागभावाः तदवच्छिन्नो यः कालः तदवृत्तित्वानधिकरणः यो ध्वंसः तत्प्रतियोगिप्रवाहित्वमित्यर्थः । तथा चैकप्रवाहमध्यपतितानेककालप्रागभावावच्छिन्नसर्गाद्यक्षणवृत्तिकालध्वंसप्रतियोगित्वं कालस्यास्ति । सर्गाद्यक्षणपूर्वक्षणेषु कालसङ्गावात् । न हीदानीं कालः नास्तीति शक्यते वक्तुम् । व्याहतत्वात् । घटादौ घटादिप्रवाहमध्यपतितघटप्रागभावावच्छिन्नसर्गाद्यक्षणकालवृत्तिध्वंसो न घटध्वंसः । सर्गाद्यक्षणपूर्वक्षणेषु घटस्याभावात् । न च तदभावे तद्ध्वंसो युज्यते । न हि प्रलयकाले घटोऽस्ति । सकलकार्यध्वंसरूपत्वात् तस्य । अत एव तत्प्रतियोगित्वाभाव इति न लक्षणस्यास्य तत्रातिव्याप्तिः ।

यद्यपि कामकर्मादेः प्रवाहतोऽनादित्वं तत्र तत्र व्यवह्रीयत इति तत्सामान्याद्घटादेरपि तद्वाच्यम् । तथाऽपि नित्यानित्यं त्रिधा प्रोक्तम् -

'नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ॥'[६३]

इत्यत्र टीकाकृतोक्तं 'एकदेशेनोत्पत्तिविनाशवत्त्वे सति एकदेशेन तदभावरूपं कालमात्रनिष्टं प्रवाहतोऽनादित्वम्' अत्र विवक्षितम् । न चेदं कामकर्मादिसाधारणम् । अत एव प्रागभावावच्छिन्नकालवृत्तिध्वंसाप्रतियोगित्वेन कामकर्मादेर्व्युदासः । घटादेः सजातीयघटप्रवाहमध्यपतितानेकघटप्रागभावावच्छिन्नसर्गद्वितीयक्षणादिरूपकालवृत्तित्वेन तद्ध्वंसस्यापि सम्भवेन पुनरतिव्याप्तिवारणाय नञ्द्वयोपादानम् । उक्तघटध्वंसस्य सर्गाद्यक्षणमादाय प्रागभावावच्छिन्नकालावृत्तित्वसङ्गावाङ्गवति तेन तद्व्युदासः ।

ननु पूर्वसर्गीयघटध्वंसस्योक्तप्रागभावावच्छिन्नैतत्सर्गाद्यक्षणवृत्तित्वात् घटेऽतिप्रसङ्गः । मैवम् । एकप्रवाहमध्यपतितत्वस्य ध्वंसविशेषणत्वस्यापि स्वीकारात् । पूर्वसर्गीयध्वंसस्तु नैतत्सर्गीयप्रवाहमध्यपतितः । न चैवं काले प्रवाहद्वैविध्यमस्ति । प्रलयेऽपि कालपरंपराया विच्छेदाभावेन तत्प्रवाहद्वैविध्यकल्पानासम्भवादिति न कश्चिद्दोषः ।

४ कालस्याखण्डत्वनिराकरणम्

अन्ये तु, एक एवाखण्डः कालः स्वतः । न तु क्षणलवद्यनन्तांशोपेतः । किन्तु सूर्यपरिस्पन्दाद्युपाधिनोत्पन्नांशभेदेन क्षणलवादिसञ्ज्ञाः लभते । अन्यथा सावयवत्वेनानित्यत्वप्राप्तेरित्याहुः । तन्न । क्षणलवाद्यतिरिक्ताखण्डकाले मानाभावात् ।

---

[६३]तत्त्वसङ्ग्राने-८

प्रत्युतोक्तरीत्या क्षणलवादीनां साक्षिवेद्यत्वेन स्वाभाविकत्वावगमात् । उपाधेः स्वतो विद्यमानभेदज्ञापकत्वेऽपि भेदोत्पादकत्वं नास्ति, अन्योन्याश्रयादिति वक्षमाणत्वाच्च ।

५ विभागः

तम इव कालोऽपि शुद्धप्रकृतिसूक्ष्मैरेवारब्धत्वान्न संसृष्टासंसृष्टविभागवान् । न वा शरीरेन्द्रियविषयादिविभागवान् । शिष्टमनुपदमेव वक्ष्यते । **इति कालविवेकः** ।

१५ देशविवेकः

१ लक्षणम्

अव्याकृताकाशः दिगित्यादिशब्दाभिधेयो देशः । स च भूताकाशाद्भिन्न एव । विभुर्नित्यः अनन्तांशवान् ।

२ विभुत्वपरिष्कारः

ननु किमिदं विभुत्वम्? सर्वगतत्वम्? उत सकलमूर्तद्रव्यसंयोगित्वम्? नाद्यः । सर्वगतत्वं हि सर्वेषु विद्यमानत्वम् । न चेदमाकाशे सम्भवति । घटादीनां मध्यमपरिमाणत्वेन तद्वृत्तेराकाशस्य तत्परिमाणप्राप्तेः । 'विमतं मध्यमपरिमाणं तद्वृत्तित्वात्, यद् यद्वृत्ति तत् तत्परिमाणम् । यथा प्रादेशपरिणामभूतलादिवृत्तिघटादि' इति पयोगसम्भवात् । न चेष्टापत्तिः । नित्यत्वोक्तिविरोधात् । 'विमतमनित्यं मध्यमपरिमाणत्वात् घटादिवत्' इति प्रयोगात् । न द्वितीयः । कालभेदेनानेकमूर्तद्रव्यसंयोगस्य घटादिसाधारण्येनैकस्मिन्नेव कालेऽनेकमूर्तद्रव्यसंयोगस्य विरुद्धत्वेनाकाशेऽसम्भवात् । न ह्येकमेव वस्तु युगपदेवानेकवस्तुभिः सम्बद्धुं शक्यमिति चेत् ।

अत्रोच्यते । अत्राद्यपक्षो निरवद्यः । तथा हि । अणुत्वमहत्वमध्यमपरिमाणत्वादीनामापेक्षिकाणां सर्वत्र सम्भवान्न क्वचिद्विश्रान्तिः । अत एव परमाण्वाकाशादीनामंशा अनन्ताः । न चैवमुत्पादविनाशप्राप्तिः 'विमतमुत्पादविनाशी, सांशत्वात्, घटादिवत्' इति प्रयोगसंभवादिति वाच्यम् । अंशो हि द्विविधः । उपादानावयवादिपर्यायः, एकदेशात्मको परः । तत्राद्यस्योत्पादविनाशव्याप्तत्वेऽपि द्वितीयस्य सांशेषु जीवेषु व्याप्त्यभावात् । अत एव चानुमानं सोपाधिकत्वोपाधिग्रस्तम् । 'इह पक्षी' 'नेह पक्षी' इत्यादिप्रयोगप्रत्ययाभ्यामंशस्याकाशे दुर्वारत्वात् पक्षे सा-

धनाव्यापकता । पटस्य तन्तुरूपोपादानभूतोऽंशः हस्तवितस्त्याद्यात्मकः खण्डपटः तदेकदेशभूतोऽंशः इति प्रत्ययप्रयोगाभ्यामंशद्वैविध्यस्य दुर्वारत्वाच्चेत्यादि प्रपञ्चितमन्यत्र ।

तथा च, मध्यमपरिमाणत्वाद्यापादानं किं कृत्स्नस्याकाशस्य? उत तदंशस्य? नाद्यः । कृत्स्नस्याकाशस्य सर्वान्तर्गतत्वगर्भसर्ववृत्तित्वाभावेनापादकासिद्धेः । न द्वितीयः । आपाद्यस्यानिष्टत्वासिद्धेः । आपेक्षिकमध्यमपरिमाणस्य परमाण्वादावपि सङ्गावेनानित्यत्वव्याप्त्यसिद्धेः तदापादनासम्भवात् । परमाणुर्हि स्वांशापेक्षया नाणुः । स्वकार्यद्व्यणुकापेक्षया न महांश्च । अणुत्वमहत्वयोरभावे सति परिमाणवत्त्वं मध्यमपरिमाणवत्त्वमेव नान्यदित्युक्तमधस्तात् । अनित्यत्वे विनाशकारणसामग्रीसङ्गावस्य प्रयोजकत्वेन मध्यमपरिमाणादेरप्रयोजकत्वात् सोपाधिकं चानुमानम् । 'आकाशः सर्वगतश्च नित्यः'[६४] इत्यादिना नित्यत्वावगमात् कालात्ययापदिष्टः ।

अत एव द्वितीयपक्षोऽपि निरवद्यः । यथा एक एव घटः प्राच्येन पुरुषेण युगपदेव प्राग्भावप्रत्यग्भावरूपांशभेदेनानेकद्रव्यसंयुक्तः, तथैकोऽप्याकाशः स्वांशैरनेकद्रव्यसंयुक्त इत्यङ्गीकारे बाधकाभावात् । तथा च सर्वगतत्वं सर्वमूर्तद्रव्यसंयोगित्वं वा विभुत्वमिति निर्वचनं सुस्थम् ।

लक्षणं तु अन्यानन्तर्गतत्वरूपं परममहत्परिमाणवत्त्वम् । यद्यपीदमाकाशकालप्रकृतीश्वरेषु चतुर्ष्वप्यस्ति । तथाऽपि 'कालाद्यन्यत्वे सति' इति विशेषणान्न दोषः ।

३ अंशानां स्वाभाविकत्वसमर्थनम्

यत्तु कश्चिदाह "आकाशे भेदो नास्त्येव' । 'इह पक्षी' 'नेह पक्षी' इत्यादिप्रतीतिगोचरस्तु न स्वाभाविको भेदः । किन्तु घटमठाद्युपाधिकृत एव" इत्यादि । तदयुक्तम् । तथा हि । घटाकाशभेदो घटेन, मठाकाशभेदो मठेन, प्राकाराशभेदः प्राकारेण, उपवनाकाशभेद उपवनेन, गिर्याकाशभेदो गिरिणा । एवं तत्तदाकाशभेदः तत्तदुपाधिना कृत इत्युक्तं स्यात् । तत्रोपाधेः क्वचिदप्यनवस्थितस्य भेदकत्वायोगेन तस्याश्रयगवेषणे, न कृत्स्नाकाशस्तदाश्रयः । निरुपाधिकाकाशस्यास्वाभाविकत्वप्रसङ्गात् । नाप्याकाशैकदेशः । तस्य स्वाभाविकत्वे प्रतिज्ञाव्याघातात् । उपाधिकृत आकाशैकदेशे स्वयं स्थित्वा स्वावच्छिन्नाकाशभेदं जनयतीत्येष एव पक्षोऽवशिष्यते ।

---

६४ ?

तथा च घटः मठाकाशे स्थित्वा घटाकाशं जनयन्, स्वस्यावस्थानसिद्ध्यर्थं घटः स्वयमेव मठाकाशं जनयति? उत मठोपाधिजन्यमठाकाशे स्वयं स्थित्वा घटाकाशं करोति, मठस्तु घटाकाशे स्थित्वा मठाकाशं करोति? किं वा मठः स्वान्येन प्राकारोपाधिना कृते प्राकाराकाशे स्थित्वा मठाकाशं करोति, मठाकाशे स्थित्वा घटः घटाकाशं करोति, तस्मिन्नेव घटाकाशे स्थित्वा प्राकाराख्य उपाधिः प्राकाराकाशं करोति? आहोस्वित् घटाख्य उपाधिः मठाख्योपाध्यन्तरकृते मठाकाशे स्थित्वा मठस्तूपाध्यन्तरकृते प्राकाराकाशे स्थित्वा, प्राकारस्तूपवनाख्योपाध्यन्तरकृते उपवनाकाशे उपवनं चोपाध्यन्तरेण गिरिणा कृते गिर्याकाशे स्थित्वेत्येवं तत्र उपाध्यन्तरप्रदेशेषु स्थित्वा स्वस्वावच्छिन्नाकाशभेदान् कुर्वन्ति? नाद्यः । आत्माश्रयात् । न द्वितीयः । अन्योन्याश्रयात् । न तृतीयः । चक्रकाश्रयात् । न चतुर्थः । अनवस्थानात् । यस्मादेवमौपाधिकभेदो दुष्टः तस्मात् स्वाभाविकभेदोऽभ्युपगन्तव्यः ।

नन्वेवं घटमठाद्याकाशभेदः उपाधिं विनाऽपि कुतो न ज्ञायते? इति चेत् । सूक्ष्मबुद्धेः प्राज्ञस्य तत्तत्प्रदेशभेदज्ञाने तदपेक्षाभावात्, सूक्ष्मबुद्धिरहितस्य तु मूढबुद्धित्वादेव तदपेक्षायामपि दोषाभावात् । तदुक्तम् -

> 'विद्यमानस्य भेदस्य ज्ञापको नैव कारकः ।
> उपाधिर्दृष्टपूर्वो हि खेऽपि देशान्तरस्य सः ॥'[६५]

इत्यादि । इयमेव रीतिः कालावयवस्य क्षणलवादेर्वर्णादेश्च स्वाभाविकत्वे विभुत्वे चानुसन्धेयेति ॥ **इति देशविवेकः** ॥

१६ वर्णविवेकः

अथ वर्णा नित्याः, सर्वगताः, व्यक्तिभेदशून्याः, द्रव्यात्मकाः, आकाशाश्रिताश्च । ननु 'शब्दोऽनित्यः कृतकत्वात्', 'शब्दः कृतकः उच्चारणान्वयव्यतिरेकानुविधायित्वात्', तथा 'शब्दोऽसर्वगतः सर्वत्रानुलभ्यमानकार्यत्वात्', तथा "शब्दः न व्यक्तिभेदशून्यः, 'तारो गकारः' 'मन्दो गकारः' इत्यादिप्रतीसिद्धविरुद्धधर्माधिकरणत्वात्, दहनतुहिनवत्" इत्याद्यनुमानविरोधात् न नित्यत्वादित्रयमङ्गीकर्तुं शक्यम् । किञ्च, नित्यत्वात् सर्वदोपलब्धिप्रसङ्गः, सर्वगतत्वाद्विप्रकृष्टादिसर्वपुरुषैरुपलब्धिप्रसङ्गः, व्यक्तिभेदाभावात् सर्वेषां वर्णानामुपलब्धिप्रसङ्गः, इत्युपलब्धित्रयापादनं

[६५]उपाधिखण्डने ४,५

दुर्वारम् । 'नापि शब्दो द्रव्यम्, सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात्, रूपादिवत्' इत्यनुमानविरोधात्, इति चेत् ।

अत्रोच्यते । शब्दमात्रस्य पक्षत्वे सर्वेष्वेतेषु प्रयोगेषु ध्वन्यात्मकशब्देषूक्तसाध्याङ्गीकारेणांशतः सिद्धसाधनम् । वर्णात्मकशब्दमात्रस्य पक्षत्वेऽप्युक्तहेतूनां स्वरूपासिद्धिः । नचोच्चारणजन्यत्वेन कृतकत्वं साध्यत इति । तस्याप्यसिद्धेः । नचोच्चारणान्वयव्यतिरेकानुविधायित्वात् तत्सिद्धिरिति वाच्यम् । वर्णस्वरूपे तदभावात् । वर्णो हि न स्वरूपेण ज्ञायते । किन्त्वन्धकारावृत्तो घटः स्वज्ञाने स्वव्यञ्जकालोकमपेक्षते । तथा वर्णः स्वव्यञ्जकध्वनिमपेक्षते । तथा चोच्चारणान्वयव्यतिरेकानुविधानं कृतकत्वं च ध्वनेरेव, न वर्णस्येति आद्यो हेतुरसिद्ध एव ।

एतेन 'उत्पन्नो गकारः' 'नष्टो गकारः' इति प्रतीत्या नासिद्ध इति निरस्तम् । वर्णस्यानादित्वात् । तत्प्रतीतेर्वर्णविषयत्वानुपपत्त्या तद्विशेषणीभूतध्वनिविषयत्वोपपत्तेः । नच साक्षाद्वर्णनिष्टतयोत्पादविनाशयोः प्रतीतिविरोध इति वाच्यम् । ध्वनिविनिर्मुक्तस्य केवलस्य वर्णस्याप्रतीतेः । 'स्वर्गो ध्वस्तः' इत्यादाविव 'सविशेषणे हि' इति न्यायेन विशेषणमात्रविषयत्वोपपत्तेः । 'शब्दोऽनित्यः श्रावणत्वात्, शब्दवत्' इति सत्प्रतिपक्षो हेतुः । एवं द्वितीयो हेतुरपि अनेकप्रदेशेषु गोष्टचत्वरादिषु स्थितैरनेकैः पुरुषैर्वर्णस्य युगपदुपलभ्यमानकार्यत्वादसिद्ध एव ।

एवं विरुद्धधर्माणां तारत्वमन्दत्वादीनामुक्तरीत्या वर्णव्यञ्जकध्वनिधर्मत्वेन वर्णधर्मत्वाभावात् तृतीयोऽपि हेतुरसिद्धः । 'सोऽयं गकारः' इति प्रत्यभिज्ञाप्रत्यक्षबाधितश्च ।

चतुर्थोऽपि 'शब्दो द्रव्यं साक्षादिन्द्रियग्राह्यत्वात् घटवत्' इत्याद्यनुमानेन सत्प्रतिपक्षितोऽप्रयोजकश्च ।

यच्चोपलब्धित्रयापादनं तदप्यापातरमणीयम् । तथा हि । वक्तृकण्ठस्थो वायुः तत्तद्वर्णोच्चारणानुकूलप्रयत्नोद्बुद्धः उरःकन्ठप्रभृतीनि स्थातानि प्राप्य तद्गतभूताकाशमुपादानीकृत्य वर्णव्यञ्जकध्वन्यात्मकं शब्दमुत्पादयति । ततः वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा द्वितीयादिशब्दान् श्रोतुः श्रोत्रपर्यन्तमुत्पाद्य श्रोत्रगतध्वनिना सह तत्तद्वर्णग्रहणप्रतिबन्धकश्रोत्रगततिमिरवायुमुपहन्ति । ततः प्रक्षीणप्रतिबन्धकं सन्निकृष्टपुरुषश्रोत्रं वरणं गृह्णाति ।

तथा च वर्णाः प्रतिनियतव्यञ्जकव्यङ्ग्याः । अन्योपलब्धिकालेऽन्यस्यानुपलम्भात् गन्धादिवत् । एवं 'ध्वनयः स्वग्राह्यवर्णनियतिमन्तः तद्ग्राहकत्वे सति तज्जातीयान्तराग्राहकत्वात्, घृतादिवत्' इत्यनुमानेन वर्णादीनां प्रतिनियतव्यञ्जकव्यङ्ग्य-

त्वादिसिद्धौ, यथाऽन्धकारस्थितघटरूपकुंकुमगन्धाभिव्यञ्जकयोरालोकघृतयोरन्यतरसद्भावकालेऽन्यतरस्यैवाभिव्यक्तिः, न तु तयोः, नापि सर्वदा, नापि सर्वेषाम्, तथेहापि वर्णोच्चारणानुकूलप्रयत्नोद्बुद्धवायुजन्यो यो ध्वनिः यदा यदीयश्रोत्रस्थस्य यद्वर्णग्रहणप्रतिबन्धकस्य तिमिरवायोरपहारकः स ध्वनिः तदैव तत्पुरुषं प्रत्येव तद्वर्णस्यैवाभिव्यञ्जकः, नान्यस्येति नियमाश्रयणे कथमुपलब्धित्रयापादनम्?

ननु यावन्तः प्रतिबन्धकाः वायुविशेषादयः तेषां च निरासकाः ध्वनयः तावन्तः ते चान्योन्यासङ्कीर्णकार्यकराः स्वस्वकार्ये तत्तद्वर्णग्रहणरूपे तत्प्रतिबन्धकनिरसने चक्षुषाः नान्यकार्ये इत्यादि बहुकल्पनात् कल्पनागौरवं कुत आश्रयणीयम्? इति चेत् ।

वेदस्तावदनादिरपौरुषेयः, वर्णसमुदायात्मकश्चेति वक्ष्यते । वर्णानामनादिनित्यत्वाद्यभावे तदसम्भवात् । न ह्युत्पत्त्यादिमद्वृक्षसमुदायात्मकं वनमनादिनित्यं भवति । तथा च 'सर्वतो बलवती ह्यन्यथानुपपत्तिः' इति न्यायेन वर्णस्यानादिनित्यत्वसिद्धौ तत्रोपलब्धित्रयप्रसङ्गनिरासाय एतावतोऽर्थस्य कल्पनात् न कल्पनागौरवं दोषः । वर्णः क्वचिदाश्रितः वस्तुत्वाद्घटवदिति कस्मिंश्चिदाश्रये सिद्धे न पृथिव्यादिस्तस्याश्रयः । असर्वगतत्वात् । न हि सर्वगतस्यासर्वगत आश्रयो भवतीति परिशेषेणाव्याकृताकाश एव तदाश्रयः । लक्षणं तु वृत्तिमत्वादिकमेवोह्यम् । **इति वर्णविवेकः** ।

१७ आत्मविवेकः

अथ आत्मा निरूप्यते । 'घटमहं जानामि' इत्यादिप्रतीत्यवलम्बनः । शरीरेन्द्रियप्राणसंयोगादिविशिष्टः जडविशेष एव न ततोऽतिरिक्तः चेतनोऽस्तीति केचित् । तन्न । शरीरादेरनित्यत्वेन कृतहानाकृताभ्यागमप्रसङ्गात् । तथा च तदतिरिक्त आत्माङ्गीकार्यः । लक्षणं तु ज्ञातृत्वम् ।

सोऽयमात्मा द्विविधः । जीवात्मा परमात्मा चेति ।

१ जीवात्मविवेकः

तत्राल्पज्ञानेच्छाकृतिशमदमतेजोबलवीर्यौदार्यसुखादिगुणवान् जीवात्मा । अत्राल्पत्वं ज्ञानादिसर्वगुणानां विशेषणम् । तेन ज्ञानादिमहागुणेश्वरव्यावृत्तिः । बुद्ध्यादयश्चतुर्दशैव गुणा नान्ये जीवे सन्तीति तार्किकाः । तन्न । 'शान्तो भवेत्, दान्तो भवेत्' इत्यादिश्रुत्या शमादिगुणानामप्यवगमात् ।

सात्विक-राजस-तामसभेदेन जीवात्मा त्रिविधः । तत्र सात्विकोऽपि सात्विक-सात्विक-सात्विक-सात्विकादिभेदेनाष्टविधः । तथा हि । सात्विक-सात्विक-सात्विक-सात्विकशब्दचतुष्टयघटिता प्रथमा विधा । सात्विक-सात्विक-सात्विकशब्दत्रयघटिता राजसशब्दोत्तरा द्वितीया । सात्विक-सात्विक-सात्विकशब्दत्रयघटिता तामसशब्दोत्तरा तृतीया । सात्विक-सात्विकशब्दद्वयघटिता राजसशब्दोत्तरा चतुर्थी । सात्विक-सात्विकशब्दद्वयघटिता तामसशब्दोत्तरा पञ्चमी । सात्विक-राजसेति एकसात्विकशब्दघटिता राजसशब्दोत्तरा षष्टी । सात्विक-तामसेति एकसात्विकशब्दघटिता तामसशब्दोत्तरा सप्तमी । राजस-सात्विकेति राजसशब्दघटिता सात्विकशब्दोत्तराऽष्टमी ।

तत्राद्यो विरिञ्चः । द्वितीया सरस्वती । तृतीयो रुद्रः । चतुर्थ इन्द्रः । पञ्चमो बृहस्पत्यादिः । षष्टः ऋषिसङ्घः । सप्तमः पितृगन्धर्वचक्रवर्त्यादि । अष्टमो नरोत्तमसङ्घः ।

स चायं पञ्चविधः । ब्राह्मणक्षत्रियवैश्यशूद्रबाह्यभेदात् । तत्र ब्राह्मणाः शुद्धसात्विकाः । ते च सप्तविधाः । परमहंस-हंस-बहूद-कुटीचक-वानप्रस्थ-नैष्टिक-गृहस्थभेदात् । तत्र शिखायज्ञोपवीतरहितः एकदण्डः बाह्यकर्मरहितः परमहंसः । यज्ञोपवीतवान् एकदण्डी शिखारहितः अल्पबाह्यकर्मयुक्तः हंसः । बाह्यकर्मयुक्तत्वात् पूर्वस्मात् किञ्चिद्ऊनः । एवमग्रेऽपि । त्रिदण्डी शिखायज्ञोपवीतवान् ग्रामैकरात्रिः पूर्वस्मात् किञ्चिदधिककर्मयुक्तः बहूदकः । त्रिदण्डी शिखायज्ञोपवीतवान् यावज्जीवं पुत्रदत्तान्नादः पूर्वस्मात् किञ्चिदधिककर्मवान् कुटीचकः । वन्यान्नभुक् स्त्रीसङ्गरहितः अपशुकर्मवान् वनस्थः । यावज्जीवं दाररहितः गुरुकुलवासी समिच्छेदाग्निपूजापैतृकादिबाह्यकर्मप्रचुरो नैष्टिकः । कृतदारः पशुकर्मयुक्तः गृहस्थः । एवं ब्राह्मणाः शुद्धसात्विकाः । किञ्चिद्रजोयुक्ताः सात्विकाः क्षत्रियाः । समरजोयुक्ताः सात्विका वैश्याः । सत्वात् किञ्चिद्ऊनतमोयुक्ताः शूद्राः बाह्याश्च । एवमग्रेऽपि ।

तदेवं विरिञ्चमारभ्य पुल्कसादिबाह्यान्ताः उक्तविधयाऽष्टविधा जीवा मोक्षयोग्याः सात्विकाः ।

राजसा द्विविधाः । राजस-राजसा राजस-तामसाश्चेति । हरेः सर्वोत्तमत्वं जानन्तोऽपि सन्दिहाना आद्याः । तेऽपि ब्रह्म-क्षत्र-वैश्य-शूद्र-अन्त्यज-भेदभिन्नाः । हरेः सर्वोत्तमत्वमजानन्तः तद्द्वेषरहिताः द्वितीयाः । तदेवं उभयविधा अपि राजसा नित्यसंसारिण इत्युच्यन्ते ।

तामसास्त्रिविधाः । तामस-सात्विकाः तामस-राजसाः तामस-तामसाश्चेति

। तत्राद्या मर्त्याधमाः । तेऽपि ब्राह्मण-क्षत्रिय-वैश्यभेदभिन्नाः हरिद्वेषयुक्ताः । द्वितीया दैत्यभृत्याः । पूर्वस्मादधिकद्वेषयुक्ताः । तृतीयाः प्रधानदैत्याः । पूर्वस्माद-धिकद्वेषयुक्ताः । अत एव सर्वस्मादधमाश्च । तदेवं त्रिविधास्तमोयोग्याः इत्युच्यन्ते ।

आहत्येवमुक्तरीत्या जीवास्त्रयोविंशतिविधाः । ईश्वराज्जीवान्तराज्जडाच्च स्वा-भाविकात्यान्तभेदवन्तः, अणवश्च ।

अन्ये तु जीवो नाणुः । किन्तु विभुः । महत्परिमाणवानिति यावत् । अन्यथा गजादिशरीरे सार्वत्रिकस्पर्शादिज्ञानं न स्यात् । किञ्च, काश्मीरदेशीयस्योपभोग्यं वस्त्रादिकं च काम्भोजदेशे जायत इत्यविवादम् । अदृष्टं च कार्यमात्रे कारणमित्य-वगतम् । तस्य गुणत्वेन गुणिनं विहाय तावद्दूरेऽवस्थानाभावेन कार्योत्पत्तिदेशवृत्ति-कारणस्यैव कार्यजनकत्वनियमेन कार्योत्पत्तिर्न स्यादिति विभुत्वमेवाश्रयणीयमिति ।

तन्न । तस्य विभुत्वाङ्गीकारे स्वशरीर इव घटादावपि सत्वापत्त्या तन्नाशादपि स्वाश्रयनाशाविशेषात् दुःखप्राप्तिः । न चाभिमानविशेष एव दुःखादिनियामकः, स च घटे नास्तीति वाच्यम् । घटे तस्याप्यापादनात् । अतत्कर्मनिर्मितत्वान्नेति चेन्न । शरीरवत् तस्यापि तददृष्टनिर्मितत्वाङ्गीकारात् । न च देशान्तर एतदुपभोग्यवस्त्रा-द्युत्पत्त्यनुपपत्तिः । अदृष्टस्य कलमलगन्धादेरिव दीपप्रभाया इव दूरगमनसम्भवात् । कार्योत्पत्तिदेशसम्बद्धस्यैव वा चक्रभ्रमिजनकदण्डादेरिव कारणत्वोपपत्तेश्च ।

> 'वालाग्रशतभागस्य शतधा कल्पितस्य च ।
> भागो जीवः स विज्ञेयः स चानन्त्याय कल्प्यते ॥'[६६]

इत्यादिवचनविरोधश्च ।

किञ्च, जीवस्य तावच्छरीरोत्क्रान्तिः स्वर्गगतिः स्वर्गादागतिरित्यादिक्रियावि-शेषा आगमेषु प्रसिद्धाः । विभुत्वपक्षे तेषामनुपपत्तिः । नहि विभुराकाशः कस्मा-च्चिद्देशादुत्क्रामति गच्छत्यागच्छति वा । निर्णीतं च 'उत्क्रान्तिगत्यागतीनाम्'[६७] इत्यत्र सूत्रकृता जीवाणुत्वम् ।

अत एव जीवब्रह्मणोरभेदवादिनो निरस्ताः । ब्रह्मणो वक्ष्यमाणरीत्या विभुत्वात्,

---

[६६] ?

[६७] ब्रह्मसूत्रम् २-३-२०

जीवस्य चोक्तरीत्याऽणुत्वात् । नहि विरुद्धयोरैक्यं युज्यते । प्रत्युत, अणुत्वविभुत्वाभ्यां दहनतुहिनयोरिव भेदसिद्धेः ।

एतेन निर्भेदे ब्रह्मण्यणुत्वमहत्वरूपविरुद्धधर्माधिकरणत्वस्य व्यभिचारात् न भेदसाधकत्वमिति निरस्तम् । अणुत्वमहत्वयोः 'अणोरणीयान् महतो महीयान्'[६८] इति श्रुत्यैव जीवेऽवस्थानप्रतीतेः विरोधवार्तायाः एवाभावात् । नहि सहावस्थाने प्रमिते सहानवस्थाननियमलक्षणो विरोधः सम्भवति । ब्रह्मणि अणुत्वमहत्वघटकाया अचिन्त्याद्भुताशक्तेः श्रुतेश्च सद्भाववज्जीवे तयोरभावात् ।

नचेश्वरनिष्टैवाचिन्त्यशक्तिः श्रुतिश्च जीवाभेदं कुतो न घटयेत्? इति वाच्यम् । नहि घटकं घटकमित्येतावता स्वविरोधिनं घटयति । अपि त्वविरोधिनम् । इयं चाद्भुतशक्तिः श्रुतिश्च ब्रह्मणि यदि जीवाभेदं घटयेत, तदा जीव एव तादृशशक्तेरप्युच्छेदप्रसङ्गादित्यभेदशक्तिविरोधीति कथं तमपि घटयिष्यति? तथा च महाशक्त्याद्युपपादकवशेन ब्रह्मणि व्यभिचारेऽपि उक्तहेतुजीवभेदे प्रमाणमेव । तदुक्तम् - 'व्यभिचार्यपवादेन मानमेव भविष्यति' इति ।

एतेन भेद औपाधिकः, अत एव संसारदशायामेव वर्तते । मुक्तौ तु स्वकल्पकोपाधिविनाशात् विनश्यति । अभेदस्तु स्वाभाविकः । अत एव मुक्तौ तद्विनाशेऽपि न विनश्यतीति मतं निरस्तम् । देशविवेकोक्तरीत्याऽऽत्माश्रयादिदोषेणोपाधेर्भेदकत्वानुपपत्तेः ।

नन्वणुश्चेज्जीवः, क्व वर्तते? इति चेत् । हृदीति ब्रूमः । कथं तर्हि पादादिलग्नकण्टकोद्धारादिप्रवृत्तिः? अणोरपि भित्तिकाबिलवर्तिप्रदीपस्य गृहपरिमाणानुसारेण प्रभायाः संकोचविकासवत्, गजाद्यापिपीलिकमणोरपि प्रदेशवृत्तेरात्मनः प्रकाशविशेषस्य संकोचविकासयोः तत्तदेहमानानुसारेणोत्पत्तेरिति संक्षेपः । **इति जीवात्मविवेकः** ॥

२ परमात्मविवेकः

अथ परमात्मा निरूप्यते । स चानन्तकल्याणगुणपरिपूर्णः जीवजडेभ्योऽत्यन्तविलक्षणः ।

अन्ये त्वाहुः । सद्भ्रादिगुणपञ्चकाभावे द्रव्यत्वासिद्धा पञ्चगुणसिद्धिः, ज्ञानेच्छाप्रयत्नानामभावे स्रष्टृत्वासिद्धेः गुणत्रयसिद्धिरिति गुणाष्टकातिरेकेणैकोऽपि गुणो

[६८]तैत्तिरीयारणके १०-१०-१, महानारायणोपनिषदि ८-३, कठोपनिषदि २-२०, श्वेताश्वतरोपनिषदि ३-२०

न सम्भावयितुं शक्यते । कथमीश्वरोऽनन्तगुण इति सम्भावयामः? इति । तन्न । 'सत्यं ज्ञानमनन्तं ब्रह्म'[६९] इति ईश्वरस्वरूपग्राहिणा धर्मिग्राहकमानेनानन्तगुणवत्त्वेनैवेश्वरसिद्धेरङ्गीकारात् । अन्यथा तद्विरोधात् ।

तथा हि । अत्रानन्तशब्दः नास्त्यन्तो मितिः परिच्छेदो यस्येति परिच्छेदाभाववाची । परिच्छेदप्रतियोगिनश्च देशः कालो वस्तुशब्दाभिधेयो गुणश्चेति त्रिविधाः प्रसिद्धाः । 'आकाशोऽनन्तः', 'कालोऽनन्तः', 'बलमनन्तं', 'धनमनन्तम्' इत्यादिप्रयोगदर्शनात् । तथा च परिच्छेदाभावः प्रतियोगिभेदाद्देशपरिच्छेदाभावः, कालपरिच्छेदाभावः, गुणपरिच्छेदाभावः इति त्रिविधः ।

तथा च यथा प्राक्-प्रध्वंस-सदात्वेन प्रतियोगित्रैविध्येन प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावश्चेति त्रिविधोऽप्यभावः 'घटो नास्ति' इत्युक्तेऽविशेषात् प्रतीयते, तथाऽनन्तशब्देनाविशेषात् प्रतीयते त्रिविधोऽपि परिच्छेदाभाव इति गुणपरिच्छेदाभावमुखेनानन्तगुणप्राप्त्या ईश्वरस्याष्टगुणत्वं कथं युज्येत?

ननु यद्यपि अनन्तशब्दो बह्वर्थः । तथापि यथा 'गामानय' 'गां बधान' इत्यादौ गोशब्दो बह्वर्थोऽपि लोकप्रसिद्ध्या प्रथमप्रतीतसास्नादिमद्व्यक्तिविशेष एव पर्यवसितः । न च पृथिव्यादिकमपि प्रतीयत इति । तथा देशापरिच्छेदवत्त्वेन पर्यवसितः न गुणापरिच्छेदमपि प्रत्याययतीति चेन्न । परिच्छेदाभाववाचिनाऽनन्तशब्देन खले कपोतन्यायेन त्रिविधपरिच्छेदाभावस्य युगपदेव प्रतीतेः । प्रतीतौ पौर्वापर्याभावात् । गोशब्दे तु प्रकरणबलात् सास्नादिमद्व्यक्तिविशेष एव प्रथमं प्रतीयते । न पृथिव्यादिकमिति वैषम्यम् ।

एतेन निरवधिकपरिमाणवत्त्वं देशानन्त्यम्, अनवधिकसत्ताकत्वं कालानन्त्यम्, असङ्ख्यगुणवत्त्वं गुणानन्त्यं चेति त्रिविधमप्यानन्त्यमनन्तशब्दाभिधेयमिति अनन्तशब्दः सावकाशः अष्टगुणाद् बाधित इति निरस्तम् । अष्टगुणवत्त्वस्याप्रामाणिकत्वेन तद्बाधोपपत्तेः ।

एतेन गुणपञ्चकाभावे द्रव्यत्वाभावापत्त्या गुणपञ्चकस्य, प्रयत्नाभावे तद्गर्भजगत्कर्तृत्वाभावस्य, इच्छाभावे तज्जन्यकृत्यभावस्य, ज्ञानाभावे तज्जन्येच्छाभावस्य प्राप्त्या प्रयत्नेच्छाज्ञानानां चावश्यकत्वेन प्रयोजनवत्त्वादङ्गीकारेऽप्यनन्तानां गुणानां सृष्ट्यनुपयोगेनाङ्गीकारो न युक्त इत्यनन्तशब्दो गुणानन्त्यांशे संकुचद्वृत्तिरेवेति निरस्तम् । न हि प्रमेयसिद्धिः प्रयोजनाधीना । तथा सति कण्टकशौक्ष्यादेरीश्वरज्ञानेच्छयोश्च

[६९]तैत्तिरीयोपनिषदि २-२

प्रयोजनाभावेनाभावप्रसङ्गात् । किन्तु प्रमाणाधीनैव । प्रमाणं चात्र 'मय्यन्तगुणेनन्ते गुणतोऽनन्तविग्रहे'[७०] इत्यादि । तस्य सङ्कुचद्वृत्तौ नियामकं वाच्यम् । न च नियामकमस्तीत्युक्तम् । प्रयोजनाभावस्य संङ्कोचनियामकत्वे देशकालानन्त्ययोरपि सङ्कोचापत्तेः ।

नन्वनवधिकपरिमाणवत्वरूपं देशानन्त्यं अनवधिकोत्कृष्टपरिमाणवत्वं अनवधिकापकृष्टपरिमाणवत्वं चेति द्विविधम् । न चेदं द्वयम्प्यत्र विवक्षितुं शक्यम् । उत्कर्षापकर्षौ हि स्वरूपतः दहनतुहिनवद्विरुद्धौ । सुतरां तदानन्त्ये । 'परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तम्, परिमाणतारतम्यत्वात्, परिमाणोत्कर्षतारतम्यवत्' इत्यनुमानविरोधश्च । तथा चानन्तशब्दस्य सङ्कोच आवश्यक इति गुणानन्त्येऽपि संङ्कोचः किं न स्यात्? इति चेन्न । तत्र तयोर्विरोधेन सङ्कोचेऽपि, इह तदयोगात् ।

वस्तुतस्तु न तत्रापि सङ्कोचः । उत्कृष्टापकृष्टपरिमाणयोः विरोधस्यैवाभावात् । किं तयोः समस्तयोर्विरोधः? उत एकावधिकयोः? नाद्यः । एकस्मिन्नेव घटे स्वावयवापेक्षया परिमाणोत्कर्षस्य मेर्वपेक्षया परिमाणापकर्षस्य च दर्शनात् । न द्वितीयः । 'अणोरणीयान् महतो महीयान्'[७१] इति श्रुत्यैवैकावधिकयोरेवाणुत्वमहत्वयोः समावेशप्रतिपादनात् । अणीयान् भगवान् अणोः परमाण्वादितो महीयान्, तस्मादणीयांश्च । एवं महीयानिति व्युत्क्रमेणान्वयः । सर्वसाधारण्येनावक्तव्यत्वात् । न च प्रमाणे प्रदर्शितेऽर्थे विरोधोऽस्ति ।

अनुमानं तु परिमाणोत्कर्षस्यापि क्वचिद्विश्रान्त्यनङ्गीकारेण दृष्टान्ते साध्यवैकल्यादप्रमाणम् । तस्मादनन्तशब्दः क्वचिदपि न सङ्कुचद्वृत्तिरित्यानन्त्यत्रयमपि प्रतिपादयतीति कथमष्टगुणवत्वमङ्गीकारार्हम्?

एतेन सुखदुःखयोः समव्याप्तत्वात् सुखसद्भावे दुःखमपि स्यादिति निरस्तम् । व्याप्तेर्लोकमात्रविषयत्वेनालौकिके भगवत्यनादरणीयत्वात् । निर्दोषाभावस्योपाधित्वाच्च । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे'[७२] इत्यादि स्पष्टम् । नात्र प्रमाणान्तरमुदाहर्तव्यम् ।

स्यादेतत् । ईश्वरसद्भाव एव किं प्रमाणम्? अत्रोच्यते । अस्मदादिप्रत्यक्षाभा-

---

[७०]भागवते ६-४-४८

[७१]तैत्तिरीयारणके १०-१०-१, महानारायणोपनिषदि ८-३, कठोपनिषदि २-२०, श्वेताश्वतरोपनिषदि ३-२०

[७२]भागवते ६-४-४८

वेऽपि महतां प्रत्यक्षमेकं प्रमाणम् । न च स्वप्रत्यक्षाभावो दोषः । 'स्वप्रत्यक्षसमं हि तत्' इत्युक्तेः । 'विमतो बन्धः कस्यचित् कोपाज्जायते, बन्धत्वात्, राजकोपप्राप्तशृङ्खलाबन्धवत्', 'विमतो बन्धः कस्यचित् प्रसादात् निवर्तते, बन्धत्वात्, राजप्रसादनिवृत्तनिगूढबन्धवत्', 'विमतं जगत् कस्माच्चिदुत्पत्यादिमत्, कार्यत्वात्, घटादिवत्' इत्यनुमानं द्वितीयम् । यद्यपि मातापितृभ्यां पुत्रादेः, वृष्ट्यादिना सस्यादेः, मुद्गरादिना घटादेरुत्पत्तिस्थितिनाशानामेव कार्यान्तराणां प्रसिद्धतत्कारणादेव सम्भवेन नेश्वरस्योपयोगो दृश्यते । तथाऽपि साधारणकार्याणामन्यथोपपत्तावपि विचित्रतरकार्याणां तेन विनाऽनुपपत्तेः । वस्तुतस्तु 'इतरेऽल्पस्य वा न वा'[७३] इत्युक्तरीत्या तेषां स्वातन्त्र्याभावात्, अतः साधारणकार्यस्यापि तत्सिद्धिरस्ति । 'बन्धको भवपाशेन भवपाशाच्च मोचकः'[७४] इत्यादिना बन्धमोक्षयोर्महाकार्ययोस्तदैकसाध्यत्वावगमात् कथं तस्योपयोगाभावः?

अत्र वादिनः सङ्गिरन्ते । भाट्टास्तावत् नित्यं नैमित्तिकं काम्यं निषिद्धं चेति चतुर्विधं कर्म । तत्र यदकरणे प्रत्यवायः यत्करणे चानागन्तुकं ब्राह्मण्यादिकं निमित्तं तन्नित्यम् । यथा सन्ध्यावन्दनादि । यदकरणे प्रत्यवायः, यच्च पितृमरणाद्यागन्तुकमुपादाय विहितं तन्नैमित्तिकम् । यथा पितृश्राद्धादि । यस्य करणे फलमुपदिष्टम्, अनुपदिष्टश्चाकरणे प्रत्यवायः तत् काम्यम् । यथा कारीर्यादि । यत्करणे प्रत्यवाय उपदिष्टः तन्निषिद्धम् । यथा ब्रह्महत्यादि । तत्र नित्यनैमित्तकयोः करणेन काम्यनिषिद्धयोश्चाकरणेनैव मोक्षसिद्धेः किमीश्वरेण? इति ।

वैशेषिकास्तु द्रव्यादिसप्तपदार्थानां साधर्म्यवैधर्म्यज्ञानमत्रादेव निःश्रेयसप्राप्तिरिति । नैय्यायिकास्तु प्र...[७५]जनादिपञ्चदशानां पदार्थानां तत्वज्ञानादेव आत्मशरीरेन्द्रियप्राणबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदभिन्नद्वादशविधप्रमेयज्ञानद्वारा निःश्रेयसाधिगम इति । साङ्ख्यास्तु, अन्तःकरणं प्रकृतिः जीवः पुरुषः । प्रकृतिपुरुषयोर्भेदज्ञानादेव निःश्रेयसप्राप्तिरिति ।

मायिनस्तु मोक्षो नाम बन्धनिवृत्तिः । स च बन्धो मायिकः, न परमार्थः, शुक्तिरजतादिवत्, प्रतीतिमात्रशरीरत्वात् । स तु बन्धः यथा शुक्तितत्वज्ञानेन निवर्तते, न पुनः स्वनिवृत्तौ ईश्वरप्रसादादिकमपेक्षत इति ।

जैनास्तु पुद्गलज्ञानादेव मोक्षः । पुद्गलस्तु शरीरमात्मा च । तयोर्भेदज्ञानं

---

[७३] ?

[७४] विष्णुतत्त्वविनिर्णयोदाहृतप्रमाणवचनम्

[७५] ६ अक्षराणि तृटितानि

पुद्गलज्ञानम् । धर्मो वा मोक्षसाधनम् । धर्म अहिंसारूप इति । शून्यवादिनस्तु शून्यतत्वपरिज्ञानादेव मोक्षः । मनोवाचामगोचरं निर्धर्मकं च शून्यमिति । पूर्वसदृशस्य विज्ञानस्य ज्ञानाद्ध्यानाद्वा मोक्ष इति वैभाषिकाः । सौत्रान्तिकाश्च पञ्चस्कन्धात्मकस्य प्रपञ्चस्य क्षणिकत्वज्ञानं मोचकम् । रूपस्कन्धः, विज्ञानस्कन्धः वेदनास्कन्धः संस्कारस्कन्धः स्वरूपस्कन्धश्चेति पञ्चस्कन्धाः । तत्र रूपस्कन्धो बाह्यः, अन्ये त्वान्तरा इति ।

न चैतेषु मतेषु ईश्वरस्योपयोगोऽस्ति ।

अत्रोच्यते । आद्येषु पञ्चसु मतेष्वपीश्वरोऽङ्गीकृत एव । 'तन्मे प्रमाणं शिवः'[७६] इति भाट्टवचनात् । वैशेषिकनैय्यायिकयोश्च साधर्म्यवैधर्म्यज्ञानस्य प्रमाणादिषोडशपदार्थतत्वज्ञानस्य वा न साक्षान्मोक्षहेतुत्वम् । किन्तु धर्मद्वारैव । 'यतोऽभ्युदयान्निःश्रेयससिद्धिः स धर्मः'[७७] इति सूत्रात् । धर्मोऽपि न साक्षान्मोक्षहेतुः, अपि तु ईश्वरप्रसादापेक्षयैव । 'तस्येश्वरचोदनाभिव्यक्ताद्धर्मादेव'[७८] इति सूत्रात् ।

'स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥'

इति तदीयवचनाच्च । सेश्वरसाङ्ख्यमतस्य प्रसिद्धत्वाच्च । मायिमतेऽपि विश्वकल्पकाज्ञानस्याश्रयं विनाऽनुपपत्तेः तदाश्रयत्वेनेश्वरोऽङ्गीकृत एव । इतरपञ्चमतेषु ईश्वरानङ्गीकारेऽपि न दोषः । तेषां वेदबाह्यत्वात् ।

'द्यावाभूमी जनयन् देव एकः'[७९] इत्यादिश्रुतयश्चात्रानुसन्धेया इति सङ्क्षेपः ।

इति परमात्मविवेकः ।

---

[७६] ?

[७७] ?

[७८] ?

[७९] ऋग्वेदे १०-८१-३, वाजसनेयीसंहिता १७-१९, मैत्रायणी संहिता २-१०-२, १३३-९, श्वेताश्वतरोपनिषदि ३-३

गुणविवेकः

निरूपितेषु द्रव्येषु तद्धर्मा ये गुणादयः ।
तत्राप्यादौ गुणाः सम्यङ्निरूप्यन्ते माध्वसंविदा ॥

१ लक्षणानि

तत्र गुणत्ववान् गुणः । गुणत्वं च जातिविशेषः । ननु घटादौ रूपादौ च परस्पर-परिहारेण वर्तमानयोर्द्रव्यत्वगुणत्वयोर्गुणत्रयसमावेशलक्षणसाङ्कर्यदोषात् कथं गुणत्वं जातिः? गुणत्रयं हि 'द्रव्यं कर्म च कालश्च'[१] इत्यत्र द्रव्यशब्देनाभिधानात् द्रव्यत्व-जातिमत् । 'सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः'[२] इति गुणत्वेन व्यवहारात् गुणत्ववच्च । न च सङ्कीर्णा जातिर्भवति ।

'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥'[३]

इति जातिबाधकेषु साङ्कर्यस्य परिगणनात् । अन्यथा द्रव्यत्वेन सङ्कीर्णं प्रत्यक्षत्वमपि जातिः किं न स्यात्? इति चेत् ।

स्यादियं विभीषिकाप्रक्रिया अनुगतजातिवादिनां मते । अननुगतजातिवादि-नां मते तु साङ्कर्यदोषवार्तायाया एवाभावात् । तथा हि । यद्यप्यतीन्द्रिये पर-माण्वादौ द्रव्यत्वं प्रत्यक्षत्वेनासहावस्थितम् । प्रत्यक्षत्वमपि रूपादौ द्रव्यत्वेन न

[१] भागवते २-५-१४, २-१०-१२
[२] ?
[३] ?

सहावस्थितम् । तथाऽपि तदुभयमपि घटादौ न वर्तते । परमाणुवृत्तिद्रव्यत्वस्य रूपादिवृत्तिप्रत्यक्षत्वस्य च तत्तन्मात्रवृत्तित्वेन तदुभययोर्घटादौ समावेशायोगात् । परस्परविरुद्धयोर्धर्मयोरेकत्र समावेशो हि साङ्कर्यम् । प्रत्यक्षत्वादेर्जातित्वाभावस्तु अनवस्थादिदोषान्तरादेव न साङ्कर्यदोषादित्युपपत्तेः ।

अथवा यथायथा शब्दतन्मात्रादीनां द्रव्यत्वमेव तज्जन्यशब्दादीनामाकाशादिवृत्तीनां गुणत्वमेव, तथा मूलप्रकृतेः द्रव्यत्वमेव तज्जन्यसत्वादीनां गुणत्वमेवेति व्यवस्थाङ्गीकारे कथं साङ्कर्यम्?

अथवा गुणत्वजातिरिति वदतामस्माकं जातिशब्देनाखण्डोपाधिरेवोच्यते । न तु 'नित्यमेकमनेकानुगतम्' इत्यादिनोक्तसामान्यशब्दोक्ता जातिः । तल्लक्षणस्य दूषयिष्यमाणत्वात् । एवं सर्वत्रापि जातिशब्देनाखण्डोपाधिरेवोच्यते । अतो गुणत्वनिर्वचने न प्रयतितव्यमित्यभिप्रायः ।

अथवा द्रव्यमात्राश्रितत्वं गुणत्वम् । सामान्यादेर्गुणाश्रितत्वाद् व्यावृत्तिः । यद्यपि कर्मणि द्रव्यमात्राश्रितत्वमस्ति । तथाऽपि 'तद्व्यतिरिक्तत्वे सति' इति विशेषणान्न दोषः ।

अथवा गुणत्वव्यवहारविषयत्वं गुणत्वम् । तद्व्यवहारश्चानादिकालाद्रूपादावेव न क्रियादौ । अनादिकालीनव्यवहारस्य स्वतन्त्रेच्छापुरुषवदपर्यनुयोज्यत्वात् । अत एव 'अस्ति घटाभावप्रतियोगित्वव्यवहारे न पटे व्यवहारस्यापर्यनुयोज्यत्वात्'[४] इति मणिसारकृताऽप्यभाषि तर्कभाषाव्याख्यानावसरे । अत एव 'मन्त्रत्वेनाभियुक्तप्रयोगविषयत्वं मन्त्रत्वम्' इति मीमांसकानां मन्त्रत्वनिर्वचनम् ।

२ विभागः

स गुणो बहुविधः । शब्द-स्पर्श-रूप-रस-गन्ध-बुद्धि-सुख-दुःख-इच्छा-द्वेष- प्रयत्न-धर्म-अधर्म-संस्कार-...[५]संयोग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-विरक्ति-भक्ति-शक्ति-शम-दम-ओजो-बल-वीर्य-स्थैर्य-कान्त्यादिभेदात् ।

३ शब्दादिगुणपञ्चकविवेकः

तत्र श्रोत्रग्राह्यो गुणः शब्दः । त्वगिन्द्रियग्राह्यो गुणः स्पर्शः । चक्षुर्मात्रग्राह्यो गुणो रूपम् । रसनग्राह्यो गुणो रसः । घ्राणग्राह्यो गुणो गन्धः ।

---

[४] ?

[५] ६ अक्षराणि तृटितानि

अत्राद्यलक्षणस्य प्रागुक्तरीत्या विविधेषु शब्देषु मध्ये गुणात्मकशब्दो लक्ष्यम् । न द्रव्यात्मकः, मात्राशब्दात्मको वा । तेन मात्रात्मके शब्दे उद्भूतशब्दत्वाभावेन श्रोत्रग्राह्यत्वाभावेऽपि नातिव्याप्तिः । वर्णात्मके श्रोत्रग्राह्यत्वेऽपि गुणत्वाभावान्नातिव्याप्तिः । वर्णात्मकशब्दो व्यङ्ग्यः, ध्वन्यात्मकशब्दो व्यञ्जकश्चेत्युभयं श्रोत्रेन्द्रियेण गृह्यत इति ध्वन्यात्मकशब्दे लक्षणसमन्वयः ।

स च त्रिविधः । संयोगजः, विभागजः, शब्दजश्चेति । तत्राद्यः भेरीदण्डसंयोगजन्यः । द्वितीयो वंशपाटनजन्यः । चटचटशब्दः तृतीयः । द्वितीयादिः श्रोत्रपर्यन्तमुत्पन्नः शब्दः । त्रिविधानामप्येषां द्वितीयादिशब्दानां पूर्वपूर्वशब्दः निमित्तकारणम् ।

अत्र पञ्चस्वपि लक्षणेषु शब्दत्वादिधर्मेष्वतिव्याप्तिवारणाय गुणपदम् ।

१ जातिव्यक्त्योर्भेदाभेदसमर्थनम्

ननु जातिव्यक्त्योरभेदेन गुणत्वमस्तीति कथं तेन तद्वावृत्तिः? मैवम् । भेदस्याप्यङ्गीकृतत्वेन जातेर्गुणत्वाभावात् । तर्हि शब्दत्वादिजातौ कथं लक्षणसङ्गावः? शब्दादेर्व्यक्तिविशेषस्य श्रोत्रादिग्राह्यत्वेऽपि ततो भिन्नेषु शब्दत्वादिषु श्रोत्रादिग्राह्यत्वाभावेन तेषु लक्षणाप्रसक्त्या तद्वारणयोपात्तं गुणपदं व्यर्थमेव । स्यादेतत्, जातिव्यक्त्योर्यद्यत्यन्तभेदः स्यात् । न चैवम् । किन्तु, भेदाभेदौ । तयोः प्रामाणिकत्वात् । 'विमता जातिः स्वश्रयाद् भिन्ना, तस्मिन् सत्यसत्वात्, यो यस्मिन् सत्यसन् स तस्माद् भिन्नः, यथा घटे सत्यसन् पटः घटात्' इत्यादिसम्भवात् । 'विमता जातिः स्वश्रयव्यक्त्यभिन्ना, कुण्डबदरप्रतीतिविलक्षणप्रतीतिविषयत्वात्, व्यतिरेकेण भूतलघटवत्' इति च प्रयोगसम्भवात् ।

नन्वेवं भेदाभेदयोर्विरोधादुभयसाधनं बाधितम् । अन्यथा शैत्यमौष्ण्यं चानुमेयं स्यादिति चेन्न । निरवकाशोभयविधप्रमाणेनान्यत्र विरुद्धयोरपि एकस्मिन् वस्तुनि साधनसम्भवात् । अन्यथा पृथिवीवाय्वोरनुष्णाशीतस्पर्शोऽपि निराकार्यः स्यात् । अत एव निरवकाशप्रमाणेन ब्रह्मणि अणुत्वमहत्वान्तरत्वबाह्यत्वादयो धर्माः सिद्ध्यन्ति । शैत्यानुमानं तु न निरवकाशम् । बाधव्यभिचारदोषसङ्गावेन भ्रान्तिमूलत्वसम्भवात् । औष्ण्यप्रत्यक्षं तु दोषादर्शनेनाभ्रान्तिमूलत्वान्निरवकाशम् । निरवकाशेन च सावकाशस्य बाधो युक्तः । न पुनर्निरवकाशयोरेव परस्परं बाध्यबाधकभाव इति वैषम्यम् । तथा च जातिव्यक्त्योर्भेदाभेदयोरुभयोरपि सद्भावेन भेदेन गुणत्वव्यावृत्तिः, अभेदेन श्रोत्रादिग्राह्यत्वसम्भव इति किमनुपपन्नम्?

नन्वेवं भेदेन श्रोत्रादिग्राह्यत्वाभावः, अभेदेन गुणत्वसङ्गावश्च स्यादिति पूर्वोक्त-दोषतादवस्थ्यम् । मैवम् । न हि भेदाभेदौ केवलमङ्गीक्रियेते । किन्तु, विरुद्धो-भयकार्यप्रतीतौ तदुभयनिर्वाहायैव । ततश्च तदुपहितकार्यनिर्वाहार्थमङ्गीकृतयोस्तयो-र्भेदाभेदयोः कथं विरुद्धकार्यकारित्वं स्यात्? अन्यथा तदुभयसाधनप्रयासो विफलः स्यात् ।

एवं द्वितीयलक्षणे तृतीयलक्षणे च मात्रपदेन सङ्ख्यादिव्यावृत्तिः । यद्यपि तृतीयं लक्षणं सरिसृपादिचक्षुर्ग्राह्येऽतिव्याप्तम् । तथाऽपि तदीयचक्षुर्गोळके श्रोत्रेन्द्रियस्यापि सङ्गावेन तस्य तद्ग्राह्यत्वेऽपि चक्षुर्ग्राह्यत्वाभावः, सार्वजनीनचक्षुर्ग्राह्यत्वस्य विवक्षि-तस्य वा तत्राभाव इति नातिव्याप्तिः ।

एवं पञ्चमलक्षणस्यापि पशुघ्राणग्राह्ये रूपादौ नातिव्याप्तिः । 'घ्राणैः पश्यन्तः पशवः'[६] इति वचनस्येतरेन्द्रियसहकारित्वपरत्वेन तत्र तदभावात् ।

२ विभागः

ते च शब्दादय उद्भूतानुद्भूतभेदेन द्विविधाः । तत्रोद्भूता शब्दादयः भेर्याद्यवच्छिन्ना-काशवाय्वादिषु । अनुद्भूतास्तु श्रोत्रत्वगादिषु ।

३ श्रोत्रादिषु शब्दादिगुणत्वसमर्थनम्

ननु चतुर्विंशतिविधाः परमाणवः चतुर्विंशतितत्वानि जनयन्तीत्युक्तम् । तेषु च सर्वेषु परमाणुषु न शब्दादयः सन्ति । कारणगुणानां स्वकार्यगुणारम्भकत्वनियमेन सर्वत-त्वानां शब्दादिमत्वप्रसङ्गात् । किन्तु कतिपयेष्वाकाशादिपञ्चविधपरमाणुष्वेव तथा । तदारब्धेष्वाकाशादिष्वेव कारणगुणन्यायेन शब्दादिगुणसम्भवेऽपि श्रोत्रत्वगादिषु कथं शब्दादिगुणसम्भवः? श्रोत्रादीनां शब्दादिगुणवत्परमाण्वारब्धत्वाभावात् । उच्यते । श्रोत्रादीनामाकाशादिकारणकत्वात् कारणगुणन्यायेनैव श्रोत्रादिषु शब्दादिगुणसम्भवः ।

ननूद्देशक्रमप्रस्तावे तामसाहङ्कारतत्वभागसहकृतं श्रोत्रादीन्द्रियमकाशादिभूतजन-कमित्युक्तम् । इदानीं तु भूतानामिन्द्रियकारणत्वमुच्यते । तथा च कथं न विरोधः? उच्यते । सृष्टिर्हि द्विविधा । सूक्ष्मा स्थूला चेति । सूक्ष्मसृष्टौ 'तेभ्यो भूतानि जज्ञिरे'[७] इति वचनात् सूक्ष्माणीन्द्रियाणि सूक्ष्मभूतानां कारणमित्युक्तम् । न च

---

[६] ?

[७] ?

तावता इन्द्रियाणां बन्धकतादि सम्भवति । बहुलोपचयाभावेन स्वकार्याक्षमत्वात् । उपचयोह्युपबर्हणम् । वृद्धिरिति यावत् । न ह्यनुपचितः पदार्थः स्वकार्यक्षमो भव ...[१२]स्थूलसृष्टिरारभ्यते । तथा चेन्द्रियाणामुपचयाधिक्यसिद्ध्यर्थं भूतैरुपचयोस्ति । 'तेषां भूतैरुपचयः सृष्टिकाले विधीयते'[१] इति वचनादिति प्रागप्युक्तम् । यथा जले नौः शकटं वहति, स्थले तु नावं शकटो वहतीति परस्परं जलस्थलभेदेन वाह्यवाहकभावो न विरुद्धः, तथेहापि सृष्टिभेदेन परस्परं कार्यकारणभावो न विरुद्ध इति श्रोत्रादिषु शब्दादिगुणसिद्धिः ।

ननु तथापि त्वगिन्द्रियादावुक्तरीत्या स्पर्शाद्या गुणाः सन्तु । तथापि न श्रोत्रे शब्दः । तस्याकाशात्मकत्वेन तस्य च नित्यत्वेन तदाराम्भकपरमाण्वभावेन कारणगुणन्यायानवसरेणाकाशस्यैव शब्दगुणाभावे तदात्मके श्रोत्रे सुतरां शब्दाभाव इत्यादि चोद्यम्, आकाशद्वैविध्यादेः समर्थितत्वेन प्रागेव निरस्तम् ।

किञ्च श्रोत्रं न नित्याकाशात्मकम् । बाधिर्याभावप्रसङ्गात्, निर्जनप्रदेशोत्पन्नशब्दग्रहणप्रसङ्गात्, 'करणशष्कुल्यवच्छिन्ननभः श्रोत्रम्' इति परिभाषा विरोधात्, निःशब्दस्थलगतपुरुषीयश्रोत्रे शब्दगुणकत्वाकाशलक्षणस्याव्याप्तिप्रसङ्गाच्च । न हि निःशब्दप्रदेशे भेरीदण्डादिसंयोगजन्यशब्दमादाय तत्र लक्षणं शक्यमुपपादयितुम् । किन्त्वनित्याकाशात्मकमेव । तस्योक्तरीत्या शब्दवत्वमङ्गीकार्यम् ।

नन्वस्तु श्रोत्रे शब्दः । तस्यानुद्भूतत्वं कुतः? इति चेन्न । यतो भेरीदण्डसंयोगादिना जातो यः शब्दः श्रोत्रसमीपं प्राप्तः स एव श्रोत्रेनानुभूयते । न तु श्रोत्रेन्द्रियगतः । न हि कश्चित् 'श्रोत्रगतमेव शब्दं प्रत्येमि' इत्यनुभवति । 'विमतः शब्दः न श्रोत्रेण गृह्यते, अतिसमीपस्थत्वात् । यो यस्यातिसमीपस्थः स तेन न गृह्यते । चक्षुषोऽतिसमीपस्थपक्ष्मादिर्यथा' इत्यनुमानविरोधाच्च । तथा च फलबलादुद्भूतानुद्भूतत्वविभागोऽपि प्रामाणिकः ।

अत एवेन्द्रियलक्षणे तार्किकप्रदर्शिते शब्देतरपदं व्यर्थम् । श्रोत्रे उद्भूतशब्दाभावेनाव्याप्तिप्रसक्त्यभावात् ।

इयमेव रीतिः त्वगिन्द्रियादौ स्पर्शादिसद्भावे तस्यैवानुद्भूतत्वे द्रष्टव्या ।

---

[१२] अक्षरं तृटितम्

[१] ?

४ स्पर्शादिविभागः

तत्र स्पर्शः उष्ण-अनुष्ण-अनुष्णाशीतभेदात् त्रिविधः । उष्णस्तेजसि । अनुष्णो जले । तृतीयोऽपि द्विविधः । रूपसमानाधिकरणः तदसमानाधिकरणश्चेति । तत्राद्यः पृथिव्याम् । द्वितीयो वायौ ।

रूपं तु शुक्ल-रक्त-नील-पीत-हरित-कपिल-चित्रभेदात् सप्तविधम् । शुक्लादितन्त्वारब्धपटे अर्थसमाजरूपसामग्रीसमावेश(?)महिम्नाऽनेकरूपोत्पत्तिः । न तु चित्राख्यं रूपान्तरमस्तीति केचित् । तन्न । अनेकविरुद्धग्रामिणीनिष्टग्राम इव परस्परविरोधेन रूपमात्रानुत्पत्तिप्रसङ्गात् । त...[१०] नुष्णाशीतस्पर्शादिवत् तत्सामग्रीसमावेशाद्रूपान्तरमेवोत्पद्यते ।

रसोऽपि मधुर-आम्ल-लवण-कटु-तिक्त-कषायभेदात् षड्विधोऽपि जलपृथिव्योः । जले मधुर एवेति व्यवस्थातु जले प्रायेण माधुर्यस्याभिभवाभावात् । न तु रसान्तरस्याभावात् । उक्तरीत्या रसवत्परिमाणुजन्यत्वात् । अन्यथा तत्कार्ये पृथिव्यां सविरसोऽपि न स्यात् ।

सुरभ्यसुरभिभेदेन द्विविधोऽपि गन्धः पृथिव्यामेव । **इति शब्दादिगुणपञ्चकविवेकः** ।

४ बुद्धिविवेकः

१ लक्षणम्

अथ बुद्धिर्निरूप्यते । सा च 'जानामि' इत्यनुव्यवसायसिद्धा सर्वव्यवहारहेतुः । प्रत्ययः शेमुषी धिषणा बुद्धिर्ज्ञानमिति च पर्यायः ।

२ विभागः

तच्च ज्ञानं द्विविधम् । अपरोक्षं परोक्षं चेति । इन्द्रियजन्यं ज्ञानमपरोक्षम् । अत्र जन्यत्वमभिव्यक्त्युत्पत्तिसाधारणं विवक्षितम् । कूपखननाभिव्यक्ते जले तज्जन्यत्वव्यवहारदर्शनात् । तदपि द्विविधम् । आन्तरिन्द्रियजं बाह्येन्द्रियजं चेति । आन्तरिन्द्रियजमपि द्विविधम् । साक्षिजं मनोजमिति । तत्र साक्षिजं सुखादिज्ञानम् । मनोजमपि द्विविधम् । तत्तोल्लेखि तदुनुल्लेखि चेति । तत्राद्यं 'सा गङ्गा', 'सा माता' इत्यादिस्मृतिः । द्वितीयं तु स्वाप्नगजादिज्ञानम् ।

---

[१०]२ अक्षराणि तृटितानि

नन्वस्य मनोजन्यत्वे स्मृतित्वतत्तोल्लेखित्वयोरापत्तिः । मैवम् । सुखदुःखादिज्ञानस्य मनोजन्यत्वेऽपि तदुभयादर्शनेन तस्य तत्राप्रयोजकत्वात् । 'सा गङ्गा' इत्यादौ संस्कारप्रत्यासत्तिकमनोजन्यत्वस्यैव तत्प्रयोजकत्वदर्शनात् । तस्य चेह स्वाप्नगजादेर्मनोवासनामयत्वेनान्तरत्वात्, सुखादिवत्, साक्षान्मनोग्रहणयोग्यत्वात् संस्कारो न प्रत्यासत्तिः । एवं चोपादानस्यान्यस्याभावात् संस्कारः गजाद्युपादानमात्रम् । न तु तद्ग्रहणे प्रत्यासत्तिः ।

बाह्येन्द्रियजं ज्ञानमपि द्विविधम् । चेतनस्वरूपं वृत्तिरूपं चेति । तत्राद्यमीशलक्ष्मीऋजुतात्त्विकातात्त्विकयोगिसात्विकराजसतामसभेदादष्टविधम् ।

३ ईशज्ञानम्

तत्राद्यं स्वपरगताखिलविशेषविषयम् । स्वतन्त्रज्ञानं वा । स्वातन्त्र्यं च ज्ञानस्य स्वरूपप्रमितिप्रवृत्तिषु परानपेक्षत्वम् । तेन लक्ष्म्यादिज्ञानव्युदासः । ज्ञानपदेनेशव्युदासः । न च 'नेह नानास्ति किञ्चन'[११] इत्यादिश्रुत्या ईशतज्ज्ञानयोर्भेदाभावेन ज्ञानत्वमप्यस्तीति वाच्यम् । तथापि गुणगुण्यादिव्यवहारलक्षणभेदकार्यनिर्वाहकेण भेदप्रतिनिधिना विशेषेण निर्भेदेऽपि भगवति ज्ञानत्वाभावव्यवहारोपपत्तेः । यथा चैतत् तथोक्तम्, वक्ष्यते च ।

४ लक्ष्मीज्ञानम्

ईशज्ञानमात्रनिरूपितानधिकस्पष्टताश्रयत्वं लक्ष्मीज्ञानस्य लक्षणम् । तद्धि ऋजुज्ञानादिभ्योऽधिकस्पष्टमपि नेशज्ञानात् । ईशज्ञानवारणायानधिकेति स्पष्टताविशेषणम् । ईशज्ञानगता स्पष्टता सर्वापेक्षयाधिकैवेति तद्व्युदासः । तावत्युक्तेऽसम्भवः । यतो लक्ष्मीज्ञानं ऋजुयोगिज्ञानाद्यपेक्षयाऽधिकस्पष्टम् । अतः ईशज्ञाननिरूपितेति । तावत्युक्ते ऋजुयोगिज्ञानादावतिव्याप्तिः । अतो मात्रपदम् । स्पष्टता च ज्ञानगतो धर्मविशेषः, न विषयकृतः कश्चिद्धर्मः । तेन तत्कृत्यादिव्युदासः ।

५ ऋजुज्ञानम्

ऋजवो नाम ब्रह्मत्वयोग्या जीवाः । योगो नाम समाधिपरिपाकः । अपरोक्षज्ञानमिति यावत् । फलपर्यन्तो हि साधनेषु परिपाकः । समाधिश्च भगवति मनोऽभिनिवेशविशेषः । तस्य च फलमपरोक्षज्ञानमेव । तद्वन्तो योगिन उच्यन्ते ।

---

[११]काठकोपनिषदि २-१-११, बृहदारण्योपनिषदि ४-४-२१

तथा च ऋजूनां योगिनां ज्ञानं ऋजुयोगिज्ञानमिति निर्वचनादेव ऋजुसम्बन्ध्यपरोक्षज्ञानत्वं ऋजुयोगिज्ञानस्य लक्षणं सिद्धति ।

यद्वाऽनादियोगप्रभावलब्धाभिव्यक्तिरूपातिशयोपेतं ऋजुयोगिज्ञानम् । ननु 'क्रमेण वर्धमानमामुक्तेः, मुक्तावेकप्रकारम्' इति ऋजुयोगिस्वरूपज्ञाने मुक्तिदशाया-मेकप्रकारत्वोक्त्याऽतिशयाभावावगमादसम्भवीदं लक्षणमिति चेन्न । अतिशयवत्त्वं संसारदशायां विशेषणम् । मुक्तिदशायामुपलक्षणमिति लक्षणसम्भवात् । मुक्तावेकप्रकारत्ववचनं प्रायिकमित्यप्याहुः । ईशज्ञानस्य स्वपरगताखिलविशेषविषयकत्वाद्यतिशयोपेतत्वेन तद्वारणाय लब्धेति । तथाऽपि स्वरूपज्ञानस्यानागन्तुकविशेषवत्वादभिव्यक्तीति । नित्यस्याप्यभिव्यक्तिसम्भवान्नासम्भवः । तथाऽपि आलोकादिसहकारिलब्धोऽभिव्यक्तिविशेष इत्यस्मदादिघटादिज्ञानेऽतिव्याप्तिः । ततो योगप्रभावेति । तथापि तात्त्विकयोगिज्ञाने तदप्यस्तीत्यनादीति । न च योगः तात्त्विकयोगिनामनादिः । 'दशकल्पं तपश्चीर्णम्'[१२] इत्यादेः सादित्वावगमात् । ऋजूनां तु 'सह सिद्धं चतुष्टयम्'[१३] इत्युक्तेरनादिरेवेति नासम्भवः ।

ननु योगप्रभावेन सर्वार्थविषयकतारूपातिशयो हि लब्धव्यः । न चैतदृजुयोगिस्वरूपज्ञाने सम्भवति । तज्ज्ञानस्य सर्वदा सर्वार्थविषयीकरणस्वाभाव्यात् । अनादेरन्याधीनत्वानुपपत्तेश्च । उच्यते । अधिकार्थविषयीकरणसमर्थस्यापि प्रतिबन्धकदशायां तदभावदर्शनेनान्धकारावृतस्य घटस्य सतोऽपि दीपप्रकाशादिभिरभिव्यक्तिरिव योगेनाभिव्यक्तिरपेक्षितैव । अनादेरपि सर्वार्थविषयीकरणसामर्थ्याख्यातिशयस्य तदीययोगाधीनत्वं चोक्तम् । यथाऽनादेः प्रागभावादेः प्रतियोग्यधीनत्वम् ।

ननु स्वरूपज्ञानाभिव्यक्तौ तद्गतसर्वविषयीकरणसामर्थ्याभिव्यक्तौ वा न योगप्रभावोऽपेक्षितः । साक्ष्येव हि स्वरूपज्ञानम् । स च 'घटमहं जानामि' इत्यनुव्यवसाय एव । तस्य च विषयाः आत्मसुखादयः, तद्धर्माश्च साक्षिणा गृह्यन्ते, न तु निमित्तान्तरमपेक्षन्ते । तत् कथं तदभिव्यक्तेर्योगाधीनत्वम्? उच्यते । सत्यमेवम् । तथाऽपि देशकालादिव्यवहितमेरुगुहान्तर्वर्तिवस्तूनां साक्षिविषयत्वायोग्यानां विषयीकरणे योगोऽपेक्षित एव । एवमन्यत्रापि ।

---

१२ ?

१३ ?

६ तात्त्विकयोगिज्ञानम्

अनादियोगप्रभावलब्धाभिव्यक्तिरूपातिशयवत्त्वं तात्त्विकयोगिज्ञानस्य लक्षणम् । नन्विदं ऋजुयोजिज्ञानस्य लक्षणम् । सत्यम् । अनादित्वं द्विविधम् । मुख्यामुख्यभेदात् । निरवधिकानादित्वं मुख्यम् । अवधिमत्त्वेऽपि बहुकालीनत्वममुख्यम् । इह लक्षणेऽमुख्यानादित्वं विवक्षितम् । पूर्वलक्षणे मुख्यानादित्वमित्युभयोर्भेदः ।

७ अतात्त्विकयोगिज्ञानम्

सादित्वे सति योगप्रभावलब्धाभिव्यक्तिरूपातिशयवत्त्वमतात्त्विकयोगिज्ञानस्य लक्षणम् । नन्वनादिजीवाभिन्नं स्वरूपज्ञानं कथं सादि? उच्यते । यथा ऋजुयोगिज्ञानं निरवधिकानादिकालीनत्वात् मुख्यानादि, यथा वा तात्त्विकयोगिज्ञानममुख्यानादि, न तथाऽतात्त्विकयोगिज्ञानम् । किन्तु, एतत्कल्पीययोगेनैवाभिव्यज्यत इत्यनया विवक्षया सादित्वोक्तिर्न विरुद्ध्यते । अत्र त्रिष्वपि लक्षणेषु विवक्षितस्य त्रिविधस्यानादित्वस्यापि बाह्यजन्यज्ञानेष्वभावान्नातिव्याप्तिः ।

८ सात्विकादिज्ञानम्

ईश्वरादन्यत्र प्रचुराज्ञानसहिताजन्यज्ञानत्वं सात्विकादिचेतनत्रयस्वरूपज्ञानस्य लक्षणम् । तज्ज्ञानेष्वज्ञातांशाः बहवः, ज्ञातांशस्त्वल्प एवेति लक्षणसमन्वयः ।

९ वृत्तिज्ञानम्

वृत्तिरूपं ज्ञानमपि ऋजु-तात्त्विक-अतात्त्विक-सात्त्विक-राजस-तामसज्ञानभेदात् षड्विधम् । अत्राभिव्यक्तिपदस्थाने जन्यपदप्रक्षेपेण ऋजुज्ञानादीनां वृत्तिरूपाणां षण्णां लक्षणान्यूह्यानि । तदेवमपरोक्षज्ञानं निरूपितम् ।

१० परोक्षज्ञानम्

इन्द्रियाजन्यं ज्ञानं परोक्षम् । तद्विविधम् । लिङ्गजं शब्दजं चेति ।

११ पुनर्विभागः

पुनर्ज्ञानं द्विविधम् । प्रमा भ्रमा चेति । यथार्थज्ञानं प्रमा । तद्वति तत्प्रकारकमिति यावत् । तद्भिन्न ज्ञानं भ्रमः । सोऽपि द्विविधः । संशयो विपर्ययश्चेति । एकस्मिन् धर्मिणि विरुद्धनानाकोटिकज्ञानं संशयः । तस्य च कारणानि साधारणधर्म-असाधारणधर्म-विप्रतिपत्ति-उपलब्धि-अनुपलब्धिरूपणि पञ्चकारणानीत्याहुः ।

असाधारणधर्मादीनां कोट्युपस्थापकत्वसाम्येन साधारणधर्म एवान्तर्भावात् साधारणधर्म एक एव संशयकारणमिति तत्त्वम् ।

विपरीतनिश्चयो विपर्ययः । सोऽपि गृह्यमाणारोपः, स्मर्यमाणोरापश्चेति द्विविधः । आद्यो यथा 'लोहितः स्फटिकः' इति । अत्र हि जपाकुसुमे गृह्यमाणं लौहित्यं स्फटिक आरोप्यते । अत एवायं सोपाधिकभ्रम उच्यते । द्वितीयो यथा 'शुक्तिकायामिदं रजतम्' इति । अत्र ह्यापणादावनुभूतरजतस्मरणेनान्त्यन्तासद्रजतमारोप्यते ।

तत्र राजसतामसस्वरूपज्ञानद्वयं विहाय स्वरूपज्ञानषट्कं प्रमैवेति नियमः । राजसादिस्वरूपज्ञानद्वयमप्रमैवेति नियमः । तत्रापि राजसज्ञानं संशय एव । तामसज्ञानं विपर्यय एव । ऋज्वादीनां षण्णां परोक्षापरोक्षभेदेन द्विविधमपि वृत्तिज्ञानं प्रमा भ्रमश्चेति द्विविधम् । तद्वति तत्प्रकारकं चेत्, प्रमा । विपरीतं चेत्, भ्रम इति व्यवस्था ।

१२ प्रमा

एवमनेकविधेषु ज्ञानेषु प्रमारूपं ज्ञानं तत् प्रमाणमुच्यते । अन्यत् स्वरूपास्वरूपभेदभिन्नं संशयादिरूपं ज्ञानमप्रमाणम् ।

१३ प्रमाणस्य लक्षणं परीक्षा च

ननु प्रमाकरणं प्रमाणमिति तार्किकाः सङ्गिरन्ते । तत् कथं प्रमैव प्रमाणम्? सत्यम् । प्रमाणविशेषलक्षणं चैतत् । न तु प्रमाणसामान्यलक्षणम् । किं तत् सामान्यलक्षणम्? इति चेत् । याथार्थ्यमिति गृहाण । यथावस्थितज्ञेयविषयीकारित्वमिति यावत् ।

नन्वत्र प्रमितिः प्रमाणमिति भावे प्रमाणशब्दं व्युत्पाद्य किं प्रमितिर्लक्ष्यम्? उत प्रमीयतेऽनेनेति करणम्? अथवा प्रमीयतेऽत्रेत्यधिकरणम्? आहोस्विन्नैघण्टकरीत्या प्रमिनोतीति कर्ता? नाद्यः । चक्षुरादावपि शास्त्रे प्रमाणत्वव्यवहारेण तदसङ्ग्रहापत्तेः । तत्रेष्टापत्तौ वक्ष्यमाणरीत्या तत्र लक्षणस्यातिव्याप्तिः स्यात् । न द्वितीयः । यथार्थज्ञानेऽपि शास्त्रे प्रमाणत्वेन व्यवहारात् तदसङ्ग्रहापत्तेः । तत्रेष्टापत्तौ तूक्तो दोषः । न तृतीयः । शास्त्रे प्रमाधिकारणे भूतलादौ प्रमाणव्यवहाराभावेन तत्सङ्ग्रहायोगात्, योगे च निर्विषयत्वेन तत्त्वलक्षणस्यासम्भवः । अत एव न चतुर्थः । व्याकरणविधानं चाधिकम् । यतः पाणिनिः 'भावे'[१४] इत्यधिकृत्य 'करणा-

[१४]अष्टाध्यायी ३-३-१८

धिकरणयोश्च'[१५] इत्येवासूत्रयत् । न पुनः 'कर्तरि च' इति प्रमाणशब्दमनुशशास ।

ननु यतः 'करणाधिकारयोश्च' इत्यसूत्रयत् तत एवासूत्रयत् 'कर्तरि च' इति । तथा हि । अधिकरणं नामाधार एव । आधारश्चाश्रयः । स च क्वचित् कर्म । यथा 'ओदनं पचति देवदत्तः' इत्यत्रौदनः । अत्र हि पाकोविक्लित्तिः तदाश्रय ओदन एव । क्वचित् कर्ता । यथा 'ओदनं भुङ्क्ते देवदत्तः' इत्यत्र देवदत्तः । स हि भुजिक्रियाश्रयः । तथा च 'करणाधिकरणयोश्च' इति सूत्रे कर्त्रादेरपि ग्रहणसम्भवेन कर्तर्यपि ल्युड्विहित एवेति चेन्न । 'करणाधिकारयोश्च' इति सूत्रेऽधिकरणशब्देन 'आधारोऽधिकरणम्'[१६] इति सूत्रे परिभाषितामुख्याधारत्वस्यैव विवक्षितत्वात् । व्याख्यातं चैवमेव "आधारोऽधिकरणमिति सूत्रममुख्याधारपरम्' इति । अन्यथा 'कटे शेते देवदत्तः', 'वचे(?) गाः सञ्चरन्ति' इत्यादौ कटादेः शयनक्रियां प्रति मुख्याश्रयत्वाभावेन सप्तमी न स्यात् । स्याच्च देवदत्तादेर्मुख्याश्रयत्वात् । तस्मात् सप्तमी । तथा च लक्ष्यस्वरूपनिर्धारणमशक्यमिति चेत् ।

अत्रोच्यते । शास्त्रीयव्यवहाराभावात् कर्त्रधिकरणयोरसङ्ग्राह्यत्वं यतस्त्वयोपपादितम्, अतोऽस्माकमर्धमवसितं भारस्य । तत्र शास्त्रे प्रमितौ तत्करणे च प्रमाणत्वव्यवहारात् तदुभयमपि लक्ष्यम्, नान्यतरदेव । 'अन्योन्यस्मिन्' इति व्याप्तेः । उभयत्र लक्षणसमन्वयस्तु ज्ञानेच्छाकृतीनां सविषत्वस्वाभाव्येन प्रमितौ साक्षात्, तत्करणे प्रमितिद्वारा परम्परयैव । यथाऽनुव्यवसाये साक्षाद्घटादिविषयीकारित्वाभावेऽपि व्यवसायद्वारा परम्परया घटादिविषयीकारित्वम् ।

नन्वेवं ज्ञानद्वारा तत्करणे ज्ञेयविषयीकारित्ववत् कर्त्रधिकरणयोरपि ज्ञानद्वारा परम्परया ज्ञेयविषयीकारित्वसम्भवेन तत्रातिव्याप्तिः स्यात् । उच्यते । ज्ञानद्वारा ज्ञेयविषयीकारित्वं ज्ञानसाधन एवास्ति । न त्वन्यत्रेत्यस्ति नियमः । अत एव ज्ञानसाधनशास्त्रस्यारम्भणीयत्वसिद्ध्यर्थं सविषयकत्ववर्णनं प्रत्यधिकरणं च । न पुनरन्यत्र ज्ञानसम्बन्धिनि सविषयत्ववर्णनम् । अन्यथा परम्परासम्बन्धकथोच्छेदप्रसङ्गः । तथा च ज्ञानाश्रयत्वज्ञानकारणत्वरूपपरम्परासम्बन्धसद्भावेऽपि कर्त्रधिकरणादेर्ज्ञानसाधनत्वाभावेन परम्परया तत्र ज्ञेयविषयीकारित्वलक्षणस्यातिव्याप्तिवर्णनमसङ्गतम् ।

---

[१५]अष्टाध्यायी ३-३-११७

[१६]अष्टाध्यायी १-४-४५

इच्छाकृतिगत्यादीनां ज्ञानवत् सविषयकत्वस्वाभाव्येन धनघटग्रामादिरूपार्थविषयीकारित्वसद्भावेनेच्छादिष्वतिव्याप्तिवारणाय ज्ञेयपदम् । यद्यपि ज्ञेयत्वस्य केवलान्वयित्वेन धनादौ देवदत्तादिना ज्ञेयत्वमप्यस्ति । तथाऽपि पितरि वर्तितव्यमित्यादाविव ससम्बन्धिकपदानां प्रकृतपरत्वस्वाभाव्येनेहापि ज्ञेयपदस्य प्रकृतपुरुषपरत्वेन कामयितृकर्तृगन्तृपुरुषाद्यपेक्षया इष्टत्वकार्यत्वगम्यत्वादिकमेव धनादीनाम्, न तु तत्र तत्पुरुषज्ञेयत्वमस्तीति भवति ज्ञेयपदेन तद्व्युदासः ।

ज्ञेयविषयीकारित्वमात्रे कृते संशयविपर्ययतत्साधनेष्वतिव्याप्तिः । अतो यथावस्थितेति विशेषणम् ।

ननु सर्वं ज्ञानं यथार्थमेव । नतु कश्चित् ज्ञाने प्रभेदोऽस्तीति व्यावर्त्याभावाद्यथावस्थितपदं व्यर्थमेवेति चेन्न । ज्ञाने बहवः प्रभेदाः प्रामाणिकाः सन्ति । तथा हि । किञ्चिज्ज्ञानं स्वार्थनिश्चायकम् । 'पृथुबुध्नोदरो घटः' इत्यसम्भावनाशङ्काया अभवात् । किञ्चित् स्वार्थानिश्चायकम् । यथा सवितरि सुषिरज्ञानम् । असम्भावनाशङ्कायाः सद्भावात् । नहि कश्चित् सवितरि सुषिरं सम्भावयति । अथवा सत्यजलज्ञानं स्वार्थनिश्चायकम् । प्रवृत्तिसम्भवात् । किञ्चित् स्वार्थानिश्चायकम् । यथा मृगतृष्णायां जलज्ञानम् । प्रवृत्तिविसंवादात् । अथवा किञ्चित् स्वार्थनिश्चायकम् । यथा 'शुक्लः पटः' इति । पटे कदाऽपि शौक्ल्यानुभवविपरीतानुभवाभावेन तज्जनितसंस्काराभावात् । किञ्चित् स्वार्थानिश्चायकम् । यथा 'पीतः शङ्खः' इति । शङ्खे प्रागेव पैत्यविपरीतशौक्ल्यानुभवजनितविपरीतसंस्कारसद्भावादित्येककोटिकज्ञाने प्रभेदाः ।

अथानेककोटिकज्ञानेष्वपि सम्भाव्यन्ते प्रभेदाः । किञ्चित् द्विकोटिकम् । यथा 'स्ताणुर्वा पुरुषो वा' इति । किञ्चित् बहुकोटिकम् । यथा 'किमयं ब्राह्मणः क्षत्रियो वैश्यो वा' इति । किञ्चित् अनिर्दिष्टकोटिकम् । यथा 'किंसञ्ज्ञकोऽयं वृक्षः?' इति । किञ्चिदन्यतरकोटिप्रचुरम् । यथा 'प्रायेणानेन देवदत्तेन भवितव्यम्' इति । नचैते प्रभेदा अप्रामाणिका इति वाच्यम् । 'एतावन्तं कालमेनं स्थाणुत्वपुरुषत्वादिना सन्दिहानोऽस्मि', 'मृगतृष्णादि जलत्वादिना विपर्यासितोऽस्मि' इत्यनुव्यवसायसिद्धत्वात् ।

उदयनस्तु "प्रमाव्याप्तत्वं प्रमाणसामान्यलक्षणम् । 'यदेश्वरश्चक्षुरादिर्वा तदा प्रमा' इति व्याप्तेरिदं लक्षणमीश्वरे चक्षुरादौ चास्ति" इत्याह । तन्न । 'यदा प्रमाता जीवः, प्रमेयो घटो वा तदा प्रमा' इति व्याप्तिसम्भवात् प्रमातृप्रमेययोरतिव्याप्तेः । नन्वनेन साधनाश्रययोरन्यतरत्वमेव विवक्षितम् । प्रमातृप्रमेययोर्न तदन्यतरत्वम् । आश्रयत्वाभावात्, साधनत्वाभावाच्चेति चेन्न । पूर्वोक्तरीत्या ईश्वरे शास्त्रीय-

प्रमाणशब्दव्यवहाराभावेन कर्तरि प्रमाणशब्दाननुशासनाच्चालक्ष्यत्वेन, अप्रमायां च तदुभयसङ्गावेन लक्ष्यत्वाच्च, ईश्वरप्रमायां चातिव्याप्त्यव्याप्त्योरापत्तेः ।

अनुभूतिः प्रमाणमिति प्रमाणसामान्यलक्षणमप्ययुक्तम् । 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्'[१७] इत्यादिना, मनोविवेकोक्तरीत्या च स्मृतेः प्रमाणत्वेन प्रमासाधनस्य चक्षुरादेश्च प्रमाणत्वेन तयोरव्याप्तेः । संशयविपर्ययययोरतियाप्तेश्च ।

एतेन ज्ञाततायाप्राकट्यापरपर्यायस्य प्रमेयाश्रितस्य प्रकाशविशेषस्य साधनं ज्ञानं प्रमाणमिति निरस्तम् । ज्ञानातिरिक्तायां ज्ञाततायां प्रमाणाभावात् । अतीतादिज्ञानेऽव्याप्तेश्च ।

एतेनाज्ञातार्थविषयकपदार्थज्ञानसाधनं प्रमाणमिति च निरस्तम् । वेदसमानार्थकस्मृतिपुराणवाक्यं प्रमाणमिति तत्राव्याप्तिश्चेति सङ्क्षेपः ।

तदेवं दुर्मतविषतरूद्दाहदक्षप्रमाणज्वालामालाधरोक्तः पन्थाः सुपन्थाः ।

१४ प्रमाणविभागः

तच्च प्रमाणं द्विविधम् । केवलप्रमाणं अनुप्रमाणं चेति । साक्षाज्ज्ञेयविषयीकारित्वात् केवलस्य प्रथममुद्देशः । तद्वारैव ज्ञेयविषयीकारित्वात् तदनन्तरमनुप्रमाणस्य ।

१५ केवलप्रमाणम्

तत्र यथार्थज्ञानत्वं केवलप्रमाणस्य लक्षणम् । यथावस्थितज्ञेयविषयीकारित्वे सति ज्ञानत्वं इति यावत् । यथावस्थितेत्यनेन संशयविपर्ययययोः स्वरूपास्वरूपयोर्व्युदासः । ज्ञानत्वमित्यनुप्रमाणस्य ।

नन्वनुमितिशाब्दप्रमितिसाधनयोरनुप्रमाणयोर्धूमज्ञानशब्द-
ज्ञानयोर्यथावस्थितज्ञेयविषयीकारित्वे सति ज्ञानत्वमप्यस्तीति तयोरतिव्याप्तिरिति चेन्न । साक्षाज्ज्ञेयविषयीकारित्वस्य ज्ञानपदेनैव विवक्षितत्वात् । धूमादिज्ञानं ज्ञेयवह्न्यादिस्वरूपं धूमादिकमिव न साक्षाद्विषयीकरोति । किन्तु चक्षुरादिवत् वह्न्यादिज्ञानसाधनत्वरूपपरम्परासम्बधेनैवेति भवति तद्व्युदासः । तर्हि घटज्ञानेदेरिव धूमज्ञानादेरपि केवलप्रमाणत्वेन लक्ष्यत्वात् तत्रोक्तरीत्या साक्षाज्ज्ञेयविषयीकारित्वाभावादव्याप्तिः स्यादिति चेन्न । धूमज्ञानादेः साक्षाद्वह्न्यादिविषयीकारित्वाभावेऽपि स्वस्वविषये साक्षाज्ज्ञेयविषयीकारित्वानपायात् । इदं च लक्षणं ईश्वरादिसात्विकान्तचेतनस्वरूपेषु षट्सु विरिञ्चादितामसान्तचेतनसमधिवृत्तिरूपेषु षट्सु यथार्थज्ञानेषु

[१७]प्रमाणलक्षणोदाहृता श्रुतिः

चोक्तरीत्याऽनुसन्धेयम् ।

१६ केवलप्रमाणविभागः

तच्च केवलं त्रिविधम् । प्रत्यक्षानुमितिशाब्दभेदात् । यद्यप्युक्तरीत्या प्रत्यक्षज्ञानादीन्यनन्तानि । तथाऽपि प्रत्यक्षत्वानुमितित्वशाब्दत्वरूपमानविभाजकोपाधित्रैविध्येन प्रत्यक्षादिज्ञानराशित्रैविध्यसम्पादनसम्भवेन त्रैविध्योक्तिः । एवमन्यत्राप्यनुसन्धेयम् ।

अत्र प्रत्यक्षस्यानुमितिं प्रति कारणत्वात् प्रथममुद्देशः । अनुमितेस्तु तज्जन्यत्वात् पश्चादुद्देशः । 'विमतं प्रत्यक्षं अनुमितेः प्रथममुद्देष्टव्यम्, अनुमितिजनकत्वात् । यद्यज्जनकं तत् ततः प्रायेण प्रथममुद्देष्टव्यम् । यथा गुणाद्रव्यम्', 'विमताऽनुमितिः प्रत्यक्षात् पश्चादुद्देष्टव्या, तज्जन्यत्वात् । यद्यज्जन्यं तत् ततः प्रायेण पश्चादुद्देष्टव्यम् । यथा गुणः' इति प्रयोक्तव्यम् ।

नन्वाद्ये प्रयोगे अनुमितिजनकत्वहेतुपक्षे प्रत्यक्षे भागासिद्धः । 'अयं घटः' इत्यादेः 'सुरभिश्चन्दनखण्डः' इत्यादेः परमाण्वाद्यतीन्द्रियगोचरानुमितिविषयकानुव्यवसायादेश्च प्रत्यक्षस्यानुमितिजनकत्वाभावात् । भागासिद्धस्यादोषत्वमङ्गीकृत्य कतिपयस्य पक्षादिप्रत्यक्षस्यानुमितिजनकत्वदर्शनमात्रेण प्रथमोद्देष्टव्यत्वसाधनेऽनुमितेरपि तदापत्तिः । 'सुरभिश्चन्दनखण्डः' इति प्रत्यक्षं प्रति प्रत्यनुमितिगोचरानुव्यवसायप्रत्यक्षं प्रति चानुमितेर्जनकत्वदर्शनात् । द्वितीयोऽपि हेतुरसिद्धः । 'आकाशं नित्यं निरवयद्रव्यत्वात्' इत्यनुमितेः प्रत्यक्षजनकत्वाभावात् ।

अत्र केचिदाहुः । यद्यपि प्रत्यक्षत्वावच्छिन्नप्रत्यक्षं सर्वमुक्तव्यभिचारादेव नानुमितिजनकम् । तथाऽपि प्रत्यक्षैकदेशस्य पक्षादिप्रत्यक्षस्य तद्दर्शनेन तदितरस्य तज्जातीयत्वेन तत्साधकत्वोपपत्तिः । अनुमितेस्तु प्रत्यक्षजन्यत्वाव्यभिचार एव । 'आकाशं नित्यम्' इत्याद्यनुमितेरप्यन्ततः प्रत्यक्षमूलत्वात् । तथा च प्रत्यक्षत्वरूपमानविभाजकोपाध्यवच्छिन्नस्य प्रत्यक्षस्यानुमितिं प्रति जनकत्वाभावेऽपि अनुमितित्वरूपमानविभाजकोपाध्यवच्छिन्नानुमितेः प्रत्यक्षजन्यत्वाव्यभिचारादनुमितेः पश्चादुद्देश इति ।

तन्न । द्वितीयप्रयोगस्य व्यभिचारादिपरिहारेण साधुत्वसाधनेऽपि प्रथमप्रयोगे व्यभिचारादेरपरिहृतत्वेन साधुत्वायोगात् । 'प्रत्यक्षं प्रथमं प्रयोक्तव्यम्, प्रत्यक्षावच्छिन्नप्रत्यक्षस्य जनकत्वात्' इत्यवश्यं वक्तव्ये 'अनुमतित्वावच्छिन्नानुमितेः प्रत्यक्षजन्यत्वाव्यभिचारात्' इति हेतूकरणस्य व्यधिकरणत्वाच्च । यच्चोक्तं तज्जातीयत्वेन

तदपि साध्यत इति, तच्चानुमितेरप्युक्तरीत्या प्रत्यक्षजनकत्वात् तदितरानुमितेस्तज्जातीयत्वेन तज्जनकत्वसम्भवेन प्रथमोद्देशापत्तेरपरिहार्यत्वादिति ।

अत्रोच्यते । मानविभाजकोपाध्यवच्छिन्नस्य प्रत्यक्षस्यानुमितिजनकताऽस्त्येव । 'अयं घटः' इत्यादिप्रत्यक्षस्य 'घटो द्रव्यं पार्थिवः जलाहरणसमर्थो वा, घटत्वात्' इत्याद्यनुमितिं प्रति 'सुरभिश्चन्दनखण्डः' इति प्रत्यक्षस्य 'विमतं सुखसाधनं उपादेयं वा, सुरभिचन्दनखण्डत्वात्' इत्याद्यनुमितिं प्रति 'परमाण्वतीन्द्रियानुमितिज्ञानवानहम्' इत्याद्यनुव्यवसायप्रत्यक्षस्य 'विमतं प्रमाणम्, अनुव्यवसायत्वात्, प्रत्यक्षगोचरानुमितिव्यवसायवत्' इत्याद्यनुमितिं प्रति जनकत्वसम्भवात् । न ह्यनादौ संसारे कदापि कश्चिदप्येवं नानुमिनोतीति शक्यतेऽध्यवसितुम् । उक्तं च -

'प्रत्यक्षसिद्धमप्यर्थमनुमानेन बभुत्सन्ते तर्करसिकाः ।
प्रत्यक्षेण करणे दृष्टेऽपि सीत्कारेणानुमिमतेऽनुमातारः ॥'[१८] इत्यादि ।

न चैवंविधानुमितिर्यस्य पुंसो न जायते तदीयप्रत्यक्षेण न जनकतानुमितिरिति वाच्यम् । येनेदं घटो नोत्पद्यते तद्दण्डस्य घटकारणत्वाभावप्रसङ्गात् । न चेष्टापत्तिः । दण्डत्वेन घटत्वेन कार्यकारणभावाङ्गीकारविरोधात् । दण्डमात्रे घटमात्रजननयोग्यताऽस्तीति न दोष इति चेत् । इहापि तथाऽस्तु । अन्यथा उत्पन्नविनष्टघटादौ गुणाश्रयत्वाभावप्रसङ्गात् । प्रत्यक्षत्वानुमितित्वरूपमानविभाजकोपाधिभ्यामेव जन्यजनकभावसम्भवे उक्तकुसृष्टिमार्गानुसरणायोगाच्चेति सङ्क्षेपः ।

किञ्च, अस्ति स्वान्याबाध्यत्वरूपातिशयः । अत एव प्रत्यक्षभ्रमः 'पीतः शङ्खः' इत्यादि 'श्वेतः शङ्खः' इति प्रत्यक्षविशेषदर्शनेनैव निवर्तते, न त्वन्येन 'शङ्खः श्वेतः शङ्खत्वात्' इत्यनुमानेनाप्तवाक्येन वा, अन्येनानुमानिकेन शाब्देन वा ज्ञानेन । यद्यपि चन्द्रप्रादेशत्वादिप्रत्यक्षं शाब्देन विशेषदर्शनेन निवर्तते । तथाऽप्यन्ततः श्रोत्रप्रत्यक्षमूलमेव तदिति वा, अपटुप्रत्यक्षत्वात् स्वयमेव बाधितं वोत्पद्यते तदनन्तरमुत्पाद्यमानं शब्दविशेषदर्शनं तद्बाधकमिवोच्यते इति न कोऽपि दोषः ।

अनुमानागमयोस्तु प्रत्यक्षेणैव बाध्यता । 'तेजोऽनुष्णं पदार्थत्वात्' इत्यादौ प्रत्यक्षादन्यस्य तद्बाधकत्वादर्शनात् । तथा चेत्थमतिशयवत्वात् प्रथमोद्देश उक्तः ।

ततः शाब्दस्यानुमानानुग्राह्यत्वात्, अनुमितेश्च तदनुग्राहकत्वात् तदनन्तरं शाब्दस्योद्देशः ।

---

१८ ?

१७ प्रत्यक्षजन्यज्ञाननिरूपणम्

तत्र निर्दोषार्थेन्द्रियसन्निकर्षापेक्षं ज्ञानं प्रत्यक्षम् । अत्र निर्दोषपदमर्थेन्द्रियोभयविशेषणम् । तेन काचकामलादिदोषरहितस्येन्द्रियस्य अतिसामीप्य-अतिदूरस्थत्व-अतिसूक्ष्मत्व-अतिस्थूलत्वादिदोषयुक्तार्थेन सन्निकर्षः, अतिसामीप्यादिदोषरहितेनार्थेन काचकामलमनोऽनधिष्टितत्वादिदोषयुक्तस्येन्द्रिस्य सन्निकर्षश्च व्यावर्त्यते । ज्ञानपदेनेच्छाकृत्यादेर्व्यावृत्तिः । स्वरूपास्वरूपप्रत्यक्षज्ञानयोः सङ्ग्रहाय जन्यं ज्ञानं इत्यनुक्का सन्निकर्षापेक्षज्ञानमिति सामान्योक्तिः । स्वरूपज्ञानस्यानादिनित्यत्वेऽपि संसारस्याविद्यासापेक्षत्ववत् प्रागभावस्य प्रतियोगिसापेक्षत्ववच्चेन्द्रियसन्निकर्षसापेक्षत्वोपपत्तिः । ज्ञानमित्येवोक्ते अनुमित्यादावतिव्याप्तिः । अतः सन्निकर्षापेक्षेति । तावन्मात्रोक्तौ धूमाग्न्योः व्याप्तिरूपसन्निकर्षापेक्षत्वात् पुनस्तदवस्थो दोषः । अत इन्द्रियसन्निकर्षेति । आत्मेन्द्रियसन्निकर्षमादाय पुनस्तदवस्थो दोष इति अर्थेत्येवं सर्वं सार्थकम् ।

अत्र सन्निकर्षो नाम सम्बन्धः । तत्वं च विशिष्टप्रतीतिनिर्वाहकत्वम् । स च सम्बन्धो द्विविधः । लौकिकोऽलौकिकश्चेति । लौकिकोऽपि द्विविधः संयोगसम्बन्धः, स्वरूपसम्बन्धश्चेति । तत्राद्यो भूतले घटोऽस्तीत्यादिप्रत्यक्षजनकः भूतलघटयोः सम्बन्धः । द्वितीयस्तु 'मामहं जानामि' इत्यादिप्रत्यक्षजनक आत्मेन्द्रियसम्बन्धः ।

अलौकिकस्त्रिविधः । योगप्रभावः सामान्यं ज्ञानं चेति । तेन योगिनः अतीतानागतपदार्थेन तदिन्द्रियस्य संयोगसम्बन्धाभावेन तत्प्रत्यक्षज्ञानानुपपत्तिरिति निरस्तम् । संयोगाभावेऽपि योगजन्यादृष्टस्यैव तदिन्द्रियार्थयोर्विशिष्टव्यवहारनिर्वाहकत्वेन सम्बन्धत्वात् तदीयज्ञानस्य प्रत्यक्षत्वोपपत्तेः । अत एव महानससन्निकृष्टधूमे व्याप्तिं गृह्णतः पुरुषस्येन्द्रियेण देशान्तरस्थधूमस्य संयोगसन्निकर्षाभावेन व्याप्तिप्रत्यक्षानुपपत्तिरिति निरस्तम् । इन्द्रियसन्निकृष्टधूमसादृश्यापरनामकसामान्यस्यैव तत्र विशिष्टप्रतीतिनिर्वाहकत्वात् । अत एव 'घटमहं जानामि' इति प्रत्यक्षस्यानुपपत्तिः, साक्षीरूपेन्द्रियेण घटादिरूपार्थस्य सन्निकर्षाभावादिति निरस्तम् । तद्व्यवसायरूपज्ञानस्यैव साक्षिघटयोर्विशिष्टव्यवहारनिर्वाहकत्वात् ।

"अत्र सम्बन्धिभिन्नः सम्बन्ध्याश्रितः एको व्यासज्यवृत्तिः सम्बन्धः । स च षड्विधः । संयोगः, समवायः, संयुक्तसमवायः, संयुक्तसमेवेतसमवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । संयोगात् 'अयं घटः' इति, समवायात्

'अयं गकार' इति, तृतीयात् 'नीलो घट' इति, चतुर्थात् 'नीले नीलत्वम्' इति, पञ्चमात् 'शब्दे शब्दत्वम्' इति, षष्टात् 'भूतले घटो नास्ति' इति प्रत्यक्षज्ञानम् । षष्ठोऽपि पञ्चविधः । संयुक्तविशेषणविशेष्यभावः, समवेतविशेषणविशेष्यभावः, संयुक्तसमवेतविशेषणविशेष्यभावः, संयुक्तसमवेतसमवेतविशेषणविशेष्यभावः, समवेतसमवेतविशेषणविशेष्यभावः । घट-गकार-रूप-रूपत्व-गत्वेषु घटत्वाभावप्रत्यक्षं क्रमात् तेभ्यः पञ्चसम्बधेभ्यो जायते" इत्यादितार्किकरीतिस्तु, 'घटनिरूपितः संयोगो हि पटमात्रवृत्तिः, पटनिरूपितः संयोगश्च घटमात्रवृत्तिः । तथा च घटपटयोः संयोगः भेद इव प्रतिधर्मिविश्रान्तः न द्वित्वादिवद्व्यासज्यवृत्तिः' इत्यादिना भूतविवेके प्रागेव निरस्ता ।

अन्ये तु निर्विकल्पकसविकल्पकभेदात् प्रत्यक्षं द्विविधम् । नामजात्यादिधर्मसामान्यानवगाहि वस्तुस्वरूपमात्रावगाहि ज्ञानं निर्विकल्पकम् । तच्चातीन्द्रियम् । 'दण्डीति विशिष्टज्ञानं विशेषणज्ञानसाध्यं विशिष्टज्ञानत्वात्' इत्यनुमानगम्यमित्याहुः । तन्न । वस्तुमात्रस्य यत्किञ्चिद्धर्मविशिष्टतया प्रतीयमानत्वेन निर्धर्मकवस्तुमात्रज्ञानस्य सर्वानुभवविरुद्धत्वादिति । तान्त्रिकमनोरथसिद्धिर्यदि सिद्धं निष्प्रकारकवेदान्तजन्यचरमवृत्तिवादिनां मतम्(?) । अनुमानं तु सप्रकारकविशेषणज्ञानमादाय पर्यवसानान्न निष्प्रकारकज्ञानसाधकम् । आत्मविशेषगुणानां मानसप्रत्यक्षत्वनियमेनातीन्द्रियत्वव्याघातश्चेति सङ्क्षेपः ।

इति श्रीमत्पदार्थीयविवेके न्यायगर्भिते ।
प्रत्यक्षं केवलं मानं समाप्तिमधुनाऽगमत् ॥

१८ अनुमानजन्यज्ञाननिरूपणम्

अथानुमितिरूपं यत् केवलं मानमुत्तमम् ।
सङ्क्षेपेणोच्यते तत्तु दशप्रमितिवर्त्मना ॥[१९]

निर्दोषलिङ्गजन्यं ज्ञानमनुमितिः । अत्र निर्दोषत्वग्रहणेन व्यभिचार्यादिलिङ्गव्यावृत्तिः । ननु लिङ्गं व्याप्यमिति पर्यायः । व्याप्तिर्व्याप्यत्वम् । न हि व्यभिचार्यादौ व्याप्तिरस्ति । तथा च लिङ्गपदेन तद्व्यावृत्तिसिद्धेः निर्दोषपदं व्यर्थम् । न । सर्वेषां हि शब्दानामाभासानाभासवाचित्वं ब्राह्मणशब्दस्य ब्रह्मकुलजमात्रवाचिवत् । अत एव

[१९]व्याकरिष्ये यथाबोधं दशप्रमतिवर्त्मना इति तत्त्वसारे च ।

तत्राभासव्यावृत्तये 'अनूचानो ब्राह्मणः', 'समीचीनो ब्राह्मणः' इत्यादिविशेषणं दृश्यते । तद्वदिहापि आभासलिङ्गव्यावृत्तये निर्दोषत्वविशेषणम् । यदि आभासविविक्त एव शब्दार्थ इति मतं तदाऽनुपादेयमेव निर्दोषपदम् । अत एव 'उपपत्तिरनुमितिः' इत्येव क्वचिल्लक्षणोक्तिरपि दृश्यते । निर्दोषलिङ्गजन्यध्वंसादिव्यावृत्तये ज्ञानपदम् ।

ननु अनुमितिसामान्यलक्षणान्तरानभिधानादिदमेव सामान्यलक्षणमिति वक्तव्यम् । तथा च भ्रमानुमितावव्याप्तिः । मैवम् । भ्रमानुमितेर्लक्ष्यत्वासम्मतेः । न च सामान्यलक्षणानुपदर्शनं दोषः । आभासविवक्तया लक्ष्यं ह्यवश्यं ज्ञातव्यमिति नियमेन तद्विघातकत्वेन सामान्यलक्षणकथनस्य दोषत्वात् प्रकृतानुपयोगाच्च । अन्यथा प्रमाकरणत्वलक्षणस्य दुष्टेन्द्रियसाधारण्याभावेनाव्याप्तिदोषप्रसङ्गात् ।

नन्वथापि निर्दोषलिङ्गस्यानुमितिजनकत्वमनुपपन्नम् । निर्दोषलिङ्गस्य धूमस्य पर्वते स्वतः सद्भावेऽपि गृहे विद्यमानस्य पुंसोऽनुमित्यनुदयेनान्वयतो व्यभिचारात् । अतीतानागतवह्न्यनुमितेरतीतानागतधूमाभावेऽपि जायमानत्वेन व्यतिरेकव्यभिचाराच्चेति चेन्न । करणानां हि स्वतः सत्वमात्रेण न कार्यकारित्वम्, किन्तु सव्यापारीकृतानामेव । अन्यथा कुठारादीनां गृहे सत्वमात्रेणैव कार्योत्पत्तिप्रसङ्गः । करणं तु द्विविधम् । अज्ञातकरणं ज्ञातकरणं चेति । अत एव तद्व्यापारोऽपि द्विविधः । नत्वेकविधः । तथा च अज्ञातकरणेषु कुठारादिषूद्यमननिपतननैशित्यादिरूपो व्यापारः, चक्षुरादिषून्मीलनावलोकनार्थसन्निकर्षादिरूपो व्यापारः । एवमज्ञातकरणेष्वेव यागादौ भिन्नभिन्नव्यापारः । ज्ञातकरणेषु लिङ्गेषु शब्दादिषु च ज्ञानादिरूपो व्यापार इति सव्यापारीकृतस्य नान्वयतो व्यतिरेकतश्च व्यभिचारः ।

गृहे विद्यमानस्य धूमज्ञानाभावादनुमित्यभावेऽपि तज्ज्ञानवतोऽनुमितिदर्शनात् । अतीतानागतधूमस्य स्वतोऽभावेऽपि सव्यापारीकृतस्य तस्य सद्भावात् । नह्यतीतानागतधूमज्ञानं कस्यापि नास्तीति शक्यते वक्तुम् । ततोऽतीतादिवह्न्यनुमितिदशायां सव्यापारीकृतोऽतीतादिधूमोऽस्तीति कथं व्यभिचारः? अन्यथा यागस्यापि नश्वरत्वेन स्वर्गानुभवकाले सत्वाभावेन यागाभावे स्वर्गाभाव इति व्यतिरेकस्य व्यभिचारेण यागादेः स्वर्गादिकारणत्वं न स्यात् ।

एतेन धुमोऽयमिति धूमप्रत्यक्षे विषयतया धूमज्ञानेऽतिव्याप्तिः । धूमस्य वह्निलिङ्गत्वात् । इन्द्रियार्थसन्निकर्षादिना सव्याप्यारीकृतत्वाच्चेति निरस्तम् । ज्ञातकरणाज्ञातकरणयोर्व्यापारनियमस्योक्तत्वात् । न हीन्द्रियार्थसन्निकर्षादिना सव्यापारीकृतोऽपि धूमः ज्ञानादिना ज्ञातकरणे कृतेन सव्यापारीकृतो भवति । सन्निकृष्ट एव धूमः स्वप्रत्यक्षहेतुः, न ज्ञातो हेतुरिति धूमप्रत्यक्षे नातिव्याप्तिः । लिङ्गत्वं कुत्र किं

लिङ्गं इत्यपेक्षायां धूमप्रत्यक्षावसरे धूमस्य विषयत्वं न लिङ्गत्वमित्यप्याहुः ।

नन्वथापि धूमज्ञाने सत्यप्यगृहीतव्याप्तेः पुरुषस्यानुमित्यनुदयात् अन्वयतो व्यभिचारस्तदवस्थ एवेति चेन्न । न ह्यत्र ज्ञानमात्रं व्यापारः, किन्तु व्याप्यस्य पक्षवृत्तितया ज्ञानम् । न ह्यगृहीतव्याप्तेरेवंविधं ज्ञानमस्ति । तथा च, व्याप्तिप्रकारकपक्षधर्मताज्ञानेन सव्यापारीकृतस्य लिङ्गस्यानुमित्यव्यभिचारः ।

तथाऽपि 'पुरुषत्वव्याप्यकरादिमानयम्' इति ज्ञानविषयीकृतस्य करादेः संशयोत्तरप्रत्यक्षजनकत्वेनानुमितिजनकत्वाभावेन च स दोषस्तदवस्थ इति चेन्न । पक्षतासहकृतोक्तज्ञानविषयीकृतलिङ्गजन्यत्वस्य विवक्षितत्वात् ।

ननु तथाऽपि धूलीपटले धूमभ्रमानन्तरं जायमानायां यादृच्छिकसंवादिन्यां च वह्न्यनुमितौ निर्दोषलिङ्गजन्यत्वाभावेनाव्याप्तिः । मैवम् । प्रवृत्तिसंवादेन प्रमात्वव्यवहारेऽपि वस्तुतः प्रमात्वाभावेनालक्ष्यत्वान्न दोषः ।

यद्वा, व्याप्तिस्वोचितवृत्तित्वोभयविशिष्टलिङ्गज्ञानजन्यज्ञानमनुमितिः । लिङ्गज्ञानमित्यनेनेन्द्रियजन्यज्ञानस्य, 'अयं धूमः' इति ज्ञानजन्यस्य 'धूमज्ञानवानहम्' इत्यनुव्यवसायस्य, स्वोचितवृत्तित्वविशिष्टेत्यनेन 'धूमवान् पर्वतः' इति ज्ञानजन्यस्य, तदनुव्यवसायस्य व्याप्तीत्यनेन व्युदासः । अधोदेशे नदीपूरज्ञानजन्योर्ध्वदेशवृष्ट्यनुमितावव्याप्तिवारणाय पक्षवृत्तीत्यनुक्त्वा स्वोचितवृत्तीत्युक्तम् । 'धूमो वह्निव्याप्यः द्रव्यवांश्चायम्' इति ज्ञानद्वयजन्यानुव्यवसायेऽतिव्याप्तिवारणायोभयविशिष्टेति । उभयविशिष्टज्ञानानुव्यवसायवारणायाप्रतिबद्धेति उभयविशिष्टज्ञानविशेषणं देयम् । कामिनीजिज्ञासादिना प्रतिबद्धस्य परामर्शस्यानुमितिजनकत्वाभावेनानुव्यवसायजनकत्वेऽपि तदप्रतिबद्धस्यानुमितिजनकत्वनियमान्न कश्चिद्दोष इति सङ्क्षेपः ।

१९ आगमजन्यज्ञाननिरूपणम्

अथ निर्दोषवाक्येन जन्यं ज्ञानं तु केवलम् ।
शाब्दप्रमितिरूपं तदुच्यते माध्वसंविदा ॥

आकाङ्क्षायोग्यतासन्निधिवतां पदानां समूहो वाक्यम् । तेनानाकाङ्क्षत्वायोग्यत्वासन्निहितत्वादिदोषाणां निरासेऽपि वक्तृदोषनिबन्धनानां श्रोतृदोषनिबन्धनानां सङ्गदोषनिबन्धनानां भ्रान्तिमूलत्वविप्रलिप्सामूलत्वपरिहासमूलत्वानां वाक्यदोषाणां निरासायोगेन निर्दोषपदं सार्थकम् ।

यद्वा, उक्तरीत्या वाक्यशब्दसाधारण्येन वाक्याभासव्यावृत्तये निर्दोषपदम्, वाक्यध्वंसादिव्यावृत्तये ज्ञानपदम् । 'घटमानय' इत्यादिवाक्यजन्ये घटकर्मकानयनक्रि-

याकसंसर्गगोचरे ज्ञाने निर्दोषवाक्यजन्यज्ञानत्वमस्तीति लक्षणसमन्वयः । शिष्टमग्रे वक्ष्यते ।

२० अनुप्रमाणम्

अथ केवलप्रमाणसाधनमनुप्रमाणम् । साधनमिति केवलव्युदासः । प्रमाणमिति कुठारादेः । दुष्टेन्द्रियादेश्च । साधनमिति कालादृष्टादेः । केवलप्रमाणत्रैविध्यादिदमनुप्रमाणं त्रिविधम् । प्रत्यक्षानुमानशब्दभेदात् ।

२१ प्रत्यक्षम्

तत्राद्यं साक्षात्कारिप्रमासाधनम् । तन्निर्दोषार्थेन्द्रियसन्निकर्ष इति यावत् । अत्रेन्द्रियपदेन ज्ञानेन्द्रियं विवक्षितम् । तेन न वागादीन्द्रियसन्निकर्षेऽतिव्याप्तिः । ज्ञानेन्द्रियं च साक्षिणा सहाष्टविधम् । तज्जन्यसाक्षात्कारिणी प्रमा तत्सन्निकर्षश्चाष्टविधः । तत्साधनत्वप्रकारश्चेन्द्रियेषूक्तरीत्या व्यापारद्वारोपपादनीयः ।

यद्यपि 'अदुष्टमिन्द्रियं त्वक्षम्'[२०] इत्यादौ इन्द्रियस्यैव प्रत्यक्षत्वमुक्तम् । तथाऽपीन्द्रियेण साक्षात्कारे जनयितव्ये सन्निकर्षो व्यापारः, परशोरिव दारुसंयोगः । 'नहि स्वाङ्गं स्वव्यवधायकम्' इति न्यायेन क्वचिद्धर्मिप्राधान्योक्तिः, क्वचिद्धर्मप्राधान्योक्तिश्च तत्र तत्र दृश्यत इति न विरोधः ।

२२ अनुमानम्

अथानुमितिकरणमनुमानम् । यथा वह्न्याद्यनुमापकं धूमादि । ननु यत् करणं तत् सन्निकृष्टमेव क्रियां साधयति । न चेन्द्रियार्थयोः सन्निकर्ष इव धूमाग्न्योः सन्निकर्षः संयोगः सम्भवति घटादावतिप्रसक्तत्वात् । उच्यते । सन्निकर्षो ह्यनेकविध इत्युक्तम् । प्रसिद्धसन्निकर्षाभावेऽपि, अव्यभिचरितसामानाधिकरण्यरूपसम्बन्धात्मकव्याप्तिरेव धूमाग्न्योः सन्निकर्षः । एतेन धूमेनाग्निज्ञानमिव घटज्ञानमपि स्यादिति निरस्तम् । वह्निनेव घटेन धूमस्य व्याप्तिरूपसम्बन्धाभावात् ।

सेयं व्याप्तिः अविनाभावरूपा । अव्यभिचरितसामानाधिकरण्यमिति यावत् । अस्ति चासौ धूमे । यतो वह्निना विना धूमो न वर्तते महानसादौ । धूमेन सह महानसादौ वह्नेः सत्ताऽस्तीति व्यभिचारिणि वह्नौ व्याप्तिवारणायानेकनञ्घटितवक्रोक्तिः । धूमेन विना वह्नेरयोगोलकादौ सत्वेन, भवति तेन तद्व्युदासः ।

---

[२०]विष्णुतत्त्वनिर्णयोदाहृतब्रह्मतर्कवचनम्

वह्न्यविनाभावस्य धूमस्वरूपत्वात्, धूमे लक्षणसमन्वयो न विरुद्ध्यते । तथा च व्याप्तिज्ञानसव्यापारीकृतं लिङ्गमनुमितिकरणत्वादनुमानमुच्यते ।

ननु तथाऽपि धूमो वह्निव्याप्य इति ज्ञानमात्रादप्यनुमित्यापत्तिः । मैवम् । पक्षवृत्तित्वज्ञानस्याप्यपेक्षितत्वात् । ननु 'ऊर्ध्वदेशो वृष्टिमान् अधोदेशे नदीपूरात्' इत्यादिप्रयोगे नदीपूरवत्त्वहेतोः पक्षत्वेन निर्दिष्टे ऊर्ध्वदेशेऽभावेन न पक्षवृत्तित्वज्ञानं करणमिति । पक्षवृत्तित्वज्ञानपदेन स्वोचितदेशवृत्तित्वज्ञानत्वस्य विवक्षितत्वात् । पक्षतया निर्दिष्टोर्ध्वदेशादौ वृत्तित्वज्ञानाभावेऽपि स्वोचिताधःप्रदेशवृत्तित्वज्ञानस्य सत्वात् । एवञ्जातीयस्य हेतोरधःप्रदेश एवोचितो देशः । न तूर्ध्वदेशः । तथैवानुमित्यनुभवात् । अनुभवानुसारिणी हि कल्पना ।

एतेन 'शब्दोऽभिधेयः प्रमेयत्वात्' इत्यादौ प्रमेयत्वं यावति देशे व्याप्य वर्तते तावद्देशेऽभिधेयत्वं स्वसाध्यमनुमापयति, न तु धूमो हेतुः तद्वत् स्वावच्छिन्ने सर्वस्मिन्नपि देशे वह्निमनुमापयति । किन्तु प्रदेशविशेष एव । एवम् 'इदं संयोगि द्रव्यत्वात्' इत्यादौ द्रव्यत्वरूपो हेतुः पक्षं व्याप्य वर्तमानोऽपि न सर्वत्र संयोगमनुमापयति । तस्य व्याप्यवृत्तित्वाभावात् । 'इदं द्रव्यं संयोगित्वात्' इत्यादौ संयोगित्वहेतुः स्वाश्रयादन्यत्र प्रदेशान्तरे द्रव्यत्वमनुमापयतीत्यादि वैषम्यं किन्निमित्तम्? इति चोद्यं निरस्तम् ।

तत्तद्धर्माणां भिन्नभिन्नस्वभावत्वेन व्याप्तिग्रहदशायां यादृशेन साध्येन यादृशस्य हेतोर्यादृशी सामानाधिकरण्यरूपा व्याप्तिः गृहीता, तादृशो हेतुः तादृशमेवं साध्यं तादृशसामानाधिकरण्यग्रहणानुसारेण गमयति । नत्वन्यथेति नियमात् । तथा च, स्वोचिततत्तद्देशवृत्तित्वानुसारेण तत्तद्देशे तत्तत्साध्यानुमितिः जायत इति न वैषम्यानुपपत्तिः ।

एवं येन पुरुषेण यत् साधनं यद्व्याप्यतया यद्वृत्तितया यस्मिन् काले ज्ञायते तस्यैव पुरुषस्य तत् साधनं तत् साध्यं तत्रैव तस्मिन् काले प्रमापयतीति नियमश्चाश्रयणीयः । अत एव देवदत्तस्य धूमे व्याप्तिज्ञानात् यज्ञदत्तस्य वह्न्यनुमितिः, देवदत्तस्यैव घटाद्यनुमितिः, व्याप्यत्वज्ञानमात्रेण वह्न्यनुमितिः, कालान्तरे वह्न्यनुमितिश्च स्यादित्यादिचोद्यं निरस्तम् ।

तथाप्येवं व्याप्तिः केन गृह्यते? इति चेत् । यथायथं प्रत्यक्षानुमानागमेभ्यः । तथा हि । महानसादौ धूमेन्द्रियसन्निकर्षात् तद्गतव्याप्तिर्गृह्यते । तस्य चेन्द्रियस्य वह्निज्ञानं सहकारी । धूमनिष्टाया वह्निनिरूपितसामानाधिकरण्यात्मिकाया व्याप्तेः ससबन्धिकपरार्थत्वेन वह्निज्ञानस्याप्यपेक्षणात् । अव्यभिचरितव्याप्यसाध्यसामाना-

धिकरण्यात्मिकाया व्याप्तेः व्यभिचारग्रहे सत्यग्रहणात् । व्यभिचारज्ञानाभावोऽपि सहकारी । स च भूयोदर्शनजनितादृपाध्यभावनिश्चयात् ।

उपाधिश्च यः साध्यव्यापकः साधनाव्यापकः स उच्यते । स त्रिविधः । शुद्धसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकश्चेति । आद्यो यथा धूमाग्न्योः सम्बन्धे आर्द्रेन्धनवह्निसंयोगः । द्वितीयो यथा 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्' इत्यत्र बहिर्द्रव्यावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपम् । तृतीयो यथा 'स श्यामो मित्रातनयत्वात्' इत्यत्र मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकशाकपाकजत्वम् ।

नन्वेवं 'पर्वतो वह्निमान्' इत्यत्र पक्षेतरत्वमुपाधिः स्यात् । तद्धि महानसादौ साध्यं वह्निं व्याप्नोति । न व्याप्नोति च धूमम् । पर्वतस्यैव पक्षत्वेन तत्र पक्षेतरत्वस्याभावात् । उच्यते । 'यद्यग्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इत्यनुकूलतर्केण पर्वतस्य वह्निमत्वे सिद्धे तत्र पक्षेतरत्वस्याभावेन लक्षणाभावः । पक्षातिरिक्तस्थल एव व्याप्तिभङ्गो वक्तव्यः इति नियमाश्रयणेऽपि अनुकूलतर्केण साध्यनिश्चये सति सन्दिग्धसाध्यवत्वरूपपक्षलक्षणाभावेन तदितरत्वसम्भवः । यथोक्तम् -

'अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः ॥'[२१] इति ।

सोऽयमुपाधिः साध्यव्यापकत्वेन साधनाव्यापकत्वेन च ज्ञातः साधनत्वाभिमतस्य साध्यत्वाभिमताव्याप्यतां वा तद्व्यभिचारितां वा स्वव्यतिरेकेण साध्यभावं वा अनुमापयति । 'वह्निर्धूमाव्याप्यः, धूमव्यापकार्द्रेन्धनाव्याप्तत्वात् । यो यद्व्यापकाव्याप्यः स तदव्याप्यः । यथा घटत्वव्यापकपृथिवीत्वाव्याप्यो द्रव्यत्वादिः' इति वा । 'वह्निर्धूमव्यभिचारि तद्व्यापकार्द्रेन्धनव्यभिचारित्वात्' इति वा । 'विमतमयोगोलकादि न धूमवत्, आर्द्रेन्धनसंयोगरहितत्वात् ह्रदवदिति वा' प्रयोगसम्भवात् । ततश्च तन्निश्चयः व्याप्तिग्रहप्रतिबन्धकः ।

उपाध्यभावनिश्चयश्च योग्यानुपलब्ध्या । योग्यता च प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसामग्रीसमवधानम्, प्रतियोगिसत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वं वा । अयोग्योपाधेश्च शङ्कितुमशक्यत्वात् ।

एवं च धूमे उक्तरीत्या प्रत्यक्षेणानुगतधूमत्वजात्यभावेऽपि सादृश्येन सम्बन्धेन एतत्सदृशो धूमः सर्वोऽपि वह्निव्याप्यः इति सार्वत्रिकव्याप्तिग्रहः ।

---

२१ ?

अनुमानगम्या पश्चात् प्रदर्शयिष्यते ।

आगमगम्या यथा 'यो यो ब्राह्मणः स सो न हन्तव्यः', 'या या गौः सा सा न पदा स्प्रष्टव्या' इत्यादिः 'ब्राह्मणो न हन्तव्यः', 'गौर्न पदा स्प्रष्टव्यः'[२२] इत्याद्यागमादवगम्यते ।

तच्चानुमानं द्विविधम् । केवलान्वयि, अन्वयव्यतिरेकि चेति । यस्य केवलमन्वयव्याप्तिरेव न व्यतिरेकव्याप्तिः तत् केवलान्वयि । यथा 'शब्दोऽभिधेयः, प्रमेयत्वात्' । अत्र हि 'यत्र प्रमेयत्वं तत्राभिधेयत्वम्' इत्यन्वयव्याप्तिरेवास्ति । व्याप्तिधर्मिणः प्रमेयत्वस्य तत्प्रतियोगिनः अभिधेयत्वस्य सर्वत्र सत्वात् । न पुनः 'यत्राभिधेयत्वाभावः तत्र प्रमेयत्वाभावः' इति व्यतिरेकव्याप्तिरस्ति । व्याप्तिधर्मकप्रतियोगिनोरभिधेयत्वप्रमेयत्वाभावयोरसत्वात् । यस्यान्वयव्यतिरेकोभयव्याप्तिः तदन्वयव्यतिरेकि । यथा 'पर्वतो अग्निमान् धूमात्' इति अत्रान्वयव्याप्तिधर्मिणः धूमस्य व्यतिरेकव्याप्तिधर्मिणः व्यह्नेरभावस्य च सत्वेनोभयविधव्याप्तिसम्भवात् ।

तस्य च पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तत्वं अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति पञ्चाङ्गानि । केवलान्वयिनस्तु विपक्षाभावेन तद्व्यावृत्तिरहितत्वाच्चत्वार्यङ्गानि । इदं च तार्किकरीत्योक्तम् । न तु वस्तुतः ।

'घटादौ प्रमिता तावत् प्रागभावेन युक्तता ।
आरोप्य बुद्धिपूर्वं सा गगनादौ निषिध्यते ॥'[२३]

इत्युक्तरीत्या विपक्षवृत्तित्वस्याभावेऽपि प्रसिद्धस्य बुद्धिपूर्वमारोपितस्य निषेधसम्भवात् ।

ननु केवलव्यतिरेकि चेति तृतीयमनुमानं वक्तव्यम् । तत् कथं द्विविधमेवानुमानं इत्युक्तम्? उच्यते । तथा हि । अन्वयव्याप्तिरहितं केवलव्यतिरेकीत्युच्यते । न चेदं प्रमाणपदमधिरोहति । 'अनुमानस्य द्वयं सामर्थ्यम्, व्याप्तिः समुचितदेशवृत्तिता चेति' इत्युक्तम् । साधनत्वेनाभिमते यदि व्याप्तिर्न स्यात् कथं तदनुमानं स्यात्? न च साधने व्याप्त्यभावेऽपि साध्याभावे व्याप्तिरस्तीति वाच्यम् । साध्याभावस्य साधनत्वेन निर्देशाभावात् । साधन एव हि व्याप्तिरपेक्षिता । न हि भावेन भावसाधने, अभावे व्याप्तिरपेक्षिता ।

---

२२ ?
२३ ?

किञ्च, अन्वयव्याप्तिशून्यमनुमानं न सम्भावयितुं शक्यम् । ननु 'जीवच्छरीरं सात्मकं प्राणादिमत्वात्' इत्याद्यनुमानं सम्भाव्यत इति चेन्न । तस्यान्वयव्याप्तिशून्यताऽसम्मतेः । न च तत्र दृष्टान्ताभावेनान्वयव्याप्तिर्नास्तीति वाच्यम् । व्याप्तेर्धर्मिसत्तासापेक्षत्वेऽपि दृष्टान्तसत्तासापेक्षत्वाभावात् । न च तदभावे कथं व्याप्तिर्गृह्यते? इति वाच्यम् । तावताऽपि व्याप्तेरसत्वासिद्धेः । अन्यथा 'देवदत्तशरीरं सात्मकम्, प्राणादिमत्वात्, यज्ञदत्तशरीरवत्' इति प्रयोगो न स्यात् । दृष्टान्ताभावे प्रत्यक्षेण व्याप्तेर्दर्शयितुमशक्यत्वेऽपि, अनुमानगम्याया व्याप्तेः सत्त्वावश्यम्भावाच्च । 'विमतं प्राणादिमत्वं सात्मकत्वव्याप्यं तदभावव्यापकीभूताभावप्रतियोगित्वात् । यो यदभावव्यापकीभूताभावप्रतियोगी स तद्व्याप्यः । यथा वह्न्यभावव्यापकीभूताभावप्रतियोगी धूमः वह्निव्याप्यः' इति प्रयोगसम्भवात् ।

एवमनुमानग्राह्यान्वयव्याप्तिसत्वेऽपि प्रत्यक्षग्राह्यव्याप्तिराहित्यमात्रेण केवलव्यतिरेकीति व्यवहारोपपत्तौ तस्य न विधान्तरा सम्भवतीत्यन्वयव्यतिरेकिण्यन्तर्भावसम्भवात् । अत एव क्वचिद्व्यतिरेकव्याप्तिप्रदर्शनं व्यभिचाराभावप्रदर्शनमुखेनान्वयव्याप्तिनिश्चय उपयुज्यते ।

पुनरनुमानं द्विविधम् । स्वार्थं परार्थं चेति । यत् परोद्देशमनपेक्ष्य जायमानं धूमादिज्ञानं तत् स्वार्थानुमानम् । यत् तु परोद्देशमपेक्ष्य धूमादिज्ञानमुत्पद्यते तत् परार्थानुमानम् । तज्जनकत्वा...[२४]

---

[२४]इतः परं न लिखितं मूलकोशे ।

परिशिष्टम् A

श्रीरघुनाथतीर्थश्रीपादकृतग्रन्थाः

१ शेषतात्पर्यचन्द्रिका

- The author is known after this work as शेषचन्द्रिकाचार्य
- शेषतात्पर्यचन्द्रिका is a gloss on the commentary तत्त्वप्राकाशिका of जय-तीर्थ, which in turn is a commentary on ब्रह्मसूत्रभाष्य of आनन्दतीर्थ.
- It covers the last two chapters, as तात्पर्यचन्द्रिका of व्यासतीर्थ is available on the first two chapters.
- It is partly published [4], [3]. A number of incomplete manuscripts are available in ORI Mysore.

आदिः

सत्यासक्तं मदिष्टं निखिलनिजजनव्रातरक्षैकदीक्षं
भूत्या युक्तं विधुद्धं विमतखलजनव्रातनिर्घातरूक्षम् ।
मत्या धृत्या च च शान्त्या द्विजपतिकुलजं वेदविद्याप्तपक्षं
भक्त्या वन्दे त्रिरूपं हरिमनिशमहं मोक्षदानैकदक्षम् ॥ १ ॥

नानाभगवतिश्रान्तभक्तोपासकचिद्गृहम् ।
कृष्णं चेतोऽभिरामं मे वेदेशं प्रणमाम्यहम् ॥ २ ॥

सर्वज्ञाद्या गुरुवरा दुर्वादिजनदुर्धराः ।
अर्वाचीने मयि परं कुर्वन्त्वेते दयाङ्कुरम् ॥ ३ ॥ [४]

अन्त्यम्

नित्योच्चानन्दभुङ्मुक्ततत्यासेवितपद्वयम् ।
अत्यन्तं प्रीयतां कृत्या सत्या मे शेषसंस्तरः ॥ १ ॥

मदीयपूर्वाचरितप्रतुष्टश्रीप्राणनाथेन हृदि स्थितेन ।
सेव्या कृतिः श्रीहरिणा प्रणीता स्वार्थेषु मात्सर्यमिदं कुतो न ॥ २ ॥ [५]

२ तत्त्वकणिका

- It is a commentary on तन्त्रसारसङ्ग्रह of आनन्दतीर्थ.
- It is published [7]. Manuscripts are available in ORI, Mysore.

आदिः

ब्रह्माऽपीन्द्रो महत्या ध्रुवमिह सहितो मायया यस्य सेवां
कुर्याल्लक्ष्मीश्च पद्मं यदुदरममलं शतृहन्ता शुभास्यः ।
आदिर्देवः पुमान् योऽमितगुणगणयुक् भद्रपाणिश्च देवः
सोऽयं दक्षोऽद्य विष्णुः प्रमितिमतिदिशेद्रोधहीनो हरिर्नः ॥ १ ॥

महाज्वालं दक्षमादिपुरुषं मानुषेश्वरम् ।
रामं श्रीजानकीकामं सेवे हनुमदर्चितम् ॥ २ ॥

रसं पुमात्मानमथादिदेवं ध्रुवं धवं दृष्टिदषुल्कमस्य ।
गुरोर्गुरुं बादरसद्मवासं तं व्याससञ्ज्ञं प्रणमामि मूर्ध्ना ॥ ३ ॥

नन्दितीर्थमुखानन्ददायिनः शिष्यसन्ततेः ।
अमन्दकरुणां कुर्युः मन्त्रव्याख्यां चिकीर्षति ॥ ४ ॥

अन्त्यम्

यथाशक्तिव्यापृतया बुद्ध्या निर्मितया मया ।
व्याकृत्या तन्त्रसारस्य प्रीयतां शेषसंस्तरः ॥ १ ॥

यैर्हृदिस्थैर्महाचार्यैर्व्याख्या देवैर्विनिर्मिता ।
येषामनुग्रहाद्वाऽपि प्रीयन्तां ते तथा भृशम् ॥ २ ॥

श्रीमद्व्यासमुनीशहंसविलसत्तद्वंशसत्पद्मिनी
प्रोद्यच्छ्रीरघुनाथतीर्थयतिराट्पङ्केरुहादुद्भवा ।
पूर्णप्रज्ञविनिर्मिताखिलमहातन्त्रोद्धृतेर्दीपिका
विन्यस्ता विदुषा सुतत्त्वकणिका भूयाद्धरेः प्रीतये ॥ ३ ॥ [७]

३ तत्त्वसारः

- It is commentary on बृहतीसहस्रम्.

- It is published [6]. Manuscripts are available in ORI Mysore.

आदिः

जानकीवदनाम्भोजभानवे गतये सताम् ।
नमः श्रीरामचन्द्राय हेतवे सर्वसम्पदाम् ॥ १ ॥

बृहतीसहस्रपारावारशायी रमापतिः ।
अनिरुद्धादिपञ्चात्मा पञ्चद्वीपेषु काशते ॥ २ ॥

पञ्चाङ्गयुक्सुपर्णं य इष्टिकास्थितिसंस्थितम् ।
आरूढस्तमहं वन्दे पञ्चशास्त्रोक्रमादरात् ॥ ३ ॥

महदुक्थं ऋक्सहस्रं सहस्रहरिवाचकम् ।
व्याकरिष्ये यथायोगं दशप्रमतिवर्त्मना ॥ ४ ॥

अन्त्यम्

सर्वप्रहरणश्चासावायुधश्चेति सर्वप्रहरणायुध इति निरुक्तेः यूयं पात स्वस्तिभिः सदा न इत्यनेन सूचनात् सर्वप्रहरणायुधमूर्तिरत्र ।

४ पदार्थविवेकः

The present work.

आदिः

जानकीवदनाम्भोजभानवे गतये सताम् ।
नमः श्रीरामचन्द्राय हेतवे सर्वसम्पदाम् ॥

अन्त्यम्

पुनरनुमानं द्विविधम् । स्वार्थं परार्थं चेति । यत् परोद्देशमनपेक्ष्य जायमानं धूमादिज्ञानं तत् स्वार्थानुमानम् । यत् तु परोद्देशमपेक्ष्य धूमादिज्ञानमुत्पद्यते तत् परार्थानुमानम् । तज्जनकत्वा. . . [१]

५ कर्मनिर्णयव्याख्या

It is quoted by Dr.B.N.K.Sharma [1]. He says the manuscript of it is available in a private collection at Kumbhakonam. Nothing more can be made out. However, the colophon of Tattvasāra, edited by Sri Śeśagiri Acārya, is worth noting : इति श्रीलक्ष्मीनारायणपूज्यपादानां शिष्येण रघुनाथयतिना कृतायां तत्त्वसाराख्यायां कर्मनिणयटीकाभावविवृतौ बृहतीसहस्रपारावारे दशमः खण्डः सम्पूर्णः ।

[१] The work is incomplete; antya is not available

गङ्गास्तोत्रम्

- It is a small poetic composition having 30 stanzas.
- It is published [8]. The manuscript is available at Śrī Jayatītha Sanskrit Manuscript Library, Vyasanakere.

आदिः

देवि किं वर्णये तावकं चित्रकं प्रेक्षितुं प्रार्थितं सर्वभूतैः सदा ।
नेक्षितुं योग्यमज्ञस्तरामम्ब ते वैभवं कोऽपि वक्तुं क्षमः स्यात् कुतः ॥
सेव्यते पूज्यते नम्यते धार्यते देवि गङ्गे पदद्वन्द्वमज्ञस्तराम् ॥

अन्त्यम्

नन्दितीर्थोरुहृत्स्वामिनः प्रीतये यादवानां पतेर्गाङ्गमेनं स्तवम् ।
निर्ममे राघवो नाथशब्दोत्तरः पद्यतां पद्यतामादरान्निर्मलम् ॥

सनत्सुजातीयव्याख्या

- Adyanta ślokas are published by Dr. Prabhanjanacarya [8].
- The work is said to be published from Srirangam.
- Nothing more is known.

आदिः

अनुक्तं यदि ते किञ्चिद्वाचा विद्यते तन्मे शुश्रूषवे ब्रूहीत्यन्वयः । अत्र तात्पर्यं विदुरं पप्रच्छ । सोऽवदद्धर्मं पार्थानां राज्यदापनम् ।

अन्त्यम्

अत्राध्यायपञ्चके केचन श्लोकाः प्रक्षिप्ताः । प्रायः कोशेष्वदर्शनात् ते न व्याख्याताः ।

ईशावस्योपनिषद्भाष्यटीकाटिप्पणी

Dr.B.N.K.Sharma [1], has attributed this work to Śrī Raghunātha Tīrtha. However, the colophon of the published work [10] attributes this to Kanṣi Raghunāthācārya, not to Raghunātha Tīrtha.

परिशिष्टम् B

श्रीरघुनाथतीर्थस्त्रोत्राणि

१ श्रीजगन्नाथतीर्थकृतभाष्यदीपिकास्थम्

येनायं निरणायि मध्वगुरुसङ्गाष्यप्रकाशाशयः
प्राखण्डि प्रतिवादिदर्शनगणः प्राबन्धि गुर्वर्णवः ।
शिष्येभ्यः समदायि वित्तमुभयं प्रालम्भि विद्यासनं
सोऽयं श्रीरघुनाथतीर्थगुरुराट् शुद्धिं विदध्यान्मतेः ॥ [९]

२ चरमश्लोकः

सर्वं सर्वं सहेशानः सभासुजितवादिराट् ।
सर्वदा सर्वदो भूयात् रघुनाथमुनीश्वरः ॥

३ श्रीविद्याकान्ततीर्थकृतं रघुनाथतीर्थाष्टकम्

मालतीकुसुमकल्पितहारं बालभावकलितामृतचोरम् ।
नीलनीरदसमानशरीरं पालकं त्रिजगतां भज शौरिम् ॥ १ ॥

देवकीतनयपूज्यतन्द्रं पावकोपमरुचिं गुणसान्द्रम् ।
सेवकात्मजनकैरवचन्द्रं भावयामि रघुनाथमुनीन्द्रम् ॥ २ ॥

ऊर्ध्वपुन्ड्रलसमानमुखाब्जं देवतार्चनविशुद्धकराब्जम् ।

तीर्थयात्रपरिपूतपदाब्जं नौमि हर्षपरिपूर्णहृदब्जम् ॥ ३ ॥

शङ्खचक्रविलसद्वरगण्डं बाहुमूलपरिशोभितदण्डम् ।
पादयुग्मजितसारसषण्डं चिन्तये वितरणे बहुषण्डम् ॥ ४ ॥

कण्ठलम्बितुलसीवनमालं बालसूर्यसदृशारुणचेलम् ।
साधुसङ्घपरिसेवितशीलं तं नमामि नतभूसुरजालम् ॥ ५ ॥

भारतीरमणपूर्णकटाक्षं मायिसङ्घविनिवारणदक्षम् ।
व्यासराजमुनिसम्मतपक्षं भावये दुरितखण्डनदीक्षम् । ६ ॥

सारसाक्षसदनायितदेहं चन्द्रिकार्थरचनाङ्गतमोहम् ।
तं नमामि नुतयज्ञवराहं चन्द्रिकार्यदशमं शिरसाहम् ॥ ७ ॥

मध्वशास्त्रपयोनिधिभेषं भक्तपूगपरिपूरितकोशम् ।
स्वीयकीर्तिपरिपूर्णदशाशं चिन्तये हृदिविभातरमेशम् ॥ ८ ॥

पिप्पलद्रुमसमीपनिकायं तत्तकाञ्चनकलाधिककायम् ।
नारसिंहकृपया जितमायं चिन्तये त्रिमकुटेशसहायम् ॥ ९ ॥

श्रीनृकेसरितनूभवविद्याकान्तनिर्मितवर्ष्टकमेतत् ।
ये पठन्ति सततं भुवि मर्त्यास्ते लभन्ति सकलेप्सितमर्थम् ॥ १०

॥ इति श्रीविद्याकान्ततीर्थकृतश्रीरघुनाथतीर्थाष्टकम् ॥ [८]

४ श्रीविद्यारत्नाकरतीर्थकृतं शेषचन्द्रिकाचार्यस्तोत्रम्

श्रीपूर्णबोधसमयाम्बुधिचन्दिराय विज्ञानभक्तिमुखसद्गुणमन्दिराय ।
हृन्नीरजान्तरविभासितसेन्दिराय कुर्वे रघुनाथयतीश्वराय ॥ १ ॥

गोपालबालसरसीहृदसक्तचित्तं द्वैपायनार्यसमयेणिशमप्रमत्तम् ।
पापाद्रिभेदकुलिशायितभव्यवृत्तं भूपारिजातमनिशं स्मर शुद्धहृत्तम् ॥ २

लक्ष्मीनारायणाख्यव्रतिवरकरकञ्जातजातः स्वधीत-
प्राज्ञप्रज्ञाघमौघक्षितिसुरनिकराराधिताङ्घ्रिचब्जयुग्मः ।
स ह्यक्ष्माभृद्दुहित्रा स्फटिककपिलयोः सङ्गमे जातवेदो
मूर्धन्ये राजमानो वहतु मयि कृपां स्वीयदासानुदासे ॥ ३ ॥

वन्दमानजनसंसदपेक्ष्यं साधयाम्यहमिति स्थिरदीक्षम् ।
संसदि क्षणविधूतविपक्षं कंसभित्सुगुणसाधनदक्षम् ॥ ४ ॥

व्यासराजमुखवर्यमुखोद्यच्चन्द्रिकोर्वरितपूर्तिकृतं तम् ।
भावयामि सुरभूमिरुहं गामागतं क्षितिसुरार्थनयाऽहम् ॥ ५ ॥

घोरहृत्तिमिरसन्ततिसूर्यं धीरशेखरमपातकचर्यम् ।
नोनमीमि भुविमस्करिवर्यं भूसुरव्रहसुसंसदि शौर्यम् ॥ ६ ॥

रेत्युक्का लभते रघूद्वहकृपां घ्वित्येतदुक्का क्षणात्
स्यादेवैष घुधातुवाच्यकृतिमान् नाशब्दतो नाथवान् ।
थस्योच्चारणतो लभेत तपसः सिद्धिं यदाख्याक्षरैः
सर्वं चैतदवाप्नुते किमुत तन्नाम्नोखिलस्योक्तितः ॥ ७ ॥

रुक्मिणीचरणाम्बुजसेवासादितानितरलभ्यविभूतेः ।
व्यासराजयतिशेखरविद्याविष्टरेश करुणां मयि कुर्याः ॥ ८ ॥

पदवाक्यप्रमाणाभोनिधिपारीणताभृते ।
सर्वतन्त्रस्वतन्त्राय प्रणमामि मुहुर्मुहुः ॥ ९ ॥

श्रीशेषचन्द्रिकाचार्यपदवङ्कजसंस्मृतिः ।
अतिशेते देवगवीचिन्तामणिसुरद्रुमान् ॥ १० ॥

रघुनाथयतीशानः पातु मां शरणागतम् ।
शरणागतवात्सल्यमात्मीयं दर्शयन्मयि ॥ ११ ।

सर्वोत्तमो हरिरशेषजगन्न मिथ्या
भेदश्च जीवनिकरोऽनुचरोऽजितस्य ।
नीचोच्चताऽस्य च मिथो निजमोदलाभो
मुक्तिः सुभक्तित उरुक्रमणेऽकिलेशे ॥ १२ ॥

अक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः
वृत्तिर्मुख्यतमा यतोऽस्य कमलानाथे स्वतन्त्रो हरिः ।
सर्वं चैतदधीनमित्यपि दृढं संसाधयित्वाऽखिलं
दुर्वादं समखण्डयत् सदसि यो मेधां दिशेत् सोऽमलाम् ॥ १३ ॥

कण्टे श्रीतुलसीस्रजं हृदि दधत् श्रीवल्लभं कर्णयो

द्वन्द्वे श्रीतुलसीदळे करसरोजातद्वये पुस्तकम् ।
मुद्रोल्लासितमूर्ध्वपुण्ड्रनिकरं काये दधानोऽन्तिक
भ्राजद्दण्डकमण्डलुर्गुरुवरः श्रेयोऽर्थिभिश्चिन्त्यताम् ॥ १४ ॥

रघुनाथयतीश तावकिनाखिललक्ष्माण्मनुसन्दधन्निजानि ।
हरते कुमतिर्य आर्यवर्यदृहि तस्मिन्ननुकूलतां न यायाः ॥ १५ ॥

व्यासराजमठोऽस्माकं मठ एवेति वादिनाम् ।
शिक्षस्व गुरुवर्याशु यद्यस्त्यात्ममठे कृपा ॥ १६ ॥

रघुनाथयतीशान त्वदीयान् स्मर कारुण्यदृशो विदेहि पात्रम् ।
गणयेर्भवदीयदासदासे'स्विति याचे रचिताञ्जलिः प्रणम्य ॥ १७ ॥

विद्यारत्नाकरोक्तां गुरुवरनुतिमादरेण यः पठति ।
तस्मिन्नामगिरिशो नरहरिरजितः प्रसीदति क्षिप्रम् ॥ १८ ॥

॥ इति श्रीविद्यारत्नाकरतीर्थकृतं शेषचन्द्रिकाचार्यस्तोत्रम् ॥ [११]

Bibliography

[**1**] p.504, History Of the Dvaita School Of Vedānta and its Literature, Dr.B.N.K. Sharma, Motilal Banarsidas Publishers Private Limited, Delhi, Third revised edition, 2000

[**2**] p.47, p.60, Granthamālikāprasara, Gopālakr̥ṣṇācārya Gaudagere, Prabhā Mudraṇālaya, Bangalore, 1998

[**3**] श्रीमद्ब्रह्मसूत्रभाष्यं तत्त्वप्रकाशिकया शेषतात्पर्यचन्द्रिकया च समलङ्कृतम्, द्वितीयभागः, प्रा. डि. प्रह्लादाचार्य, पूर्णप्रज्ञसंशोधनमन्दिरम्, २००४

[**4**] श्रीमद्ब्रह्मसूत्रभाष्यं तत्त्वप्रकाशिकया शेषतात्पर्यचन्द्रिकया च समलङ्कृतम्, प्रथमभागः
Edited by : The Editorial board of Poornapaprajna Research Institute
Published by : Poornapaprajna Research Institute, Bangalore, 1967

[**5**] p.316, Descriptive Catalogue of Sanskrit Manuscripts, volume XIV, Dr.H.P.Malledevaru, ORI, University of Mysore, Mysore 1988

[**6**] बृहतीसहस्रम् तत्त्वसारसहितम्, विद्वान् पि. यस्. सेषगिरि आचार्यः, श्रीमन्मध्वसिद्धान्तोन्नाहिनीसभा, तिरुचानूरु, तिरुपति, प्रथममुद्रणम् - १९९९

[7] तन्त्रसारसङ्ग्रहः तत्त्वकणिकाव्याख्यया सहितः, विद्वान् दि. प्रह्लादाचार्यः, श्रीविद्यापयोनिधिप्रकाशनम्, श्रीव्यासराजमठः, बसवनगुडि, बेङ्गलूरु, प्रथममुद्रणम् १९९६

[8] p. 92-96, p.116, p.152, Śrī Vyāsaraja darśana, Dr. Vyāsankere Prabhbanjanācārya, Śrī Vyāsamadhwa samśodhana Pratiṣṭhāna, First Edition 2005

[9] श्रीजगन्नाथयतिकृता भाष्यदीपिका, मागडिरङ्गनाथाचार्यः, भाष्यदीपिकाप्रकाशनसमिति, बेङ्गलूरु, १९६४

[10] ईशावास्योपनिषद्भाष्यम्, त्रयोदशव्याख्यानविभूषितम्, वादिराजाचार्य करणम्, विश्वमध्वमहापरिषत्, उत्तरादिमठः, २००६

[11] Śrī Śeṣacandrikācāryaravara stotra, Śrī Vidyāratnākara Tīrtha, M. Śrīnivāsa Rao, Bangalore, Kāḷayukti Aṣāḍha